CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह: पु: १५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१६६

…agavata-Manjaree

and

Ma…e-Parimala

भागवतमञ्जरी

मञ्जरीपरिमलसहिता

फुलचन्द्र-गौतमप्रणीता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५-पु-१८८

Bhagavata-Manjaree

AND

Manjaree-Parimala

(With illustrations)

(Being a simple lucid epitome of Shreemad Bhagavata, which is cousidered a principal Religious Book of the Hindus, and which is full of Philosophical and Theological ideas.)

32

दर्ता नं. १५११५

वाल्मीकि विद्यापीठ-पुस्तकालय

By:

Pt. Gautama Kulachandra Sharma-

(Sahityacharya)

A. D. 1928.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Printed by Natverlal Itcharam Desai at THE GUJARATI PRINTING PRESS, Sassoon Buildings, Elphinstone Circle, Fort, Bombay and Published by SAHITYACHARYA KULACHANDRA SHARMA 37 Lajim Pat, NEPAL.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौतमोपाभिधेन कुलचन्द्रशर्मणा

प्रणीता

सपरिमला

सचित्रा

भागवतमञ्जरी।

सेयं

प्रणेत्रैव परिशोध्य

मुम्बय्यां

"नटवरलाल इच्छाराम देसाई" इत्येतेषां "गुजराती

प्रिंटिंग प्रेस" मुद्रणालये संमुद्य च

प्रकाशिता

वि. सं. १९८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्ञा नियमितं ग्रन्थद्वयमेतत्समन्ततः ।
प्रणेतुरेवाऽऽयतते मुद्रणादिषु कर्मसु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समर्पण.

न्यायपरायण ! प्रजावत्सल ! धर्मधुरन्धर ! महाराज !
सर्कारका करुणादृष्टिले आर्द्रता पाउने भिक्षुकका
बुद्धिभूमिमा उत्पन्न भएर प्रकाशित भएकी,
परिमलसहित यो मञ्जरी सर्कारका करक-
मलमा समर्पित गरेर, "यो सर्कारका
प्रफुल्लकीर्तिलतासँग सहयोग पाएर,
सज्जनरूप भ्रमरवर्गलाई आक-
र्षित गर्दै चिरकाल सम्म
फैलियोस्" यस्तो सदा-
सर्वदा ईश्वरमा प्रा-
र्थना गर्दछु.

विनीत भिक्षुक.

कुलचन्द्रगौतम.

ल्मीकि विद्यापीठ-पुस्तका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्यन्ते कतिचित्प्राप्ता धन्यवादपुरःसरम् ।
विवेकोदात्तमनसामिह संमतयः ॥

[मुद्रा]

समस्तश्रुतिस्मृतिपुराणेतिहासागमप्रमाणपरम्पराजेगीयमानशुद्धाद्वैतपुष्टिमार्गसम्प्रदायप्रतिष्ठापनपरमाचार्यवेदव्यासविष्णुस्वामिमतवर्तिश्रीश्रीमद्वल्लभाचार्यचरणान्ववायाचार्यगोस्वामिकुलकौस्तुभश्रीमद्गोकुलनाथमहाराजचरणानां कवितामर्मविदः सहृदयान् विदुषः प्रत्येष निजहृदयविमर्शः—

यदयं नेपालाभिजनो गौतमापरनामधेयः सहृदयहृदयाह्लादनकविकर्मकुशलः श्रीमान् कुलचन्द्रः सुधीरिह निजनिर्मितां भागवतमञ्जरीं मुद्रापयितुमागतः कदाचिदस्माकमपि परिचयं प्राप्तः । एकदाऽस्मद्विदुषां पुरः स्वविरचितानि कतिपयान्यपि काव्यानि चास्माञ्छ्रावयामास । तानि चाश्रुत्य नितरां परितुष्टा वयम् । निपुणोऽयं कविप्रवरः । अस्य कविता श्रूयमाणैव हृदयमाप्लावयति । अनेन हि श्रीमद्भागवतस्य संक्षेपो 'भागवतमञ्जरीति' सहृदयहृदयसन्तोषावहं काव्यं विरच्य मुद्राप्य चाऽस्माकमुपायनीकृतम्, अत्र हि संक्षेपेण सर्वा अपि श्रीभागवतकथा वर्णिताः । श्रावितश्चास्याः कियानपि भागोऽस्मद्विद्वद्भिः । सर्वथा श्लाघनीयं रमणीयं चास्य काव्यमिदमिति सम्मतिरस्माकम् । दुर्लभाः खल्वेवंविधाः कविकर्मकुशला विद्वांसः (इति)

माघकृष्ण ७ मी
मन्दो वासरः सं. १९८४
बृहन्मन्दिरम् बंबई.

महाराजचरणानामनुज्ञया
देवर्षिभट्ट श्रीरमानाथ शास्त्री
विद्याविभागाध्यक्षः

॥ श्रीहरिः ॥

श्रीहयवदनपरब्रह्मणे नमः ।

बंबई.

माघकृष्ण ७ सं. १९८४

दुर्लभं खलु वैदुष्यं कवित्वं च । तत्रापि शब्दार्थगुणालङ्कृतं कवित्वं तु प्रायो नायाति दृष्टिपथम्. ये पुनरयत्ने शब्दशय्यासु शब्दार्थगुणालङ्कृतां रसशालिनीं कवितामभिनिवेशयन्ति ते सरलतयैव सहृदयहृदयावर्जनं विदधते । विरलतमा एवैतद्विधाः कवितल्लजा लोके । तेष्वेवायमन्यतमो नेपालाभिजनो गौतमापरनामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कविकुलशेखरः श्रीमान् कुलचन्द्रः पण्डितप्रवरः। क्षेमेन्द्रेणेवाऽनेन विद्वत्कविना भारतरामायणयोर्भारतमञ्जरीरामायणमञ्जर्याविव श्रीमद्भागवतस्य संक्षेपो 'भागवतमञ्जरी-'ति मूर्तिमदिव सहृदयहृदयाह्लादनं नवमपि प्रत्नकाव्यगुणगुम्फितमेकं मनोहरं काव्यं व्यरचि। तच्च सहसा सहसि बम्बई बृहन्मन्दिरे संमिलितेनानेन महाभागेन मुद्राप्यमाणमेव क्रमशः सर्वमपि मम हृदयस्य लोचनयोश्च गोचरः कारितम्। सर्वथाऽव्याजरमणीयमिदं काव्यमिति मे मनीषा. अत्र हि शब्दशय्या प्रासोऽक्षरमैत्री यमकः प्रसादो माधुर्यं श्लेषश्चेत्यनेके कवितास्वाभाव्यादेव राजन्तेतमाम्। प्रायोऽनुष्टुभैव विरचितेयं मञ्जरी। अथापि क्वचित्क्वचिद्भिन्नभिन्नान्यपि च्छन्दांस्यभिनिवेशितानि शोभामावहन्ति, आदर्शस्त्वेषः—

विशेषतस्तु नाहं तथासाहित्यगुणवेदीति विरमन् सर्वानेव भारतीयविद्वत्कवीनमत्सरानेकवारं विज्ञापयामि सकृदेव मञ्जरीयमाघ्रेया रसनीया चेति—

विदुषां प्रणयवशंवदो
देवर्षिभट्ट श्रीरमानाथः
मुम्बई बृहन्मान्दिरस्थ श्रीबालकृष्ण
विद्यालयाध्यापकः

भागवतमञ्जरीनामायं निबन्धः श्रीमद्भागवतसारांशाविष्कारेण भक्तिरसमभिवर्धयन् स्वस्मिन्नन्तः प्रविशतां निःश्रेयसपथं भवत्युपकारक इति प्रतिपाद्य महिमानं दैवीं संपदमभिजातः को वा न मन्येत। निबन्धस्यास्य स्वरूपे कोऽप्यतिशयः सहृदयहृदयाह्लादकः शब्दतोऽर्थतश्च माधुर्यलक्षणः काव्यरसविदः कस्य वा ह्लादाय न स्यात्। सेयं कृतिः सरलगम्भीरपदविन्यासा श्रवणमङ्गलं मधुरमधुरमर्थमाविष्कुर्वन्ती निबन्धमिमं परिशीलयितु प्रवृत्तानां नः समधिकाय समाह्लादायाऽभूत्। कविरयं वाचः समृद्धिमनेन निबन्धेन भगवदेकभोग्यामकरोदिति तु सर्वतोऽयमतिशयोऽस्य मान्यः।

श्रीरङ्गम्।
एंवार. कृष्णमाचार्यः
संस्कृतपाठशालाप्रधानपण्डितः
वडताल आनंद.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालदेशाभिजनो गौतमोपाभिधः कुलचन्द्रशर्म्मा स्वप्रणीतां भागवतमञ्जरीमस्मन्नयनगोचरतामानीतवान् । श्रीमद्भागवतसारसंकलनकौशलमवलोक्य तत्तदीयप्रयत्नाद्भगवद्भक्तानां भक्त्युद्रेकं भाविनं चाकलय्य प्रमोदमानमानसश्चिरं जीवताद्रसिकमनांसि रञ्जयन् सोऽयं प्रबन्धकर्ता च प्रबन्धश्चेति जगन्नियन्तारं शुद्धेन चेतसाऽभ्यर्थये.

(उदयपुर) श्री १०८मद्यावदार्यकुलकमल—
दिवाकर श्रीमान् फतेसिंहमहाराणा
श्रीमन्महाराजकुमार युवराज भूपालसिंह
महोदयानां कृपापात्रम्—
द्रविडः सुब्रह्मण्यशास्त्री.

श्रीद्वारकेशो जयति.

निगमकल्पतरुफलरूपश्रीमद्भागवतस्य प्रत्यध्यायप्रतिपाद्यविषयमवलम्ब्यानुष्ठितं भागवतार्थसारमालोक्य निश्चीयते यदेतत्पठनपाठनपद्धत्या झटिति भविष्यति भागवतनिगूढतत्त्वावगमः। किं च— भक्तिभावभृततया निबन्धृनिबन्धनिबद्ध्यमानाभिधेयजातस्य “ धर्मः स नो येन हरिर्न तुष्येत् ” “ स वाग्विसर्गो जनताघविप्लवः ” इत्यादिवचोभिर्जपानुष्ठानादिष्वपि सारस्यास्य गुरुरुपयोगो भवितेति संमन्ये—

श्रीवरशर्मा चतुर्वेदः
प्रधानाध्यापकः
द्वारकाधीशसंस्कृतपाठशाला.
मथुरा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

The Bhagavatamanjari is an epitome of the famous Bhagavata Purana, which has held such a sway on the devout Hindu mind for centuries. It is composed on the lines of Ksemendra's Bharatmanjari, by Pandit Gautama Kulachandra Sahityacharya, of Nepal. The author has also added a brief summary of the Bhagavata-mahatmya from the Padma Purana. This he calls the Manjariparimala.

Both the Manjari and the Parimala are written in simple yet elegant and attractive sanskrit. I believe the book is very useful and deserves encouragement from the Sanskrit-reading public.

Wilson College,
Bombay.
30-1-28.

H. D. Velankar, M. A.
Professor of Sanskrit.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुलचन्द्रगौतमकृतां
मञ्जरिकां भागवतपुराणस्य।
दृष्ट्वा मुदितस्वान्तः
श्लाघां मधुसूदनः करोत्यस्याः॥

मधुसूदन गोस्वामी
वृन्दावनम्

समञ्जरीपरिमला श्रीभागवतमञ्जरी।
कृतिना कुलचन्द्रेण प्रणीता या मनोरमा॥
सरसैर्ललितैः पद्यैर्विषयाणां निवेशनात्।
सेयं तनोति संतोषं वामाचरणशर्मणः॥

महामहोपाध्याय वामाचरणभट्टाचार्यः
राजकीयप्रधानसंस्कृतपाठशाला
काशी

श्री१०८मते हनुमते नुतिः

भगवत्पदलाभाय भगवद्भजनामृतम्।
श्रीमद्भागवतं नाम महर्षिव्यासगुम्फितम्॥
पुराणं भारते वर्षे प्रसिद्धं वर्णगोचरे।
पुराणपरिणीताभिर्धीभिर्गम्यं घनाशयम्॥
निर्मथ्य कुलचन्द्रोऽसौ क्षेमेन्द्र इव गौतमः।
तन्मञ्जरीं प्रदर्श्याग्रे स्रवत्परिमलाकुलाम्॥
मानसं कोकिलं व्यग्रं व्यधान्मुहुरहो मतिः।
विदुषां शास्त्रपूतानां वैचित्र्यच्छलना परा॥
इदानीमपि वाग्देवी राजते बुधमानसे।
हंसीव कविता जीव्यात् सा ब्रूते मुरली धरः॥

महामहोपाध्याय पं. मुरलीधरझा
काशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

श्रीमद्गौतमवंशमौक्तिकमणिप्रेष्ठप्रतिष्ठान्वित—
प्रौढप्राञ्जलवैदुषीसुकवितासाम्राज्यधूर्धारिषु ।
अस्मज्ज्येष्ठसतीर्थ्यवर्यसहजस्निग्धान्तरेषूच्चकैः
सन्तु श्रीकुलचन्द्रशर्मसु सदाऽनेके प्रणामा मम ॥

सद्वृत्ता सरसा गुणैरगणितैरन्तर्बहिः संगता
ऽलंकारैर्विविधैर्विभूषितवपुःप्रौढिप्रकर्षोदया ।
आकृष्टाखिलषट्पदैः परिमलैरुल्लासयन्ती दिशः
श्रीमद्भागवताऽमरद्रुमभवा मञ्जर्यसौ राजते ॥

द्राक्षापाकमयी यदीयकविता पीयूषसाराञ्चिता
वाग्देवीश्रवणावतंसपदवीमासादयन्ती स्थिता ।
सोऽयं श्रीकुलचन्द्रसत्कविवरः श्रद्धास्पदं नः पुन-
र्विश्वेषां विदुषां गणे परिणतप्रज्ञः कवी राजते ॥

इत्येषाऽनुजकल्पस्य श्रीनारायणशर्मणः ।
विज्ञप्तिः कुलचन्द्राणां क्षणं चेतो विनोदयेत् ॥

श्रीनारायणशास्त्री खिस्ते.
श्रीसरस्वतिभवनम्.
काशी.

ईश्वरीदत्त दौर्गादत्ति शास्त्री
एम्. ए., एम्. ओ. एल्.,
प्रिन्सिपल गवर्नमेण्ट संस्कृत कॉलेज मुजफ्फरपुर ।

श्रीमत्सु महनीयमहिमसु मनीषिमान्येषु
प्रेमप्रणयिन्यः प्रणतयः

...विमलवृत्तान्तवृन्तवर्तना भव्यभावसौरभभाविता परमानन्दमकरन्दस्यन्दिनी अलंकारालिमालोन्मीलितलालित्या विविधध्वनिगुञ्जनजनितजनमनोरञ्जना स्वाविर्भावप्रभावमात्रभवद्भवभयभञ्जना भगवद्भक्तिभास्वरभवदीयहृदयसहकारमञ्जरीयं मञ्जुलतमा भागवतमञ्जरी संस्कृतसाहित्यकेलिकाननं मञ्जुतामुदञ्चयन्ती सचेतसां चेतांसि चिरतरं चमत्करिष्यतीति. आशासानः

भवदीयः—ईश्वरीदत्तदौर्गादत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवेदनम्-

[१] कृष्णद्वैपायनोद्भूतं कैवल्योपायगर्भितम् ।
धार्मिकः को न जानाति श्रीमद्भागवतं सुधीः ॥

[२] दोग्धि पारमहंसीं गामेतां स्वर्गपराङ्मुखः ।
वर्गः परमहंसानामनिरुद्धमनोरथः ॥

[३] चक्षुर्युग्मं पुनीते नः स च वर्गो मनीषिणाम् ।
बुद्धिं यदीयामध्यास्ते व्यक्ता व्याससरस्वती ॥

[४] श्रुतावदातमतिभिः परोपकृतिकर्मभिः ।
भगवच्चरणद्वन्द्वश्रद्धासाधितशर्मभिः- ॥

[५] सद्भिरेतद्वर्गयुगान्तर्गतैरेव कैश्चन ।
अयुक्तोऽपि नियुक्तः सञ्जातोऽस्मि कृतसाहसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[६] अजानाना अपि व्यक्तं श्रद्धासंसक्तचेतसः ।
उत्कण्ठमानाः शृण्वन्ति श्रीमद्भागवतं जनाः ॥
[७] बद्धाञ्जलि प्रेर्यमाणाः श्रद्धावद्भिर्मुहुर्मुहुः ।
अल्पश्रुताः श्रावयितुं प्रवर्तन्ते च मानवाः ॥
[८] यथाकथंचित्केचिच्च टीकादिकृतयोजनाः ।
पठन्त्येव प्रतिदिनं श्रीमद्भागवतं जनाः ॥
[९] कृतप्रयत्नातिशयैरप्येतैस्त्रिविधैर्जनैः ।
दुर्दोहा दुर्ग्रहपदा मुनेर्द्वैपायनस्य गौः ॥
[१०] शुश्रूषमाणस्य सततस्तानेतान् पुण्यकर्मणः ।
मम प्रयत्नः स्यादेव प्रत्नविद्वज्जनप्रियः ॥
[११] गृहीत्वाऽगूढमेवार्थं प्रणीत इति धीमताम् ।
स्यान्मञ्जरीपरिमलः सतां श्रद्धासमृद्धये ॥
[१२] ममेमां मुहुरभ्यस्य मञ्जरीं वर्तनीमिव ।
रथ्येवाऽजातसंतोषैर्व्यासगाथाऽवगाह्यताम् ॥
[१३] असिद्धोद्दिष्टभावापि भगवत्कीर्तिभूषिता ।
अभीष्टा शिष्टवर्गस्य जायेत मम भारती ॥
[१४] उत्साहयन् भागवते व्युत्पित्सून् धार्मिकाञ्जनान् ।
अंशतोऽपि व्रजेदेव सफलत्वं मम श्रमः ॥
[१५] गलेपतितत्तां याते प्रबन्धयुगले मम ।
विपश्चिदिव संतुष्येद् विपश्चिदिति निश्चितम् ॥
[१६] सप्ताहोक्तिषु सन्दर्भसंक्षेपमपि काङ्क्षताम् ।
प्रबन्धोऽयं ध्रुवं यायात्सतामादरणीयताम् ॥
[१७] सद्यःप्रणीतौ सावद्यलेखौ शैशवतः सखा ।
विद्याविद्योतितस्वान्तः सौजन्यातिशयाश्रयः ॥
[१८] गुणानुरागिणा राज्ञा पदमुच्चैरवापितः ।
दीक्षितः श्रीराममणिर्ग्रन्थौ वीक्षितवान् मम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१९] श्रेयःसमाहितमतेर्विद्वद्वृन्दकृतस्तुतेः ।
अनुरुन्धन् वचस्तस्य ग्रन्थद्वन्द्वमसुद्रयम् ॥

[२०] अबोधानवधानाभ्यां स्खलतोऽपि सतः खलु ।
भवेन्नेदीयसी सत्सु नतमौलेर्मम क्षमा ॥

[२१] शुद्धिपत्रे दत्तदृष्टिर्दोषान् मुद्रणजन्मनः ।
प्रमार्ज्य तोषादध्येतुमत्र सज्जतु सज्जनः ॥

[२२] चित्रैरनतिरम्यैश्च यथालब्धि निवेशितैः ।
प्रसादं यान्तु भगवन्नतिरम्यैर्मनीषिणः ॥

विनीतस्य हिमवत्प्रान्तवासिनः—
गौतमोपाभिधानस्य
कुलचन्द्रस्य,

(मङ्गलम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूचनपत्रिका ।

मञ्जरीपरिमले—

विषयः-	पृष्ठे.
नारदतीर्थयात्रा	३
कलिकदर्थितक्षितिदशा	५
भक्त्यादिदर्शनम्	६
भक्तिनारदसंवादः	८
भक्तिसमाश्वासनम्	९
भक्तिप्रशंसा	१२
ज्ञानवैराग्ययोरप्रबोधः	१३
सनकादिदर्शनम्	१३
भक्त्यादिदशावर्णनम्	१४
कुमारकृतकार्यनिर्णयः	१६
गङ्गाद्वारे कथाप्रसङ्गः	१८
कथारम्भः	१८
भागवतप्रशंसा	२०
सप्ताहप्रशंसा	२१
भक्तेराविर्भावः	२२
भगवद्भक्तेषु भक्तिप्रवेशः	२२
भगवद्दर्शनम्	२३
भगवद्वन्दनम्	२४
सप्ताहप्रभावः	२५
यतिविप्र-(आत्मदेव-)-संवादः	२९
धुन्धुलीदुर्विमर्शः	३१
धुन्धुकारिदुराचाराः	३३
आत्मदेवोपदेशः	३५
धुन्धुलीपश्चात्तापः	३८
धुन्धुकारिदुर्मरणम्	३९
धुन्धकारिप्रेतदशा	४०
प्रेतोद्धारमीमांसा	४२
प्रेतोद्धारः सप्ताहतः	४३
प्रेत-(धुन्धकारि)-सौभगम्	४४
भगवद्भृत्यभाषितम्	४५
पुनर्गोकर्णसप्ताहः	४६
सप्ताहविधिः	५१
सनकादीनां सप्ताहसमाप्तिः	५२
दशावतारस्तवः (सव्याख्यः)	५७
नारदप्रमोदः	५८
शुकाभिसरणम्	५८
भागवतप्ररोचना	५८
हरेराविर्भावः	५९
हरिकीर्तनोपक्रमः	५९
शुककृतहरिकीर्तनारम्भः	६०
हरिकीर्तनस्तवः (सव्याख्यः)	६४
भगवदादिनिर्गमः	६४
भागवतसेवनं श्रेयः	६६
परीक्षित्सप्ताहश्रवणकालः	६७
गोकर्णकथाकथनकालः	६७
कुमारसप्ताहवाचनकालः	६७
परिमलोपसंहारः	६८

(इति)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जर्याम्—

विषयः—	पृष्ठे.
प्रथमस्कन्धे—	
षट् प्रश्नाः	१
चतुर्णामुत्तरम्	२
द्वयोरुत्तरम्	२
व्यासापरितोषो नारदागमश्च	३
नारदोपदेशः	३
नारदवृत्तम्	४
द्रौणिनिग्रहः	४
उत्तरागर्भजीवनं धर्मराजानुतापश्च	५
भीष्मनिर्याणम्	५
भगवत्प्रस्थानम्	६
भगवतो द्वारकाप्रवेशः	६
परीक्षिज्जन्म	७
धृतराष्ट्रनिर्गमः	७
अर्जुनप्रत्यागमनम्	८
पाण्डवनिर्याणम्	८
परीक्षिद्दिग्विजययात्रा	९
कलिनिग्रहः	९
शृङ्गिशापः	१०
परीक्षित्प्रायोपवेशः शुकागमश्च	१०
द्वितीयस्कन्धे—	
शुकोपदेशे वैराजधारणा	१२
” उत्क्रान्तिरीतिः	१३
भगवद्भजनं सर्वधर्मः	१३
भागवतोपक्रमः	१३
ब्रह्मनारदसंवादे सृष्टिक्रमः	१४
श्रुत्यनुगुणा विराड्विभूतिः	१५
अवतारानुचरितम्	१५

विषयः—	पृष्ठे.
परीक्षित्प्रश्नाः	१५
ब्रह्मणे भागवतोपदेशः	१६
तृतीयस्कन्धे—	
विदुरोद्धवसंगमः	१८
उद्धवकृता भगवच्चर्चा	१८
भगवच्चरितशेषचर्चा	१८
उद्धवनिर्गमः क्षत्तृमैत्रेयसंगमश्च	१९
क्षत्तृमैत्रेयसंवादः	१९
सृष्ट्युपक्रमः	२०
विदुरप्रश्नोत्तराणि	२१
ब्रह्मतपश्चर्या भगवद्दर्शनं च	२१
भगवदादेशः	२१
संक्षिप्ता सृष्टिः	२३
कालप्रपञ्चः	२४
सृष्टिप्रपञ्चः	२५
वराहाविर्भावः	२५
हिरण्याक्षोपाख्यानम्	२६
द्वारपालयोः शापः	२६
देवाऽऽश्वासः	२७
हिरण्याक्षविजयः	२७
वराहहिरण्याक्षयुद्धम्	२७
हिरण्याक्षवधः	२८
विविधा सृष्टिः	२९
कर्दमचर्य्या	२९
देवहूतिपरिणयः	२९
कर्दमगार्हस्थ्यम्	३०
कपिलोत्पत्तिः	३०
देवहूत्यै कपिलोपदेशः	३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः—	पृष्ठे.
सांख्योपदेशः	३२
साधनोपदेशः	३३
ध्यानयोगोपदेशः	३४
भक्तिभेदाः	३४
सांसारिकी गतिः	३५
संसरणमविरतम्	३५
कर्तव्योपदेशः	३६
देवहूतिनिर्वाणम्	३६
चतुर्थस्कन्धे—	
प्रतिसर्गवर्णनोपक्रमः	३७
भवदक्षविद्वेषः	३९
सतीप्रबोधः	३९
सतीदेहोत्सर्गः	३९
दक्षमखविध्वंसः	४०
भवप्रसादनम्	४०
मखसन्धानम्	४१
ध्रुवोपाख्यानम्	४३
ध्रुवतपस्सिद्धिः	४३
ध्रुवगुह्यकयुद्धम्	४३
ध्रुवविजयः	४४
ध्रुवस्य ध्रुवलोकप्राप्तिः	४४
अङ्गराजनिर्गमः	४४
वेनोपाख्यानम्	४५
पृथूत्पत्तिः	४५
पृथुप्रशंसा	४६
पृथुविजयः	४६
पृथ्वीदोहः	४६
पृथुहयमेधः	४७
पृथोरनुग्रहः	४८
पृथुशासनम्	४८

विषयः—	पृष्ठे.
पृथवे कुमारोपदेशः	४९
पृथुनिर्याणम्	५०
पृथुवंशः	५०
पुरञ्जनोपाख्याने संसृतिदशा	५१
,, स्वप्नदशा	५२
,, वार्धक्यदशा	५३
,, संसरणं प्रबोधश्च	५५
प्राचीनबर्हिषः प्रबोधः	५६
प्रचेतउपाख्यानम्	५६
प्रचेतसां निर्वाणम्	५६
पञ्चमस्कन्धे—	
प्रियव्रतविजयः	५८
आग्नीध्रचरितम्	५९
ऋषभोत्पत्तिः	५९
ऋषभोपाख्यानम्	६०
ऋषभव्याख्यानम्	६१
ऋषभचर्या	६१
भरतस्य तपश्चर्या	६१
,, मृगभावः	६२
,, विप्रत्वे वधप्रसङ्गः	६३
भरतरहूगणसंवादः	६४
प्रपञ्चमिथ्यात्वम्	६४
भक्तेर्मुक्तिद्वारता	६५
भवाटवी	६६
भरतवंशः	६६
जम्बूद्वीपादिस्थितिः	६७
भद्राश्वादिवर्षाणि	६८
किंपुरुषभारतवर्षे	६८
शिष्टाः षड् द्वीपाः	६९
रविगतिः	६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः—	पृष्ठे.
अधोलोकाः	७०
शेषप्रशंसा	७०
षष्ठस्कन्धे—	
अजामिलकथा	७२
अजामिलोद्धारः	७२
भगवन्नाममहिमा	७३
प्राचेतसचरितम्	७४
हर्यश्वशबलाश्वचरितम्	७५
दक्षकन्यावंशः	७६
विश्वरूपचरितम्	७६
नारायणवर्मविद्या	७६
विश्वरूपवधः वृत्रोत्पत्तिश्च	७७
देवासुरयुद्धम्	७७
इन्द्रवृत्रसंवादः	७८
वृत्रवधः	७८
ब्रह्महत्यावृत्तान्तः	७९
चित्रकेतूपाख्यानम्	८०
चित्रकेतुप्रबोधः	८१
चित्रकेतुसिद्धिः	८२
चित्रकेतुशापः	८३
मरुदुपाख्यानम्	८३
सप्तमस्कन्धे—	
युधिष्ठिरनारदसंवादः	८५
दितिसान्त्वनम्	८६
हिरण्यकशिपुतपश्चर्या	८६
प्रह्लादचरितम्	८८
दैत्यबालकोपदेशः	८८–८९
हिरण्यकशिपुवधः	९०
नृसिंहस्तुतिः	९०

विषयः—	पृष्ठे.
प्रह्लादानुग्रहः	९१
वर्णाश्रमधर्माः	९१
ब्रह्मचारिवनस्थधर्माः	९२
यतिधर्माः	९३
गृहस्थधर्माः	९३
साधारणधर्माः	९३
अष्टमस्कन्धे—	
मन्वन्तरवर्णने चत्वारो मनवः	९४
गजेन्द्रोपाख्यानम्	९५
गजेन्द्रोद्धारः	९५
गजग्राहयोर्वृत्तम्	९५
पञ्चमषष्ठौ मनू	९५
समुद्रमथनोपक्रमः	९६
हालाहलोत्पत्तिः	९६
मोहिनीप्रादुर्भावः	९७
अमृतपानम्	९७
देवासुरयुद्धम्	९८
युद्धोपरमः	९८
शङ्करमोहनम्	९८
सप्तमाद्या अष्टौ मनवः	१००
बलिविजयः	१००
वामनावतारोपक्रमः	१०१
वामनचरितम्	१०१
वामनभिक्षणम्	१०१
त्रिविक्रमाविर्भावः	१०१
बलिबन्धनम्	१०२
बलेरनुग्रहः	१०२
शक्रस्य स्वाराज्यलाभः	१०२
मीनावतारः	१०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः—	पृष्ठे.
नवमस्कन्धे—	
इलोपाख्यानम्	१०४
मनुपुत्रवृत्तम्	१०५
सौकन्यं रैवतं चोपाख्यानम्	१०६
अम्बरीषचरितम्	१०७
दुर्वासोऽनुग्रहः	१०८
विकुक्षि–पुरञ्जय–युवनाश्व –मान्धातृचरितम्	१०९
हरिश्चन्द्रचरितम्	११०
सगरचरितम्	११०
भगीरथचरितम्	१११
सौदासचरितम्	११२
खट्वाङ्गचरितम्	११२
श्रीरामपूर्वचरितम	११३
श्रीरामोत्तरचरितम्	११३
निमिकथा	११४
ताराचरितम्	११५
पुरूरवश्चरितम्	११५
जामदग्न्यकथा	११५
जामदग्न्यावदानम्	११६
क्षत्रवृद्धादिकथा	११७
ययातिचरितम्	११८
ययातिनिर्वेदः	११९
शाकुन्तलेयचरितम्	१२०
रन्तिदेवचरितम्	१२१
सोमवंशवृत्तम्	१२२
द्रुह्युप्रभृतिवंशः	१२३
यदुवंशसंक्षेपः	१२५
दशमस्कन्धे—	
कृष्णावतारोपक्रमः	१२६

विषयः—	पृष्ठे.
गर्भगतभगवत्स्तुतिः	१२७
कृष्णजन्म	१२७
कंसभीतिः	१२७
वसुदेवनन्दसंगमः	१२८
पूतनाप्राणपयःपानम्	१२८
शकटभञ्जनं तृणावर्तदलनं विश्वरूपदर्शनं च	१२९
मृद्भक्षणम्	१२९
दाम्ना बन्धनम्	१३१
नलकूबरमणिग्रीवोद्धारः	१३१
वत्सबकवधः	१३१
अघासुरवधः	१३२
विधिविमोहनम्	१३३
कृष्णस्तुतिः	१३४
गोचारणम	१३४
धेनुकवधः	१३४
कालियनिग्रहः	१३५
दावाग्निपानम्	१३६
प्रलम्बवधः	१३७
दावाग्निपानम्	१३७
वर्षाशरच्चर्चा	१३७
वेणुवर्णनम्	१३८
चैलचौर्यम्	१३९
विप्रपत्न्यनुग्रहः	१३९
इन्द्रमखभङ्गः	१४०
गोवर्धनोद्धरणम्	१४०
भगवदवदानगानम्	१४१
इन्द्रानुग्रहः कृष्णाभिषेकश्च	१४१
नन्दानयनं वैकुण्ठदर्शनं च	१४२
वेणुवादनम्	१४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः—	पृष्ठे.
गोपीवृन्दगोविन्दसंलापः	१४३
रमणमन्तर्धानं च	१४३
भगवतोऽन्वेषणम्	१४३
गोपीगीतम्	१४४
भगवत्प्राप्तिः	१४५
रासविलासः	१४६
नन्दमोचनं शङ्खचूडवधश्च	१४६
गोपीयुगलगीतम्	१४७
अरिष्टवधः	१४८
केशिवधः नारदागमः व्योमवधश्च	१४९
अक्रूरागमनम्	१४९
अक्रूरस्य जले भगवद्दर्शनम्	१४९
भगवत्स्तुतिः	१५०
रजकवधः सुदाम्नोऽनुग्रहश्च	१५०
धनुर्भङ्गः	१५१
कुवलयापीडवधः	१५२
मल्लानां कंसस्य च वधः	१५२
भगवतोर्गुरुकुलवासः	१५३
उद्धवस्य व्रजे गमनम्	१५४
नन्दादिसान्त्वना	१५४
कुब्जानुग्रहः अक्रूरप्रेषणं च	१५५
अक्रूरप्रत्यागमः	१५५
जरासन्धसैन्यवधः	१५७
कालयवनवधः	१५७
जरासन्धप्रतारणा	१५८
रुक्मिणीपत्रिकागमः	१५८
रुक्मिणीहरणम्	१५९
रुक्मिदण्डनम्	१६०
प्रद्युम्नप्राप्तिः	१६१
स्यमन्तकोपाख्यानम्	१६२
शतधन्ववधः	१६३
कालिन्द्यादिपरिणयः	१६४
भौमवधः पारिजातहरणं च	१६४
रुक्मिणीपरिहासः	१६५
रुक्मिवधः	१६६
अनिरुद्धनिरोधः	१६७
बाणविजयः	१६८
नृगोद्धारः	१६९
कालिन्दीकर्षणम्	१७०
पौण्ड्रकवधः	१७१
द्विविदवानरवधः	१७२
हस्तिनापुरकर्षणम्	१७३
प्रतिगृहं कृष्णदर्शनम्	१७३
राजदूतागमः	१७३
नारदागमः	१७३
मन्त्रणम्	१७४
भगवत इन्द्रप्रस्थगमनम्	१७४
जरासन्धवधः	१७६
जरासन्धपुरात्प्रत्यागमः	१७६
चैद्यवधः क्रतुसमाप्तिश्च	१७७
दुर्योधनमानभञ्जनम्	१७८
शाल्वयुद्धे प्रद्युम्नमूर्च्छा	१७८
शाल्ववधः	१७९
दन्तवक्त्रवधः	१७९
विदूरथवधः	१८०
सूतवधः	१८०
रामतीर्थयात्रा	१८०
श्रीदामागमः	१८१
श्रीदामानुग्रहः	१८२
कुरुक्षेत्रे संमेलनम्	१८३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः—	पृष्ठे.
द्रौपदीरुक्मिण्यादिसंवादः	१८३
वसुदेवकृतो विष्णुयागः	१८४
मृताग्रजानयनम्	१८५
सुभद्राहरणं श्रुतदेवाद्यनुग्रहश्च	१८५
वेदस्तुतिः	१८८
वृकासुरवधः	१९०
विष्णुपरीक्षा	१९०
अर्जुनपौरुषपरीक्षा	१९१
द्विजपुत्रानयनम्	१९१
श्रीकृष्णवैभवम्	१९२
एकादशस्कन्धे—	
द्विजशापः	१९४
वसुदेवनारदसंवादः	१९४
अन्तरिक्षाद्युक्तिः	१९५
द्रुमिलोक्ता हरेरवताराः	१९६
चमसकरभाजनोक्तयः	१९७
उद्धवप्रार्थना	१९८
अष्टौ दत्तगुरवः	२००
दत्तस्याजगराद्या गुरवः	२०१
,, कुरराद्याः सप्त गुरवः	२०२
विद्यैव प्रपञ्चं बाधते	२०२
भक्तेः परमं पदं लभ्यते	२०३
संसारतरुर्विद्याकुठारेण छेद्यः	२०४
आत्मा सर्वसाक्षी शुद्धः	२०६
भक्तेरेवात्मा शुद्ध्यति	२०७
भक्तस्य सिद्धयोऽन्तरायाः	२०७
भगवद्विभूतयः	२०७
ब्रह्मचारिगृहस्थयोर्धर्माः	२०८
वानप्रस्थयतिधर्माः	२०८

विषयः—	पृष्ठे.
द्वैतदृष्टिर्दोषः	२०९
ज्ञानादियोगाधिकारिणः	२०९
वेदान्ततात्पर्यम्	२१०
तत्त्वसमन्वयः पुंप्रधानविवेकः	२११
भिक्षुगीतम्	२१२
तत्त्वाविर्भावतिरोभावौ	२१२
गुणानां वृत्तयः	२१३
एलगीतम्	२१४
आराधनविधानम्	२१४
योगचर्या	२१६
उद्धवोद्धारः	२१७
यदुकुलसंक्षयः	२१९
भगवन्निर्याणम्	२१९
द्वादशस्कन्धे—	
भविष्यत्कथनम्	२२०
कलिदशा	२२१
रागनिरासः	२२२
चतुर्विधः प्रलयः	२२२
परीक्षित्प्रबोधनम्	२२३
परीक्षिन्मुक्तिः	२२३
वेदत्रयविभागः	२२४
अथर्वपुराणविभागः	२२४
मार्कण्डेयतपश्चर्या	२२५
मायावलोकनम्	२२६
मार्कंडेयानुग्रहः	२२७
आदित्यव्यूहः	२२८
भगवद्भजनं श्रेयःपद्धतिः	२२९
पुराणप्रशस्तिः	२३०
ग्रन्थान्तमङ्गलम्	२३०

इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धिपत्रम् ।

मञ्जरीपरिमले—

पृष्ठे	पङ्क्तौ	अशुद्धिः	शुद्धिः
५	७	श्रती	श्रुती
५	२२	क्षिप्तौऽर्थ	क्षिप्तोऽर्थः
१३	२३	रुध्वा	रुद्ध्वा
२०	५	मने !	मुने !
२७	११	व्याकला	व्याकुला
३०	१४	शक्नयाम्	शक्नुयाम्
४४	१७	श्रवण	श्रवणं
४४	२१	हेताः	हेतोः
४५	१५	ययुवष्ण	ययुर्वैष्ण
५२	२१	मनिरु	मीनरु
५३	२	कर्षाद	कर्षाद्
५३	११	देवषु	देवेषु
६३	१	बीजता	बीजता-

भागवतमञ्जर्याम्—

पृष्ठे	पङ्क्तौ	अशुद्धिः	शुद्धिः
८	५	तर्कर्यन्	तर्कयन्
१७	४	ताक्ष्यवा	तार्क्ष्यवा
१९	२६	क्षातृमैत्रे	क्षत्तृमैत्रे
२२	९	तृर्तीयक	तृतीयक
२५	२३	पगतां	पनतां
२७	१५	निजगामे	निर्जगामे
२७	१८	शश्राव	शुश्राव
२९	१५	तंमृर्षि	तमृषिं
३०	१४	मुमक्षां	मुमुक्षां
३१	७	बन्धस्तस्यै	बन्धस्तस्य
३३	१२	नियभाः	नियमाः
४०	२६	कुटुम्बेपु	कुटुम्बेषु
४२	९	मोन	मौन
४३	२१	ध्रवभ्राता	ध्रुवभ्राता
४४	१५	गति	गतिम्
४५	१७	।थ	अथ
६५	१४	षङ्गर्ग	षड्वर्ग
१०७	२५	अम्बरी	अम्बरीष
१०९	१	गच्छ द	गच्छद्रुद
११८	१५	मतिनवा	मतिर्नैवा
१३८	१४	वेणुनवर्णन	वेणुवर्णन
१८६	२१	मेशषं	मशेषं
१९१	२३	श्रीक्रुष्ण	श्रीकृष्ण
१९५	१९	सिद्धेनिर्भि	सिद्धेर्निर्भि
१९६	९	कूमा	कूर्मौ
२०५	१२	मद्रप	मद्रूप

इति दोषा अद्य दृष्टाः केचनाऽत्र प्रदर्शिताः ।
क्षमैवाऽतोऽतिरिक्तेषु प्रार्थ्यते सूक्ष्मचक्षुषाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरे तावन्निर्जराः सन्तु, वन्दे वर्षीयांसं सन्तमेतं पुमांसम् ।
श्रुत्या यस्य द्योतते क्ष्मामथ द्यां खद्योतोऽपि द्योतयन्नद्वितीयः ॥

Tricolor blocks made & printed at
The "Gujarati" Printing Press, Fort, Bombay 1.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मङ्गलम्

[illegible] प्रवर्तकम् ।
[illegible] देवं नारायणमुपास्महे ॥ १ ॥
[illegible] भावेन बदरीवनगोचरम् ।
[illegible] तं तपोऽम्बुधुरन्धरम् ॥ २ ॥
[illegible] च वर्तमानं च सर्वतः ।
यदीयपदभाग्योऽपि वाग्देवीं तां भजेमहि ॥ ३ ॥
[illegible] दयया यस्य दीर्घया ।
बद्धाञ्जलि मुनिं व्यासं तं पुरुषार्थप्रदं नुमः ॥ ४ ॥
[illegible] पुराणेऽत्र चातुर्याय समुत्सुकाः ।
[illegible] चेतसाऽभ्यर्थयामहि ॥ ५ ॥
[illegible] ऽस्मिन् [illegible] ।
[illegible] ॥ ६ ॥
[illegible] ।
[illegible] ॥ ७ ॥

इति

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Tricolor Blocks made & printed at

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९८६ जनक
रा ५

॥ श्रीः ॥

मङ्गलम्

चिद्धीचीनां चारुतया वर्तमानं प्रवर्तकम् ।
साराङ्घ्रिसेवनं देवं नारायणमुपास्महे ॥ १ ॥
मन्देतरेण भावेन बदरीवनगोचरम् ।
अभिवन्देमहि नरं तपोधनधुरन्धरम् ॥ २ ॥
अनागतमतीतं च वर्तमानं च सर्वतः ।
यदीयपदभाग्वेत्ति वाग्देवीं तां भजेमहि ॥ ३ ॥
अद्धा ज्ञेयं पुरावृत्तं दयया यस्य दीर्घया ।
बद्धाञ्जलि मुनिं व्यासं तं पुमर्थप्रदं नुमः ॥ ४ ॥
प्राचुर्यतः पुराणेऽत्र चातुर्याय समुत्सुकाः ।
शुकाचार्यं धीरधुर्यं चेतसाऽभ्यर्चयेमहि ॥ ५ ॥
कृतार्तिभङ्गे भविनां प्रसङ्गेऽस्मिन् समागता ।
सार्धं धुनीभिरन्याभिर्देवि ! गङ्गे ! पुनीहि नः ॥ ६ ॥
अनधीती विरसगीरबोधहतधीरपि ।
यद्वक्ति भक्तिचपलः क्षमतां तदधोक्षजः ॥ ७ ॥

इति
हरये नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमते पुराणपुरुषोत्तमाय नमः ।

मञ्जरीपरिमलः ।

श्रेयः किं श्रेयसामत्र तद्वदेति महर्षिणा ।
शौनकेन पुरा पृष्टः सूत एवमवोचत ॥ १ ॥
बभ्राम नारदो नाम कदाचन महामुनिः ।
क्षोणीतलं समासाद्य तीर्थश्रेणिदिदृक्षया ॥ २ ॥
विश्वविश्रुतमाहात्म्यं ब्रह्मणा समधिष्ठितम् ।
तीर्थानामादिमं तीर्थं नाम्ना पुष्करमाप सः ॥ ३ ॥
एनसामपहर्त्रीणां सरितां त्रितयेन सः ।
पवित्रितमहीभागं प्रयागं प्रययौ ततः ॥ ४ ॥
अथ श्रुतिस्मृतिशतप्रशंसितगुणोदयाम् ।
स प्रेयसीं पुरारातेः पुरीं वाराणसीं ययौ ॥ ५ ॥
ततः श्रेयस्ततिकरीं नतिकर्तुः शरीरिणः ।
धुनीं गोदावरीं धन्यां स जगाम मुनीश्वरः ॥ ६ ॥
नारायण्या तरङ्गिण्या गङ्गासङ्गतया ततः ।
पवित्रितं हरिक्षेत्रं स चक्रे नेत्रगोचरम् ॥ ७ ॥
अंहसामन्तकरणमन्तःकरणपावनम् ।
गुरुख्याति कुरुक्षेत्रं प्रयाति स्म ततो मुनिः ॥ ८ ॥
तस्मात्तरलकावेरीतरङ्गशिशिरानिलम् ।
श्रीरङ्गधाम जगति ख्यातनाम जगाम सः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः स सुकृतं चेतुं नेतुं सफलतां जनुः ।
भवाब्धितरणे हेतुं सेतुं दाशरथेर्ययौ ॥ १० ॥

नारदतीर्थयात्रा ।

इति दृग्गोचरीकुर्वन्नुर्वीतीर्थपरम्पराम् ।
सोऽभीष्टां क्वापि नावाप प्रशान्तिं मनसः पराम् ॥ ११ ॥
हतश्रियं निरानन्दां साक्रन्दामिव सर्वतः ।
इलामपश्यदखिलां कलिना मलिनां मुनिः ॥ १२ ॥
[1]अनिर्वर्ण्यसमाकीर्णचातुर्वर्ण्यव्यवस्थिति ।
प्राचीनचातुराश्रम्यवैषम्यप्राप्तदुर्गति ॥ १३ ॥
दयादाक्षिण्यराहित्यदुःखिताऽऽकुलितप्रजम् ।
शौचसत्यपरित्यागसाशङ्कमनुजव्रजम् ॥ १४ ॥
मुनिर्भूतलमालोक्य व्याकुलः सन्नितस्ततः ।
अधैर्यः पर्यटन्नासीदसन्तुष्टेन चेतसा ॥ १५ ॥
सत्सु वृद्धेषु गुरुषु गृहेषु गृहिणाऽर्पिताम् ।
तरुण्याः प्रभुतां प्रेक्ष्य विलक्षत्वं[2] जगाम सः ॥ १६ ॥
बहुश्रुतेषु वृद्धेषु सत्स्वपि श्यालकं प्रियम् ।
जनानां बुद्धिदातारं पश्यन्नेष विसिष्मिये ॥ १७ ॥
अन्यायार्जितसंपत्तीन् कन्याविक्रयकारिणः ।
अधन्यान् वीक्ष्य स मुनिर्मन्यां[3] चक्रे विवर्तिताम् ॥ १८ ॥
अन्योन्यदुर्गुणव्यूहव्याख्यानविलसन्मती ।
ददर्श दर्शितगती प्रतिगेहं स दम्पती ॥ १९ ॥
पुनस्तीर्थानि संपश्यन्ननार्यैरार्यमानिभिः ।
सोऽधिष्ठितानि दुर्वृत्तैराधिना बाधितोऽजनि ॥ २० ॥

(१) त्रिभिर्विशेषकम्. (२) विलक्षत्वं साश्चर्यताम्,—विलक्षो विस्मयान्वित इत्यमरः । (३) मन्यां ग्रीवां विवर्तितां परावर्तितां (वीक्षणाक्षमत्वेन तिरश्चीनतां नीताम्) पश्चाद्ग्रीवाशिरा मन्येत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यक्तयोगं गुप्तभोगं कृतकाञ्चनवञ्चनम् ।
धिग्धिक्चकार शतशः स पश्यन् योगिनं[1] जनम् ॥ २१ ॥
ब्रह्मनिष्ठम्मन्यतया समुत्सृष्टोचितक्रियान् ।
आखिद्यत मुनिः पश्यन्नविद्यान्[2] पामरप्रियान् ॥ २२ ॥
[3] पिशिताऽसात्म्यताज्ञानवत्तया [4] त्यक्तहिंसनान् ।
साशङ्कजनसंकीर्णतया [5] स्तेयविवर्जकान् ॥ २३ ॥
अप्राप्तस्त्रीजनतया [6] ब्रह्मचर्यपरायणान् ।
अनर्हतायुक्ततया प्रतिग्रहपराङ्मुखान् ॥ २४ ॥
धनाधिकतया सभ्यान् सशृङ्गारतया शुचीन् ।
वावदूकतया[7] प्राज्ञान् सूत्रधारितया द्विजान् ॥ २५ ॥

---

(१) "स धन्यो नारदमुनिर्योगिराजत्वमागतम् ।
कर्मणा परिचिन्वानो जगर्हे दिव्यदर्शनः " इति भावः ।

निन्दायां द्योतनीयायां योगशब्दान्मत्वर्थीय इनिः । ततश्च यावानर्थः प्रतीयते विदग्धैर्वैयाकरणधुरीणैस्तावान् सर्वोऽप्यर्थः स्वयमेव निमीलितलोचनैर्मुहुर्मुहुर्मननीयः । न पुनरसौ प्रकाशनीयः । मा खलु मर्माहताः समदृष्टयो नाम कलिकालयोगिनः प्रकुप्य शापं दुः ।

(२) "सांसारिकसुखाऽऽसक्तं ब्रह्मज्ञोऽस्मीति वादिनम् ।
कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा ।"

इति वैयासिकीमुक्तिमनुरुन्धाना वयं च नोपालम्भविषयतां लम्भनीयाः ।

(३) इतः पञ्चमे पद्ये वर्तमानेन 'आलुलोके' इतिक्रियापदेन सर्वेषां द्वितीयान्तपदानां सम्बन्धः । 'इत्थम्भूतलक्षणे' इत्यनुशासनसिद्धानां तृतीयान्तपदानां च तेषु तेषु कर्मपदेषु लक्षकत्वेनान्वयः ।

(४) " पिशितं मांसमसात्म्यं प्रकृतिप्रतिकूलं व्याधिजनकमिति यावत्" इत्याकारकज्ञानवत्तयैव हिंसाविमुखान्, न त्वहिंसाव्रतसश्रद्धतया ।

(५) साशङ्कानां चोरचातुरीदत्तचित्तानां जनानां संकीर्णतया सर्वतः प्रसृततयैव न त्वस्तेयव्रततत्परतया ।

(६) अलब्धनारीजनतयैव त्यक्तमैथुनान्, न पुनर्व्रतरसिकतया ।

(७) वावदूकतया अतिवक्तृतया 'वावदूकोऽति वक्तरि' इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धृष्णक्तया[1] सत्यवक्तॄनसमर्थतया मृदून् ।
साडम्बरतया साधून् कर्णेजपतया[2] प्रियान् ॥ २६ ॥

कुक्षिम्भरितया दक्षान् निर्मर्यादतया सतः ।
आलुलोके स विरसाँल्लोकान् कलिमलीमसान् ॥ २७ ॥

आनीचमाद्द्विजाधीशं पश्यन् सोऽन्नस्य विक्रयम् ।
अव्यवस्थं कलिं निन्दन् प्रशशंस युगत्रयम् ॥ २८ ॥

(क) अश्रुतस्मृतिवाक्यानां श्रुतीर्विक्रीय जीवताम् ।
अबाध्यमेव बाधिर्यं द्विजातीनामबुद्ध सः ॥ २९ ॥

(ख) स्त्रीणां व्याकृतरूपाणामनादेशविधायिताम् ।
पश्यन् मेने स्वतः पत्युरघितां स विचक्षणः ॥ ३० ॥

कलिकदर्थितक्षितिदशा ।

इति क्षोदीयसीं चक्षुःखेददात्रीं क्षितेर्दशाम् ।
पश्यन्नधीरधीस्तीरं प्रययौ यामुनं मुनिः ॥ ३१ ॥

---

(१) धृष्णक्तया धृष्टतया–'धृष्टे धृष्णग्वियातश्च' इति ।

(२) कर्णेजपः सूचकः स्यात्' इति चामरः ।

(क) श्रुतिविक्रयं निषेधन्तीः स्मृतीरश्रुतवतां श्रुतीः (वेदान् श्रवांसि च) विक्रीय कृतजीविकानां द्विजातीनां बाधिर्यमबाध्यमेव बोद्धव्यमिति भावः । "पङ्ग्वन्धप्रभृतय इव बधिरा अपि यथाकथंचित्कृतजीविका नोपहसनीयाः" इत्युपहासपर्यवसायी व्यङ्ग्योर्थः श्रुतिविक्रयप्रतिपादनात्समुल्लसति ।

(ख) स्वस्त्रियं नियन्तुमक्षमः पुमान्नूनमसंयतत्वादिना स्वयं कृतपापः (अघी) । उचिता चेयं प्रकटितरूपाणां तदीयानां स्त्रीणामनादेशविधायिता (आज्ञानुवर्तनाभावः) इति नारदोऽमन्यत. इति संक्षिप्तोऽर्थः ।

व्याकृतरूपाणां (व्याकरणरूपाणां–कृततत्तदादेशानामिति विदग्धबुद्धिवेद्योऽर्थः) स्त्रीणाम्–'आङो नाऽस्त्रियाम्' इतिसूत्रविधीयमाननादेशाऽविधायितां पश्यन् विचक्षणो मुनिः स्वतः पत्युः (असमस्तस्य पतिशब्दस्य) अघितां (घिसंज्ञाराहित्यं) मेने । "समास एव पतिर्घिसंज्ञो भवति; नादेशश्च घिसंज्ञस्यैवेति युक्तेयमनादेशविधायिता पत्युरघित्वाद् व्याकृतरूपाणां स्त्रीणाम्" इतिच व्याकरणविद्वल्लभो व्यञ्जनालभ्योऽर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तत्राऽऽलोकयाञ्चक्रे पुरुषौ गतचेतनौ ।
निश्वासशेषौ पतितौ जराजर्जरविग्रहौ ॥ ३२ ॥
[1]बोधयन्तीं सेवमानां तावुभौ तरलेक्षणाम् ।
विलपन्तीं साश्रुधारां युवतीशतसेविताम् ॥ ३३ ॥
विषण्णां म्लानवदनां निषण्णां धरणीतले ।
उदारदर्शनां चैकां ददर्श युवतीं मुनिः ॥ ३४ ॥

भक्त्यादिदर्शनम् ।

[2]अथोपयान्तमालोक्य समुत्थाय मुनीश्वरम् ।
यथोचितं समादृत्य धृताऽऽश्वासा कृताञ्जलिः ॥ ३५ ॥
"भगवन् ! भाग्यसंभाव्यदर्शन ! द्रुहिणात्मज ! ।
एतां विपदमुच्छिन्धी"त्यूचे सा गद्गदस्वरा ॥ ३६ ॥
"इमौ भद्रे ! कौ नु जनौ यौ शोचसि विचेतनौ ।
सेवमानाश्च भवतीमेताः का भवती च का ॥ ३७ ॥
अलं विलापैर्विपदो वृत्तं वर्णय विस्तरात् ।
त्वद्धिताधानविषये विद्धि मां दत्तचेतसम्" ॥ ३८ ॥
इति देवर्षिवचनं समाकर्ण्य च हर्षदम् ।
अखिलं वर्णयामास वृत्तं दुःखमयं निजम् ॥ ३९ ॥
ज्ञानवैराग्यनामानौ मदीयौ तनयाविमौ ।
एताः शताधिका नद्यो गंगाद्या मामुपासते ॥ ४० ॥
अहं च विश्वविख्याता भक्तिर्द्रविडदेशजा ।
कर्णाटकादिदेशेषु तनुमेतामवर्धयम् ॥ ४१ ॥
इमौ विवेकसंबन्धात्समुत्पन्नौ सुतौ निजौ ।
सहादाय महाकायौ चिरं पर्यभ्रमं भुवि ॥ ४२ ॥
क्रमेण गुर्जरान् प्राप्ता अकाण्डे ते वयं त्रयः ।
अलभामहि देवर्षे ! युगपच्चरमं वयः ॥ ४४ ॥

(१–२) द्वाभ्यां युग्मकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खण्ड्यमाना तत्र चण्डैः पाखण्डैः कलिपण्डितैः ।
पलायिषि बलाभावाद्भयार्ता ससुतद्वया ॥ ४४ ॥
अथ वृन्दावनं प्राप्य सुतयोर्जरतोः सतोः ।
माताऽहमेतयोर्जाता द्राक् परावृत्तयौवना ॥ ४५ ॥
त्वगस्थिशेषौ पतितौ बोध्यमानौ विचेतनौ ।
शोचामि भगवन्नेतौ सुतौ मुद्रितलोचनौ ॥ ४६ ॥
गिरामगोचरीभूतमेनयोर्दुःखमीदृशम् ।
निराकर्तुं न शक्नोमि महर्षे ! जननी सती ॥ ४७ ॥
तत् साधो ! साधयाऽस्माकं शर्म केनापि कर्मणा ।
स्वं सिद्धसाध्यं मन्यन्ते साधवः परशर्म्मणा ॥ ४८ ॥
इति श्रुतिपथं नीत्वा सरसां भक्तिभारतीम् ।
नारदः प्रतिवक्तिस्म स्मितद्योतितदिङ्मुखः ॥ ४९ ॥
"अये ! पवित्रहृदये ! देवि ! दूरय दीनताम् ।
जीवातुरासि लोकानामुचितां धेहि धीरताम् ॥ ५० ॥
गतास्ते दिवसा देवि ! येषु युष्माकमादरः ।
कलिः संप्रति संप्राप्तः पश्य वश्यचराचरः ॥ ५१ ॥
सुजना अवसीदन्ति संप्रसीदन्ति दुर्जनाः ।
वृन्दारकाः पलायन्ते गर्जन्ति दितिदारकाः ॥ ५२ ॥
देवि ! सोऽयं कलिः शाठ्यं कुर्वन् सर्वगुणोपरि ।
अन्तःकरणमस्माकं शतधा हन्त ! कृन्तति ॥ ५३ ॥
सदाचारेण तपसा योगेन च विवर्जिता ।
बलिना कलिनाऽस्पृश्या भूमिरेषा विनिर्मिता ॥ ५४ ॥
येनाऽजहा महाक्लेशकरीमाकालिकीं जराम् ।
सोऽयं वृन्दावनमहीमहिमाऽगोचरो गिराम् ॥ ५५ ॥
इह दिष्ट्या ! देवि ! सत्सु जागर्ति सुकृतोच्चयः ।
अलब्ध यत्र भवती जरती नूतनं वयः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अज्ञानेन सरागेण पराभूतैर्नराधमैः ।
निराकृतौ तव सुतौ जरामेतौ न मुञ्चतः ॥ ५७ ॥

मा शोचीरन्तरङ्गत्वं यातौ सर्वात्मना हरेः ।
नैतौ जातु विपत्स्येते कल्याणि ! तनयौ तव ॥ ५८ ॥

छिनत्ति शतशश्चित्तं न केषां पश्यतां सताम् ।
एनयोः परमानन्दद्वारयोरीदृशी दशा ॥ ५९ ॥

भावानामौत्तराधर्यं पर्यायेण प्रदर्शयन् ।
कालः क्रीडति पश्याऽयं बालवत् सततक्रियः ॥ ६० ॥

विधिर्बलीयान् दुष्टोऽपि साक्षाद्दृष्टोऽपि यत्कलिः" ।
परीक्षिता क्षितिभुजा हन्त ! नाऽबाधि साञ्जलिः ॥ ६१ ॥

भक्तिनारदसंवादः ।

इति श्रुत्वा मुनेरुक्तिं भक्तिर् "दृष्टं स्वतः कलिम् ।
परीक्षिन्नावधीत् कस्माद्" इत्यूचे कुतुकान्विता ॥ ६२ ॥

अथ कृष्णतिरोधानस्मरणक्षोभितान्तरः ।
प्रत्युवाच क्षणं ध्यात्वा नारदः करुणापरः ॥ ६३ ॥

"यदा गदाग्रजो देवि ! धरित्रीमजहात् प्रभुः ।
तदा कदाचारमयः सर्वतो व्यानशे कलिः ॥ ६४ ॥

अनादृतचिरक्षुण्णसनातनपरिस्थिति ।
जगदेतदमर्यादं प्रावर्तत यथारुचि ॥ ६५ ॥

दृष्टोऽपि भ्रमता राज्ञा दुष्टोऽयं वृषलाकृतिः ।
जिघांसितोऽपि जघ्ने न प्रपन्नः पदयोरिति ॥ ६६ ॥

"श्रीकृष्णकीर्तनादेव देववर्गसमीहितम् ।
हितं लभ्येत भविना विना यत्नशतैरपि" ॥ ६७ ॥

इत्यालोच्य कलेर्दोषमयस्यापि महत्तरम् ।
गुणमेकं स राजर्षिरवशेषयति स्म तम् ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन कलिकालेन कवलीकृतचेतसाम् ।
देवि ! नानाविधामेतां जनानां पश्य दुर्दशाम् ॥ ६९ ॥
वित्तलोभाद्यत्र तत्र प्राज्ञपाशैः[1] प्रवर्तिता ।
तथागुणा भागवती कथा निःसारतां गता ॥ ७० ॥
नास्तिकैरुग्रचरितैराश्रितानां धनार्थिभिः ।
देवि ! संप्रति तीर्थानां निःसारत्वं विलोकय ॥ ७१ ॥
कामुकैः कोपनैर्लुब्धैरारब्धानां निजेच्छया ।
पश्य निःसारतां देवि ! तपसामपि सर्वतः ॥ ७२ ॥
सदम्भैर्लोलुपैर्लोकैः संश्रितस्यार्थसिद्धये ।
ध्यानस्य सर्वसारस्य निःसारत्वं न वीक्षसे ॥ ७३ ॥
जनैः स्वकर्मविमुखैः सिद्धिलुब्धैरनक्षरैः ।
नित्यमभ्यस्यमानस्य पश्य योगस्य दुर्दशाम् ॥ ७४ ॥
मारप्रवणतां प्राप्ताः सहसा रक्तलोचनाः ।
स्त्रीसक्ता नान्यदीक्षन्ते सूरयः सैरिभा[2] इव ॥ ७५ ॥
युगानुरूपतां याते जगत्यत्र चराचरे ।
कोऽभिनन्द्यः कश्च निन्द्यः सेयं लीलाऽखिला हरेः ॥ ७६ ॥
अत्रापि धैर्यमाधाय धर्मे बध्नाति यो धियम् ।
स भद्रे ! कोटिविरलस्त्रिलोकीतिलकायते ॥ ७७ ॥
प्रवर्तमानाय सते यथानिजसमीहितम् ।
अन्तश्चरोऽपि जगते न कुप्यति जगत्पतिः ॥ ७८ ॥
सर्वतो विषमे देवि ! समयेऽस्मिन् शरीरिणाम् ।
श्वःश्रेयसं करोत्येव श्रद्धया कीर्तितो हरिः ॥ ७९ ॥

भक्तिसमाश्वासनम् ।

इति वाचं समाकर्ण्य नारदस्य दयावतः ।
विनयादभया भक्तिरित्थमूचे सविस्मया ॥ ८० ॥

---

(१) कुत्सितैः प्राज्ञैः । याप्ये पाशप् । (२) सैरिभा महिषाः । लुलायो महिषो वाहद्विषत्कासरसैरिभाः । इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हन्त ! धन्याऽस्मि भगवन् ! दिष्ट्या ! मे सफलं जनुः ।
अनुक्षणं कष्टतरा नष्टप्रायाः किलाऽऽधयः ॥ ८१ ॥
नमः पुण्याय शतशो येन नैपुण्यशालिना ।
दर्शनादेव देवर्षे ! भवतोऽस्मि बतोद्धृता ॥ ८२ ॥
संसारिषु हिताधानं विदधानमचिन्तितम् ।
सर्वात्मना विजयते सन्निधानं महात्मनाम् ॥ ८३ ॥
दैन्यं जनानां रुद्धाशं[1] तमिस्रमिव विस्तृतम् ।
हिनस्ति सज्जनाऽऽसत्तिर्गभस्तिरिव भास्वतः ॥ ८४ ॥
कायाधवो[2] महामायां जिगायाऽवाप्य यं शिशुः ।
तमहन्तापहन्तारं भवन्तमभिवादये ॥ ८५ ॥
यस्योपदेशादन्वर्थनामधेयोऽजनि ध्रुवः ।
तमीश्वरस्य पौत्रं त्वां प्रपन्नाऽस्मि महामुने ! ॥ ८६ ॥

इति श्रीनारदमुनेर्भक्तेर्देव्याश्च शोभनः ।
प्रास्तावि किल संवादः प्रथमाध्यायगोचरः ॥१॥

क्लेशकातरचित्तायाः श्रुत्वा भक्तेः सरस्वतीम् ।
संविधातुमनाः प्रोचे धातुरुत्सङ्गजो मुनिः ॥ ८७ ॥
चिन्तयाऽलं महाभागे ! समाधाय निजां मतिम् ।
चिन्तयाऽलङ्कृतं दोर्भिश्चतुर्भिस्त्रिजगत्पतिम् ॥ ८८ ॥
यश्च दीर्घदुकूलेन[3] कृष्णादैन्यदवानलम्[4] ।
निर्वापयामास देवि ! स्मर तं भक्तवत्सलम् ॥ ८९ ॥
योगिगम्यं पदं जग्मुः सेवया यस्य गोपिकाः ।
विकारवर्जितं देवि ! भज तं भुवनेश्वरम् ॥ ९० ॥

---

(१) रुद्धाशं (रुद्धदिग्भागं–हताशंसनं च)।
(२) कायाधवः प्रह्लादः। हिरण्यकशिपोर्भार्या कयाधुः, तस्या अपत्यं कायाधवः।
(३) दीर्घेण वस्त्रेण। (४) द्रौपदीदुःखदावाग्निम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेयसी यस्य भवती भवतीव्रव्यथापहा ।
स एव देवदेवस्ते सेवनीयो महामहाः ॥ ९१ ॥
प्रयाति हरिराहूतो मध्यस्थीभूतया यया ।
नीचानां सद्म, सैव त्वं नैव शोचितुमर्हसि ॥ ९२ ॥
कच्चित् स्मरसि कल्याणि ! त्वमादेशेन मापतेः[1] ।
सच्चिदानन्दरूपत्वं प्राणिनः प्रापयिष्यसि[2] ॥ ९३ ॥
अपि स्मरसि देवि ! त्वं वृषाकपिनिदेशतः[3] ।
नित्यतोषान् प्राप्तपोषान् भजतो भावयिष्यसि ॥ ९४ ॥
आर्ये ! किमभिजानासि दासीभावविभूषिताम् ।
मोक्षलक्ष्मीं सहाऽऽदाय भूभागे प्रचरिष्यसि ॥ ९५ ॥
आत्मानमवबुध्यस्व भव त्वं धैर्यधारिणी ।
अवस्थेयं कलिकृता मा भूत्तव विकारिणी ॥ ९६ ॥
शमादौ साधने क्षीणे बलेन बलिनः कलेः ।
अम्ब ! त्वमेका लोकानामवलम्बत्वमेष्यसि ॥ ९७ ॥
भीषणेऽपि कलौ देवि ! भवत्या वर्तमानया ।
हरिर्गतिप्रदानेन जगतीमुद्धरिष्यति ॥ ९८ ॥
प्रतिगेहं प्रतिजनं प्रतितीर्थं प्रतिक्षणम् ।
माननीया भागवतैर्देवि ! त्वं जागरिष्यसि ॥ ९९ ॥
कामं दुरात्मतां यातु कलिरन्यजनान् प्रति ।
महिमानं भवत्यास्तु स एव वितनिष्यति ॥ १०० ॥
ये च त्वामादरिष्यन्ते कलौ कालेऽत्र दारुणे ।
ते मलौघं विनिर्धूय लप्स्यन्ते परमं पदम् ॥ १ ॥
चित्तेऽपि येषां भविनां तव वासो भविष्यति ।
वासुदेवप्रिये ! तेषां यमत्रासो विनङ्क्ष्यति ॥ २ ॥
भवत्या भूषिताज्जन्तोः स बिभेति स्वयं यमः ।
अन्येषां का कथा तस्मै देवा विदधते नमः ॥ ३ ॥

(१) रमापतेः । (२) अभिज्ञावचने लृट् । (३) वृषाकपिरिह विष्णुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]देवि ! त्वया गृहीतानां जनानामपकारकः ।
त्रासाकुलः प्रजायेत दुर्वासा इव मानवः ॥ ४ ॥
व्रतैर्योगैर्मखैस्तीर्थैर्जायते देवि ! यत्फलम् ।
अलं तज्जननायैका भवती सज्जनादृता ॥ ५ ॥
भक्ते ! सहस्रशस्तुभ्यं नमो यदनुकम्पया ।
आम्नायाऽगोचरं वस्तु दाम्ना बद्धं यशोदया ॥ ६ ॥

भक्तिप्रशंसा ।

इति भक्तिः सूनृताभिर्मुनिना वाग्भिरीडिता ।
प्रफुल्लविग्रहलता प्रावोचत कृतस्मिता ॥ ७ ॥
धन्योऽसि धीधनमणे ! धर्मोद्धारे निबद्धया ।
त्वया रुच्या सचेतांसि यच्चक्षूंषि धिनोषि नः ॥ ८ ॥
कथाऽमृतेन ते नष्टा कष्टा मम मनोव्यथा ।
अवस्थिता भवच्चित्तं न हास्यामि महामुने ! ॥ ९ ॥
गदेन कलिना ग्रस्तौ मदेकायत्तजीवितौ ।
प्रबोधय सुतावेतौ करुणामय ! मूर्च्छितौ" ॥ ११० ॥
एवमभ्यर्थितो भक्त्या मधुरोक्त्या दयाघनः ।
बोधनं कर्तुमारेभे तयोरित्थं तपोधनः ॥ ११ ॥
"ज्ञान ! संज्ञानराहित्यं जहाहि जरसा सह ।
प्राणभृद्भाग्य ! वैराग्य ! प्रोत्थाय मुदमावह ॥ १२ ॥
ज्ञान ! मुद्रां विहायैतां समुन्मीलय चक्षुषी ।
गृहीत्वा धीरतां सद्यः सखे ! वैराग्य ! जागृहि" ॥ १३ ॥
[2]इत्थमाम्रेडयन् वाणीं पठन् श्रौतीं सरस्वतीम् ।
प्रगायन् भगवद्गीतां हरेर्नामानि कीर्तयन् ॥ १४ ॥
शीतलाभ्यां कोमलाभ्यां कराभ्यां च परामृशन् ।
मुनिरुत्थापयामास कथंचन स तावुभौ ॥ १५ ॥

---

(१) अम्बरीषोपाख्यानमिहाऽनुसन्धेयम् । (२) द्वाभ्यां युग्मकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तौ जृम्भमाणौ कटुताप्रमीलत्साश्रुचक्षुषौ ।
श्लथीभवत्पूर्वकायौ यथापूर्वं निदद्रतुः ॥ १६ ॥

ज्ञानवैराग्ययोरप्रबोधः ।

कृतोचितोपचारोऽपि हतोपायस्ततो मुनिः ।
दध्यौ धियं समाधाय श्रद्धया साधु माधवम् ॥ १७ ॥
"अलं मुने ! विषादेन प्रसादेन महात्मनाम् ।
सिद्धार्थः स्या" इति तदा दैवी वागुदभूद्दिवः ॥ १८ ॥
ततो महात्मनो द्रष्टुं भक्तिमाश्वास्य निर्गतः ।
अनासादितविश्रामश्चिरं बभ्राम नारदः ॥ १९ ॥
प्रत्याश्रमं प्रत्यरण्यं स भ्रमन् प्रतिपर्वतम् ।
परीणामेन पुण्यानां प्रपेदे बदरीं मुनिः ॥ १२० ॥
तपसे कृतसंकल्पः सहसा स तपोधनः ।
ददर्श पुरतः प्राप्तान् सनकादीन् महात्मनः ॥ २१ ॥

सनकादिदर्शनम् ।

षड्वर्गजयिनस्तन्वा पञ्चवर्षाकृतीनिमान् ।
चतुरः संख्यया लोकाँस्त्रीनतीतान् ननाम सः ॥ २२ ॥
एतान् प्रशान्तमधुराकृतीन् धृतबृहद्द्युतीन् ।
ऊचे चिन्तान्धकारस्य प्रतीकाराय नारदः ॥ २३ ॥
दिष्ट्या ! समुचिते काले यूयं दर्शनमागताः ।
दिष्ट्या ! च प्रकटीभूता मम भाग्यपरम्परा ॥ २४ ॥
विश्वविश्रुतसौजन्याः ! प्राणित्राणाय कर्मणा ।
त्विषा च, यूयं चरथ नूनं भास्करसन्निभाः ॥ २५ ॥
क्षणं रुध्वा जिगमिषां तुदन्तं विदुषां मनः ।
संक्षेपतो वर्ण्यमानमुदन्तं श्रोतुमर्हथ ॥ २६ ॥
चिरं पर्यभ्रमं भूमौ तीर्थाऽऽलोकनकौतुकी ।
कलिकालकदाचारकदर्थीकृतकौतुकः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]उपवृन्दावनं प्राप्तः कालिन्दीकूलवर्तिनीम् ।
मन्दप्रभनिरानन्दसुन्दरीवृन्दसेविताम् ॥ २८ ॥
जरन्तौ पतितौ मूर्तौ[2] शोचन्तीं कौचिदाकुलाम् ।
अपश्यं निर्मलामेकां युवतीं श्रितभूतलाम् ॥ २९ ॥
अनुयुक्ता[3] सती सा तु सुतौ तौ जरसाऽन्वितौ ।
ज्ञानवैराग्यनामानौ स्वं च भक्तिमवोचत ॥ १३० ॥
सा जरां गुर्जरप्राप्त्या त्रयाणामुपगोकुलम् ।
तादवस्थ्यं द्वयोः, स्वस्य यौवनं चाऽऽक्षमब्रवीत् ॥ ३१ ॥
वार्धक्यं सुतयोस्तादृक्, तादृङ्मातुश्च यौवनम् ।
दयाखेदाश्चर्यमयं व्यधत्त हृदयं मम ॥ ३२ ॥
आमयं कलिकालोत्थं तयोर्निद्राजरामयम् ।
संहर्तुकामः सुचिरं यथोचितमुपाचरम् ॥ ३३ ॥
ततो मां विहतोपायं विषण्णमनसं प्रति ।
सद्भ्यः कृतार्थतामेहीत्युदभूद् व्योमभारती ॥ ३४ ॥
अथाऽहमभिसन्धाय भ्रमन्नेव तथा जनान् ।
दृष्टवानस्मि वः सर्वान् प्रभविष्णून् दयाधनान् ॥ ३५ ॥
तद् ब्रूत तेषां त्रितयं भवेद्येन निरामयम् ।
आपन्नसज्जनत्राणव्रतं हि बिभृमो वयम् ॥ ३६ ॥

भक्त्यादिदशावर्णनम् ।

इति श्रुत्वा लोकहितं मितं नारदभाषितम् ।
दृष्टसाराः प्रपञ्चस्य कुमाराः ससृजुर्गिरः ॥ ३७ ॥
धन्योऽसि नारद ! मुने ! भक्तिमानसि माधवे ।
संतप्तः परदुःखेषु विरलस्त्वादृशो भवे ॥ ३८ ॥
आत्मवत् सर्वभूतानि परिपालयतस्तव ।
कैर्वा दृष्टिः सुधावृष्टिसनाभिर्नाभिनन्द्यते ॥ ३९ ॥

---

(१) द्वाभ्यां युग्मकम् । (२) मूर्तौ मूर्च्छितौ. मूर्च्छाले मूर्तमूर्च्छितौ । इत्यमरः । (३) अनुयुक्ता पृष्टा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिष्ट्या ! भक्तेः सपुत्रायास्त्वयोत्कर्षाय जाग्रता ।
अन्वग्राहि करालेऽत्र कलिकाले जगत्त्रयी ॥ १४० ॥
महर्षे ! किं विषादेन तेषामुद्धरणं प्रति ।
उपायमेकं सुकरं निरपायं निशामय ॥ ४१ ॥
श्रेयःसाधकतां याताः पन्थानः शास्त्रदर्शिताः ।
कलिप्रसुष्टदृष्टीनां नृणां प्रायेण दुर्गमाः ॥ ४२ ॥
ये स्वर्गमुपतिष्ठन्ते पन्थानस्ते शताधिकाः ।
एकोऽस्ति गुप्तः पन्था यो वैकुण्ठमुपतिष्ठते ॥ ४३ ॥
सर्वयज्ञप्रधानेन श्रीमद्भागवतात्मना ।
वर्त्मना ज्ञानयज्ञेन हरिर्द्राग्गेव दृश्यते ॥ ४४ ॥
भक्तेर्देव्याः प्रीतिदाने समुत्थाने तयोर्द्वयोः ।
कलिध्वान्ततिरोधाने नाऽनेन सदृशो विधिः ॥ ४५ ॥
संप्राप्तः श्रवणाऽध्वानं श्रीमद्भागवतध्वनिः ।
भनक्ति भक्तियुक्तानां मोहनिद्रां महीयसीम् ॥ ४६ ॥
अप्रयासं हतत्रासं मार्गमेनं शरीरिणाम् ।
व्यासः प्रकटयामास तपोधनधुरन्धरः ॥ ४७ ॥
इत्थमाकर्ण्य कौमारीममिथ्यामधुरां गिरम् ।
सन्दिहान इव प्रोचे सानन्दोऽपि पुनर्मुनिः ॥ ४८ ॥
वेदपाठैरुपनिषद्घोषैर्गीताप्रगायनैः ।
असिद्धं साधयेत्साध्यमपि ? भागवतध्वनिः ॥ ४९ ॥
कुमाराः ! श्रवणाद्यस्य तेषां पीडा निवर्तते ।
किं तद्भागवते वस्तु यद्वेदादौ न वर्तते ॥ १५० ॥
निशम्य नारदमुनेरुक्तिमेतां सयुक्तिकाम् ।
प्रत्यूचिरे प्रमुदिता मुनयस्ते चिरन्तनाः ॥ ५१ ॥
महर्षे ! सहकारस्य सफलोऽपि तरुः स्वतः ।
किं रसस्य समास्वादे साक्षाद्धेतुः प्रजायते ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेक्षावन् ! सूक्ष्ममीक्षस्वाऽऽकाङ्क्षन्तः खण्डशर्कराः ।
इक्षुदण्डस्य लब्ध्यैव निराकाङ्क्षाः क्व वीक्षिताः ॥ ५३ ॥
शमनीयं गदं जानन् केवलेनैव सर्पिषा ।
किं कश्चिदगदङ्कारः(१) सगदान्(२) पाययेत्पयः ॥ ५४ ॥
शमीकाष्ठेन लब्धेन किमन्तर्गतवह्निना ।
तण्डुलान् पण्डितः कश्चित् पिपक्षति बुभुक्षितः ॥ ५५ ॥
अनयैव दिशा साधो ! सर्वश्रेयोविधायिनः ।
विद्धि भागवतस्यापि सर्ववाङ्मयसारताम् ॥ ५६ ॥
गीताज्ञाता वेदवेत्ता ब्रह्मसूत्रपवित्रधीः ।
गतो भागवतादेव शोचन् व्यासो विशोकताम् ॥ ५७ ॥
हन्त ! विज्ञाततत्त्वोऽपि वृथैव त्वं विषीदसि ।
वृत्तं सत्यवतीसूनोर्मुने ! विस्मृतवानसि ॥ ५८ ॥
चतुःश्लोकं भागवतं विधेरधिगतं मुने ! ।
भवतैव ननु व्यक्तीकृतं व्यासानुकम्पिना ॥ ५९ ॥
तदास्तां विस्तरस्तेषामन्येषां च यथाविधि ।
श्रीमद्भागवतस्यैव श्रवणं श्रेयसो निधिः ॥ १६० ॥

कुमारकृतकार्यनिर्णयः ।

इति निर्णयमाकर्ण्य कुमाराणां प्रहर्षितः ।
उदारधीर्गद्गदगीर्व्याजहार स नारदः ॥ ६१ ॥
अघसंघातघातिभ्यः कर्तृभ्यः कुशलावलेः ।
चलेतरप्रीतिमद्भ्यः सद्भ्यः खलु मुहुर्नमः ॥ ६२ ॥
महामोहापहारिभ्यः प्राप्येभ्यः पुण्यपङ्क्तिभिः ।
(७७) मज्जतामवलम्बेभ्यः सज्जनेभ्यो मुहुर्नमः ॥ १६३ ॥

इति श्रीनारदमुनेः कुमाराणां च शोभनः ।
प्रास्तावि किल संवादो द्वितीयाध्यायगोचरः ॥ २ ॥

---

(१) अगदङ्कारः वैद्यः । (२) सगदान् रोगिणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः शौनक ! सानन्दो विधिं कालं स्थलं फलम् ।
साऽधिकारं समाहात्म्यं पप्रच्छ विधिनन्दनः ॥ ६४ ॥
तथा च ज्ञानयज्ञस्य स्वयमाचार्यतां गताः ।
सभक्तिमनुगृह्णीत मामित्यूचे स वर्णिनः ॥ ६५ ॥
अथ श्रद्धासमृद्धस्य समाकर्ण्य मुनेर्वचः ।
प्रत्यूचिरे समुत्थाय ज्ञानवृद्धाः कुमारकाः ॥ ६६ ॥
सार्धं कथाप्रसङ्गाय गङ्गाद्वाराविदूरतः ।
याम स्वर्गतरङ्गिण्यास्तीरमानन्दनामकम् ॥ ६७ ॥
प्रशान्तपावने रम्ये नानामुनिजनावृते ।
अत्रासा पुत्रसहिता भक्तिस्तत्राऽऽगमिष्यति ॥ ६८ ॥
तदायाहीति जल्पन्तः सप्रहर्षाः सनारदाः ।
सनकप्रमुखा जग्मुः शनकैः प्रहसन्मुखाः ॥ ६९ ॥
उदन्तमेतं विज्ञाय कथामृतपिपासया ।
तं देशमभि सानन्दा धावति स्म जगत्त्रयी ॥ १७० ॥
शुकं शक्तेः स्वपुत्रस्य प्रपौत्रमनु हर्षितः ।
समहर्षिगणः प्राप वसिष्ठः शिष्टसंमतः ॥ ७१ ॥
अन्ये च गौतमभृगुपिप्पलादादयोऽखिलाः ।
मुनयोऽभ्यागमन्नन्तेवासिवर्गसमावृताः ॥ ७२ ॥
श्रुतयः स्मृतयो मन्त्राः पुराणानि समन्ततः ।
आजग्मुर्मूर्तिमाश्रित्य कृत्यसारदिदृक्षया ॥ ७३ ॥
शास्त्राणि योगवेदान्तसाङ्ख्यमुख्यानि कौतुकात् ।
प्रापुस्तर्कानुयातानि मूर्तानि सकलान्यपि ॥ ७४ ॥
गङ्गागोदावरीकृष्णावाङ्मतीगोमतीमुखाः ।
सतृष्णाः पुण्यमादातुं तरङ्गिण्यः समाययुः ॥ ७५ ॥
प्रयागपुष्करगयाप्रभासप्रमुखैरपि ।
तीर्थैः सर्वैरलंचक्रे स्थलं तद्दिव्यमूर्तिभिः ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महेन्द्रविन्ध्यप्रमुखाः पर्वताः सहिमालयाः।
तन्महत् पर्व विज्ञाय सर्वतोऽपि समाययुः॥ ७७॥
देवा विद्याधरा यक्षाः पूर्वदेवाः सदानवाः।
उपातिष्ठन्त सश्रद्धा बद्धाञ्जलिपुटाः पुरः॥ ७८॥
हाहाहूहूप्रभृतयो गन्धर्वाः साप्सरोगणाः।
सहर्षहासा आजग्मुरुपवीणितसद्गुणाः॥ ७९॥
मध्येसमाजमागत्य नारदेनोपकल्पितम्।
अध्यासाञ्चक्रिरे शिष्टा विष्टरं सनकादिकाः॥ १८०॥
अथ तेषूपविष्टेषु यथास्थानं समन्ततः।
निषसाद पृथग्भूय स समाजोऽपि वर्गशः॥ ८१॥

गङ्गाद्वारे कथाप्रसङ्गः।

महर्षिणा नारदेन ज्ञानयज्ञे यथाविधि।
आचार्यत्वेन सश्रद्धं वव्रिरे सनकादयः॥ ८२॥
तदा जयजयाऽऽरावैः शङ्खध्वनिविमिश्रितैः।
प्राणिनां प्राप्नुवन्ति स्म रोमाण्यपि सहर्षताम्॥ ८३॥
देववृष्टैरिष्टगन्धैः प्रसूनैः कल्पवृक्षजैः।
अनल्प आसीदामोदो बहिरन्तश्च देहिनाम्॥ ८४॥
दत्तश्रुतीनात्तमौनान् वीक्ष्य बद्धाञ्जलीन् जनान्।
ऊचुः कुमाराः सानन्दाः कृतगोविन्दवन्दनाः॥ ८५॥

कथारम्भः।

मुने! वर्णवयोऽवस्थालिङ्गकर्मानपेक्षया।
सिद्धाधिकाराः सर्वेऽपि शुकशास्त्रे शरीरिणः॥ ८६॥
पुरुषार्थप्रधानस्य निर्वाणस्य प्रदातृणः।
सर्वातिशायी महिमा शुकशास्त्रस्य गीयते॥ ८७॥
कथा भागवती धन्या सभक्ति श्रुतया यया।
दारयन् दुरितं जन्तोर्विशेच्चित्तदरीं हरिः॥ ८८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुने ! पारमहंसीयं संहिता श्रद्धया श्रुता ।
हितार्थिनां सदसतोर्विवेकाऽऽधायिनी मता ॥ ८९ ॥
कलौ मलौघहृद् यत्र भवेद्भागवती कथा ।
अनच्छधीस्तत्र गच्छेत्तीर्थेषु भ्रमणं वृथा ॥ १९० ॥
किं श्रमाधायिभिः शास्त्रैरभ्यस्तैरितरैर्मुने ! ।
अभ्यस्यतां संहितेयं भवभ्रमनिरासिका ॥ ९१ ॥
किं मखैर्नश्वरफलैरश्वमेधादिभिर्मुने !
आनन्दमैश्वरं दत्ते संहितेयमनश्वरम् ॥ ९२ ॥
महतीयं भागवती श्रुतिरत्र शरीरिणाम् ।
अमहाभागतां हन्ति दीनानां कलिदुर्गुणैः ॥ ९३ ॥
अन्तर्धानेन खिन्नानामुद्धाराय मनस्विनाम् ।
कृष्णः पुनः प्रादुरासीच्छ्रीमद्भागवतात्मकः ॥ ९४ ॥
सप्रयागाः कुरुक्षेत्रकाशीगङ्गागयादयः ।
पुराणपुरुषस्याऽस्य प्रयान्ति समतां कुतः ॥ ९५ ॥
अप्यस्य श्लोकपादस्य पठनात् साधु मानवाः ।
श्रीहरेरन्तिकं यान्ति पुण्यश्लोकस्य पादयोः ॥ ९६ ॥
प्रणवः पौरुषं सूक्तं मन्त्रो वा द्वादशाक्षरः ।
श्रीहरेर्नातिरिच्यन्ते श्रीमद्भागवतात्मनः ॥ ९७ ॥
आम्नायमाता सविता सुरभिर्द्वादशी द्विजः ।
पर्यायभूताः कृष्णस्य श्रीमद्भागतात्मनः ॥ ९८ ॥
अग्निहोत्रं तीर्थराजो वसन्तः पुरुषोत्तमः ।
मुने ! नाऽनन्ततो भिन्नाः श्रीमद्भागवतात्मनः ॥ ९९ ॥
कुर्वन् सार्थानुसन्धानमेतत्पारायणं सुधीः ।
नारायणानुग्रहेण सद्यो मुच्येत दुष्कृतैः ॥ २०० ॥
देहावसानसमये श्रुत्वा भागवतं जनः ।
सानन्दस्तत्पदं याति यत्र देवो जनार्दनः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुलस्याः सेवनं विष्णोः स्मरणं वन्दनं गवाम् ।
पठनं शुकशास्त्रस्य घटते भाग्यशालिनाम् ॥ २ ॥
पुस्तकं शुकशास्त्रस्य रुक्मसिंहासनान्वितम् ।
प्रयच्छन् वैष्णवाग्र्याय कैवल्यमधिगच्छति ॥ ३ ॥
मुने ! न यैरपि सकृत् पीता भागवती सुधा ।
जननीक्लेशकर्तॄणां तेषामेव जनिर्मुधा ॥ ४ ॥
शुकशास्त्रकथापानमकुर्वन् सर्वदा मुने ! ।
भवभारं वहन्नेव क्लिश्यते खरवन्नरः ॥ ५ ॥
श्रद्धया न श्रुता येन मुने ! भागवती कथा ।
चण्डालेनेव किं तेन पिण्डमात्राभिलाषिणा[1] ॥ ६ ॥
आश्रितः कथया जन्तुर्जीवन् भवति केशवः[2] ।
शुकशास्त्रकथात्यागी भवेत् केनाश्रितः शवः ॥ ७ ॥
श्रुता भागवती वार्ता पापपुञ्जधरैर्न यैः ।
भारभूतैर्भवेदार्ता तैरेव धरणी नरैः ॥ ८ ॥
विध्वंसितमहापापस्तापत्रयनिवारकः ।
श्रीमद्भागवतालापः स्वापः किं भाग्यवर्जितैः ॥ ९ ॥
यदा यथा यत्र मुने ! लभ्येत शुकशास्त्रगीः ।
तदा तथा तत्र गच्छेज्जनः श्रद्धासमृद्धधीः ॥ २१० ॥

भागवतप्रशंसा ।

नियमानामनेकत्वाद्दुर्जयत्वाच्च चेतसः ।
प्राणिभिः श्रवणं कार्यं केवलं सप्तभिर्दिनैः ॥ ११ ॥
न सत्यं न ब्रह्मचर्यं जायते सुचिरस्थिति ।
अतः सप्ताहमात्रेण कार्या भागवतश्रुतिः ॥ १२ ॥

---

(१) भागवतसेवनं विनाऽलब्धमुक्तिर्जनः पुत्रादिदत्तं पिण्डं पाञ्चभौतिकं शरीरं वाऽभिलष्यति । चण्डालश्च जनैस्तीर्थेषु प्रक्षिप्तं पिण्डमभिलष्यतीति द्वयोः साम्यम् ।
(२) केशवः केनाश्रितः (के इत्यक्षरेण अनाश्रितः) शवः भवति इति चार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याधीनामधिकत्वेन लघुत्वेन जनायुषः ।
शुकशास्त्रं यथाशास्त्रं श्रूयते सप्तभिर्दिनैः ॥ १३ ॥
न तावती शक्तिरस्ति सर्वसाधनसंहतेः ।
पतितोद्धारकस्याऽस्य सप्ताहस्य हि यावती ॥ १४ ॥
ज्ञानं ध्यानं तपस्तीर्थं यागं योगं व्रतं श्रुतम् ।
अधरीकुरुते धन्या सेयं साप्ताहिकी कथा ॥ १५ ॥

सप्ताहप्रशंसा ।

उद्धवस्यानुरोधेन जनानामुद्दिधीर्षया ।
शुकशास्त्रत्वमापन्नः सोऽयं विजयते हरिः ॥ १६ ॥
इत्थं तेषु कुमारेषु भाषमाणेषु शौनक ! ।
यदभूदद्भुतं भूरि तदाऽऽकर्णय वर्ण्यते ॥ १७ ॥
कारुण्यमिव वर्षन्ती नयनान्तनिरीक्षितैः ।
तमिस्रामिव कर्षन्ती जनानां मधुरैः स्मितैः ॥ १८ ॥
आदर्शयन्ती सौन्दर्यं सच्चरित्रपवित्रितम् ।
शान्तपावनमुग्धाङ्गी पुण्यतारुण्यशालिनी ॥ १९ ॥
तरुणाभ्यां पीवराभ्यां पठद्भ्यां विरुदावलीः ।
उपास्यमाना पुत्राभ्यां विनीताभ्यां कृताञ्जलि ॥ २२० ॥
मुकुन्द ! कृष्ण ! गोविन्द ! मुरारे ! पुरुषोत्तम ! ।
श्रीवत्सलाञ्छन ! श्रीश ! नाथ ! तुभ्यं मुहुर्नमः ॥ २१ ॥
इति स्तवं व्याहरन्ती नमयन्ती मुहुः शिरः ।
प्रादुरासीत समाजस्य मध्ये भक्तिरतर्किता ॥ २२ ॥
अथ श्रोतृञ्जनान् सर्वानियं कुत इतीरिणः ।
ऊचुः कुमारा भक्तिर्नः कथाया उदभूदिति ॥ २३ ॥
उपसृत्य ततः सा च नतमौलिः कृताञ्जलिः ।
"सर्वानेवाऽभिनन्दन्ती वन्दे वः ससुतद्वया ॥ २४ ॥

(१) पञ्चभिरन्वयः । (२) द्वाभ्यां युग्मकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमाधारा किमाचारा भवेयमहमुद्धृता ।
दयैकसारास्तद्ब्रूत कुमारा !" इत्यवोचत ॥ २५ ॥

भक्तेराविर्भावः

गिरं तदीयामाकर्ण्य वर्णिनस्ते चिरन्तनाः ।
हर्षोत्कर्षादभाषन्त पीयूषमधुरं वचः ॥ २६ ॥
व्यामोहसंहतेर्हेतुर्नामोत्कीर्तनतोषिणः ।
दामोदरस्य दासानां सामोदा वस मानसे ॥ २७ ॥
राधारमणभृत्येषु प्राधान्येन स्थिता सती ।
साधारण्येन लोकानामाधारीभव शोभने ! ॥ २८ ॥
यथाकथंचित् तनयं ज्यायांसं तव बिभ्रताम् ।
आकारिता सती देवि ! यायाः सद्म तनूभृताम् ॥ २९ ॥
देवि ! निर्वेदमप्येनं तनयं तव पुष्णताम् ।
अप्यन्वहमनाहूता प्रयायाः सदनं सताम्[2] ॥ ३० ॥
एतद्द्वयाऽनभिज्ञानां भद्रे ! त्वामेव जानताम् ।
सद्यः प्रविश्य सदनं शनैरेतौ प्रवेशयेः[3] ॥ ३१ ॥
एवं कल्याणि ! पुत्राभ्यामाभ्यां सार्धमवस्थिता ।
मलीमसां कलिवशां पवित्रय जगत्त्रयीम् ॥ ३२ ॥
देवि ! प्रपुष्णती प्रेम श्रीकृष्णचरणाब्जयोः ।
निःसारतां प्रपञ्चस्य निःसारय विगर्हिताम् ॥ ३३ ॥
इति कृत्वा कुमाराणां वाणीं कर्णपथाश्रिताम् ।
सपुत्रा प्राविशच्चेतः सा कथाश्राविणां सताम् ॥ ३४ ॥

भगवद्भक्तेषु भक्तिप्रवेशः ।

लोकत्रयीं समालोक्य तत्त्रयेणोपबृंहिताम् ।
मुमुदे नारदमुनिर्ववन्दे तां च संहिताम् ॥ ३५ ॥

(१) कथञ्चित्प्राप्तज्ञाना अपि भक्तिमन्तो विरला इति भावः ।
(२) विरागिणः प्रायेण भक्तिमन्तो भवन्तीति भावः ।
(३) भक्तिमन्तो ज्ञानं वैराग्यं च लभन्ते इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधना अपि धन्यास्ते भृगुनन्दन ! साधवः ।
येषां भक्त्या समाकृष्टश्चित्ते वसति माधवः ॥ ३६ ॥
शौनक ! श्रेयसः प्राप्तेर्हेतुः सेतुर्भवाम्बुधेः ।
(७४) न हि मादृशधीगम्यो महिमा शुकशास्त्रगः ॥ २३७ ॥

इति श्रीभक्तिसौख्याप्तिप्रकाशनकृतक्रमः ।
अध्याय एष निरगात्तृतीयोऽपि मनोरमः ॥ ३ ॥

ॐ एवं सनकादीनां प्रसादेन गरीयसा ।
श्रोतृपङ्क्तेर्भक्तिभृतं शिश्रिये चित्तमच्युतः ॥ ३८ ॥
[१]गलप्रदेशादाजानु भूषितं वनमालया ।
वक्षःपीठे पाटलया भासितं कौस्तुभश्रिया ॥ ३९ ॥
कपोलमण्डलस्पर्शिचारुचञ्चलकुण्डलम् ।
मनोज्ञकुण्डलमणिद्युतिमद्गण्डमण्डलम् ॥ २४० ॥
किरीटगतसद्रत्नप्रभाभासितदिक्तटम् ।
[३]उपसंवीतसंवीतपीतछाविलसत्पटम् ॥ ४१ ॥
मन्दस्मितसमुल्लासिरदच्छदयुगान्तरम् ।
दीर्घ-कारुण्यपीयूषवर्षि-लोचनपुष्करम् ॥ ४२ ॥
नभस्यान्तनिरम्भोदनभोनीलकलेवरम् ।
स्यान्तसीमस्थितं सर्वे ददृशुर्मुरलीधरम् ॥ ४३ ॥

भगवद्दर्शनम् ।

दिव्यं तदादिदेवस्य वपुर्वीक्ष्य सभाऽखिला ।
तस्थौ विस्मृत्य देहादि कीलितेव सुनिश्चला ॥ ४४ ॥
सविस्तरैस्तदा तारैः कम्बूनां ध्वनिभिर्मुने ! ।
जयोच्चारैश्च भक्तानां तस्तरे गगनान्तरम् ॥ ४५ ॥

---

(१) प्रकृतकथास्मरणबोधकोऽयमाङ् प्रगृह्यः । (२) पञ्चभिरन्वयः । (३) उपसंवीतः (अन्तरीयत्वं प्रापितः) संवीतः (उत्तरीयत्वं प्रापितः) पीतया छव्या लसन् पटो यस्य तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमाधारा किमाचारा भवेयमहमुद्धृता ।
दयैकसारास्तद्ब्रूत कुमारा !" इत्यवोचत ॥ २५ ॥

भक्तेराविर्भावः

गिरं तदीयामाकर्ण्य वर्णिनस्ते चिरन्तनाः ।
हर्षोत्कर्षादभाषन्त पीयूषमधुरं वचः ॥ २६ ॥
व्यामोहसंहतेर्हेतुर्नामोत्कीर्तनतोषिणः ।
दामोदरस्य दासानां सामोदा वस मानसे ॥ २७ ॥
राधारमणभृत्येषु प्राधान्येन स्थिता सती ।
साधारण्येन लोकानामाधारीभव शोभने ! ॥ २८ ॥
यथाकथंचित् तनयं ज्यायांसं तव बिभ्रताम् ।
आकारिता सती देवि ! यायाः सद्म तनूभृताम् ॥ २९ ॥
देवि ! निर्वेदमप्येनं तनयं तव पुष्णताम् ।
अप्यन्वहमनाहूता प्रयायाः सदनं सताम्[2] ॥ ३० ॥
एतद्द्वयाऽनभिज्ञानां भद्रे ! त्वामेव जानताम् ।
सद्यः प्रविश्य सदनं शनैरेतौ प्रवेशयेः[3] ॥ ३१ ॥
एवं कल्याणि ! पुत्राभ्यामाभ्यां सार्धमवस्थिता ।
मलीमसां कलिवशां पवित्रय जगत्त्रयीम् ॥ ३२ ॥
देवि ! प्रपुष्णती प्रेम श्रीकृष्णचरणाब्जयोः ।
निःसारतां प्रपञ्चस्य निःसारय विगर्हिताम् ॥ ३३ ॥
इति कृत्वा कुमाराणां वाणीं कर्णपथाश्रिताम् ।
सपुत्रा प्राविशच्चेतः सा कथाश्राविणां सताम् ॥ ३४ ॥

भगवद्भक्तेषु भक्तिप्रवेशः ।

लोकत्रयीं समालोक्य तत्त्रयेणोपबृंहिताम् ।
मुमुदे नारदमुनिर्ववन्दे तां च संहिताम् ॥ ३५ ॥

---

(१) कथञ्चित्प्राप्तज्ञाना अपि भक्तिमन्तो विरला इति भावः ।
(२) विरागिणः प्रायेण भक्तिमन्तो भवन्तीति भावः ।
(३) भक्तिमन्तो ज्ञानं वैराग्यं च लभन्ते इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधना अपि धन्यास्ते भृगुनन्दन ! साधवः ।
येषां भक्त्या समाकृष्टश्चित्ते वसति माधवः ॥ ३६ ॥
शौनक ! श्रेयसः प्राप्तेर्हेतुः सेतुर्भवाम्बुधेः ।
(७४) न हि मादृशधीगम्यो महिमा शुकशास्त्रगः ॥ २३७ ॥

इति श्रीभक्तिसौख्याप्तिप्रकाशनकृतक्रमः ।
अध्याय एष निरगात्तृतीयोऽपि मनोरमः ॥ ३ ॥

अा[1] एवं सनकादीनां प्रसादेन गरीयसा ।
श्रोतृपङ्क्तेर्भक्तिभृतं शिश्रिये चित्तमच्युतः ॥ ३८ ॥
गलप्रदेशादाजानु[2] भूषितं वनमालया ।
वक्षःपीठे पाटलया भासितं कौस्तुभश्रिया ॥ ३९ ॥
कपोलमण्डलस्पर्शिचारुचञ्चलकुण्डलम् ।
मनोज्ञकुण्डलमणिद्युतिमद्गण्डमण्डलम् ॥ २४० ॥
किरीटगतसद्रत्नप्रभाभासितदिक्तटम् ।
उपसंवीतसंवीतपीतछाविलसत्पटम्[3] ॥ ४१ ॥
मन्दस्मितसमुल्लासिरदच्छदयुगान्तरम् ।
दीर्घ-कारुण्यपीयूषवर्षि-लोचनपुष्करम् ॥ ४२ ॥
नभस्यान्तनिरम्भोदनभोनीलकलेवरम् ।
स्वान्तसीमस्थितं सर्वे ददृशुर्मुरलीधरम् ॥ ४३ ॥

भगवद्दर्शनम् ।

दिव्यं तदादिदेवस्य वपुर्वीक्ष्य सभाऽखिला ।
तस्थौ विस्मृत्य देहादि कीलितेव सुनिश्चला ॥ ४४ ॥
सविस्तरैस्तदा तारैः कम्बूनां ध्वनिभिर्मुने ! ।
जयोच्चारैश्च भक्तानां तस्तरे गगनान्तरम् ॥ ४५ ॥

---

(१) प्रकृतकथास्मरणबोधकोऽयमाङ् प्रगृह्यः । (२) पञ्चभिरन्वयः । (३) उपसंवीतः (अन्तरीयत्वं प्रापितः) संवीतः (उत्तरीयत्वं प्रापितः) पीतया छव्या लसन् पटो यस्य तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धाविशुद्धैरुत्क्षिप्ताः प्रसूनाञ्जलयः सताम् ।
विलयं प्रापयामासुर्निलयाऽऽगमनस्पृहाम् ॥ ४६ ।
हृष्यद्रोम नमन्मौलि स्रवदश्रु कृताञ्जलि ।
महर्षिवर्यपरिषच्चकार हरये नमः ॥ ४७ ॥
नमो नारायणायेति सश्रद्धाः शुद्धबुद्धयः ।
बद्धपाणि स्खलद्वाणि प्रणेमुः सिद्धपङ्क्तयः ॥ ४८ ॥
कलिकालोद्भवत्रासनाशदर्शनहर्षिताः ।
नता नमोऽच्युतायेति प्रोचुरुर्वीविपश्चितः ॥ ४९ ॥
बर्हिर्मुखाः प्राप्तसुखा महेन्द्रप्रमुखा मुने ! ।
धरणीधृतमूर्धानो विदधुर्विष्णवे नमः ॥ २५० ॥
भूरिभक्तिभरावेशाः शेषा अपि सभासदः ।
ॐनमः केशवायेति शिरसा पस्पृशुर्धराम् ॥ ५१ ॥

भगवद्वन्दनम् ।

अथाऽऽनन्दमयीं वीक्ष्य तथाऽवस्थां सभाजुषाम् ।
विभासितमुखाम्भोजो मुनिरित्थमभाषत ॥ ५२ ॥
सन्तः ! सह निमज्जन्ती महति व्यसनार्णवे ।
जगत्त्रयी च भक्तिश्च हन्त ! युष्माभिरुद्धृता ॥ ५३ ॥
अहो ! महोपकारेण निबद्धा जगतां त्रयी ।
कर्हिचिन्न विमुच्येत विमुक्तेति किमुच्यताम् ॥ ५४ ॥
दित्सतामपि सोत्साहं धन्यवादान् परःशतान् ।
न रसज्ञा कृतज्ञानां ह्रिया व्याप्रियते जडा ॥ ५५ ॥
आकल्पकालं विमला दिष्ट्या ! साधुजनादृता ।
भवत्कीर्तिश्च भक्तिश्च त्रिलोकीं पावयिष्यति ॥ ५६ ॥
सोऽयं कुमाराः ! संक्षेपश्रुतमाहात्म्यकीर्तनः ।
समुद्धरति सप्ताहः काँस्कानाख्यात[1] देहिनः ॥ ५७ ॥

(१) आख्यात कथयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदस्य जनोद्धारबद्धबुद्धेरितीरितम्।
निशम्य रम्यवचनाः पुनरूचुर्मुनीश्वराः ॥ ५८ ॥
क्रोधाग्निदग्धान् कुटिलान् दुराचारपरायणान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ५९ ॥
त्यक्तसत्यानात्तदम्भान्निर्दयान् धृतमत्सरान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ २६० ॥
समिद्धतृष्णादहनान् विद्धसज्जनमर्मणः।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६१ ॥
मातृद्विषो दारदासान् कुलाचारपराङ्मुखान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६२ ॥
अधमप्रीतिविभ्रष्टान् पितृविद्वेषदूषितान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६३ ॥
ब्रह्मस्वदग्धकल्याणान् परस्वार्पितचेतसः।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६४ ॥
व्यभिचारप्रियान् हिंसारतानुद्दामचेष्टितान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६५ ॥
परित्यक्ताऽऽश्रमाऽऽचारान् जातपातकपञ्चकान्।
समुद्धरति सप्ताहः श्रद्धाशुद्धमति श्रुतः ॥ ६६ ॥

सप्ताहप्रभावः।

भक्तेर्निरन्तरायत्वसिद्धये सुचिरन्तनम्।
निरस्तकिल्बिषत्रासमितिहासमिह शृणु ॥ ६७ ॥
आसीत् स्वधर्मनिरतैर्जनैरन्वर्थतां गतम्।
तुङ्गभद्रानदीतीरे नाम्ना पत्तनमुत्तमम् ॥ ६८ ॥
तत्र त्रयीपारदृश्वा धर्मविश्वासधन्यधीः।
आत्मदेव इति ख्यातो भूदेवोऽभून्महाधनः ॥ ६९ ॥

---

(१) उत्पन्नपञ्चमहापातकान्। ब्रह्महत्या–सुरापानं–स्वर्णस्तेयं–गुरुतल्पगमनम् एतच्चतुष्टयदुष्टजनसंसर्गः–इति पञ्च महान्ति पातकानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आरब्धव्यर्थकलहा प्रदर्शितदुराग्रहा ।
लोकप्रवृत्तिसश्रद्धा बद्धवैरा स्वबन्धुभिः ॥ २७० ॥
तस्याऽऽसीत् सञ्चितधना प्रवीणा गृहकर्मणि ।
प्रिया भार्या धुन्धुलीति नव्यभव्यतराकृतिः ॥ ७१ ॥
सयौवनौ सानुरागौ सधनौ तौ च दम्पती ।
मुने ! सांसारिकं सौख्यं भुञ्जाते स्म यथारुचि ॥ ७२ ॥
यथावयो यथाप्रीति यथावैभवमेतयोः ।
दिवसा ययुरज्ञाताः शर्म निर्विशतोः[2] सतोः ॥ ७३ ॥
आसन्नयौवनान्तोऽथ यथावित्तं यथामति ।
सदारः स्वर्णदानादि सन्तानाय चकार सः ॥ ७४ ॥
हतोपायतया सोऽथ विषादविवशीकृतः ।
अज्ञात एव निरगादगाराद्दैवनोदितः ॥ ७५ ॥
स भ्रमन् विपिनं प्राप्य विचेता इव सर्वतः ।
दूरात् पुरः समायान्तं कं चिद्यतिमवैक्षत ॥ ७६ ॥
पश्यँल्लोकोत्तराकारं भिक्षुमेष विचक्षणः ।
विषादस्याऽवश्यमेव पारं प्राप्तममन्यत ॥ ७७ ॥
अथोपसृत्य पदयोर्निपत्य यतिनः पुरः ।
साश्रुनेत्रः सोऽवतस्थे नतमौलिः कृताञ्जलिः ॥ ७८ ॥
तं तादृशमवेक्ष्यैव किमित्थमवसीदसि ।
कोऽसि किं वाञ्छसीत्यूचे दयापूर्णमतिर्यतिः ॥ ७९ ॥
स चारण्यप्रवेशान्तं स्ववृत्तान्तमशेषतः ।
निवेद्य रुद्धकण्ठोऽपि सगद्गदमभाषत ॥ २८० ॥
सोऽहं महामुने ! दुःखादस्मान्हातुमिहागतः ।
दृष्टोऽस्मि दुरदृष्टोऽपि भवता सर्वदर्शिना ॥ ८१ ॥

(१) द्वाभ्यां युग्मकम् । (२) निर्विशतोः भुञ्जानयोः । निर्वेश उपभोगः इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं ममैतेन देहेन धनेन भवनेन वा ।
अचिरेणैव पुंन्नाम्नि[1] निरये निपतिष्यतः ॥ ८२ ॥
सप्रहर्षमनुत्सृष्टं पुत्रोपनयनादिषु ।
सकष्टमर्जितं स्वेन धिक् प्रभूतं धनं मम ॥ ८३ ॥
[2]अश्नीतपिबताप्रीतशिशुवर्गविवर्जितम् ।
गृहस्थतादुःस्थमतेर्धिग्बृहद्वैभवं मम ॥ ८४ ॥
अश्रूयमाणविहरद्धसद्बालजनध्वनि ।
[3]अनध्वनीनसंबाधं धिक् तच्च भवनं मम ॥ ८५ ॥
[4]प्रतिमासं प्राप्तखेदान् रिक्तोत्सङ्गानमङ्गलान् ।
नितान्तमलिनाकारान् धिग् दारान् मम दुर्भगान् ॥ ८६ ॥
[5]निवापदुरवापत्वव्याकुलाखिलपूर्वजम् ।
निरानन्दं निरुत्साहं धिङ् मामजनितप्रजम् ॥ ८७ ॥
अव्यक्तबालकालापसुधापानविनाकृतम् ।
विगर्हितं शास्त्रविद्भिर्धिगिदं मम जीवितम् ॥ ८८ ॥
बन्ध्यधेनोर्बन्ध्यतरोरधन्यस्य विषीदतः ।
मुने ! [6]जघन्यभाग्यस्य का शोभा मम जीवतः ॥ ८९ ॥

---

(१) अनपत्यानां हि जनानां पुन्नाम्नि नरके निपातः श्रूयते ।

(२) अश्नीत पिबत यस्यां क्रियायां सा अश्नीतपिबता क्रिया; तया प्रीतैः शिशुवर्गैर्विवर्जितम् ।

(३) नास्ति अध्वनीनानां पथिकानां संबाधः संमर्दो यस्मिन् । अनपत्यभवनं हि बुद्धिमन्तोऽतिथयः परिहरन्ति । संकटं ना तु संबाध इत्यमरः । अध्वनीनोऽध्वगोऽध्वन्य इति च ।

(४) मासि मासि रजोदर्शनाद्भग्नमनोरथान् इत्यर्थः ।

(५) निवापस्य श्राद्धतर्पणादेः दुरवापत्वेन दौर्लभ्येन व्याकुलाः अखिलाः पूर्वजाः पितरः यस्य तम् । पितृदानं निवापः स्यादित्यमरः ।

(६) जघन्यभाग्यस्य अधमभाग्यस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसन्नग्रीष्मकालस्य शिष्टस्वल्पतराम्भसः।
तडागस्येव जीर्णस्य का शोभा मम जीवतः॥ २९०॥
फलच्छायाविहीनस्य निःशाखस्याऽध्ववर्तिनः।
तरोरिव निरग्रस्य का शोभा मम जीवतः॥ ९१॥
तदद्य दुर्धरान् प्राणान् वयसोऽर्धे विमुञ्चतः।
भवच्चरणपाथोजद्वयं तीर्थायतां मम॥ ९२॥
इति श्रुत्वा व्यक्ततापान् विलापान् मुद्रितेक्षणः।
क्षणं ध्यात्वा व्याजहार स यतिर्धुन्धुलीपतिम्॥ ९३॥
भूदेव ! कृतविद्योऽपि किं त्वमेवं विषीदसि।
अजेयमखिलैर्लोकैर्भागधेयं जिगीषसि॥ ९४॥
'निःस्वताम्लानमुखतां श्रीसमुज्ज्वलतामपि।
प्राक्कर्मरूपा नियतिः प्राणभृद्भ्यः प्रयच्छति॥ ९५॥
बहुविद्याकुशलतां हतां बालिशतामपि !
प्राक्कर्मरूपा नियतिः प्राणभृद्भ्यः प्रयच्छति॥ ९६॥
प्रजासमृद्धिसुखितामप्रजत्वार्ततामपि।
प्राक्कर्मरूपा नियतिः प्राणभृद्भ्यः प्रयच्छति॥ ९७॥
अवेदि कोविद ! मया त्वल्ललाटाक्षरावलिः।
इत आसप्तमं जन्म सन्ततिर्न भविष्यति॥ ९८॥
कथं चित् प्राप्तपुत्रोऽपि दुराग्रहपरायणः।
अनुतप्स्यासि दुःखेन राजर्षिः सगरो यथा॥ ९९॥
स्वकीयं कटुकं कर्म जोषं भुङ्क्ते पुरातनम्।
सन्तोषमन्तराधाय नितान्तमधुरं सुधीः॥ ३००॥
इति श्रुत्वा यतेरुक्तिमात्मदेवः स्थिरव्यथः।
एष प्राणानुत्सृजामीत्यूचे हतमनोरथः॥ १॥

(१) दारिद्र्यमलिनमुखताम्। (२) अनपत्यत्वदुःखित्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं तादृशं वीक्षमाणो दुराग्रहमुदारधीः ।
यतिरेकं फलं तस्मै वितरिष्यन्नभाषत ॥ २ ॥
अलं प्राणोत्सर्जनेन गृहाणैतत्फलं द्विज ! ।
पत्न्यै प्रदेहि प्रयता सा प्राश्नातु गृहान् व्रज ॥ ३ ॥
आवर्षं सत्यशौचादिशालिनी तव गेहिनी ।
प्रसोष्यते यथाकालं बालमादित्यतेजसम् ॥ ४ ॥
इति दत्त्वा फलं यान्तं यतिं नत्वा दयामयम् ।
द्विजः प्रीतेर्द्रुतपदं प्रपेदे निजमालयम् ॥ ५ ॥

यतिविप्रसंवादः ।

भर्तुः प्रफुल्लात् संप्राप्य धुन्धुली तादृशं फलम् ।
प्रशशंस स्वकीयायाः शुभाया नियतेर्बलम् ॥ ६ ॥
सत्यशौचदयादानप्रमुखान् यतिनोदितान् ।
आकर्ण्य नियमानासीत् सा विषादवशीकृता ॥ ७ ॥
भुक्तपीते बहिर्याते सा भर्तरि विषण्णधीः ।
सख्याः समक्षे साक्षेपमाचचक्षेऽतिनीचगीः ॥ ८ ॥
अनपत्यत्वखिन्नेन सुखसङ्गविघातकम् ।
आनीतं सखि ! पश्येदं मद्भर्त्रा हतकं फलम् ॥ ९ ॥
इदं तपस्विना दत्तं जग्ध्वैव द्वापरं(1) विना ।
भवेयं धृतगर्भाऽहं कृतपापेव कामिनी ॥ ३१० ॥
सन्तानमवश्यं हि प्रार्थनीयं शरीरिभिः ।
अवश्यमेव नारीणां हन्ति सांसारिकं सुखम् ॥ ११ ॥
क्षपणीयाः सखि ! कथं मया वैभवपूर्णया ।
द्विरावृत्ताः पञ्च मासाः सत्रासाः सुखवर्जिताः ॥ १२ ॥
अन्वहं वर्धमानेन गर्भेण चलता सता ।
नन्वहं सखि ! मृद्वङ्गी भवेयं ? धृतजीविता ॥ १३ ॥

---

(1) द्वापरं विना निःसन्देहम् अवश्यम् । सन्देहद्वापरौ इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पीडिता अरुचिच्छर्दिप्रमुखैर्व्याधिभिर्बहूः ।
सगर्भा योषितः स्मृत्वा वेपते मामकं मनः ॥ १४ ॥
तिरश्चीनेन गर्भेण त्यक्तप्राणान् वधूजनान् ।
निरन्तरं स्मरन्त्या मे शतधा दीर्यते मनः ॥ १५ ॥
स्वल्पाहारा स्वल्पनिद्रा विविधव्याधिबाधिता ।
हीयमानबला नालं भवेयं गृहकर्मणे ॥ १६ ॥
पश्यन्ती पशुभिः शस्यमश्यमानमितस्ततः ।
कथङ्कारं बहिर्यायां वारंवारं महोदरी ॥ १७ ॥
संजातावसरा प्राप्य विप्रकीर्णमितस्ततः ।
सानन्दाऽपहरेत्कुप्यं' ननन्दा विविधं मम ॥ १८ ॥
पुरेऽत्र याचकाऽऽकीर्णे दयावत्या मया सखि ! ।
सत्यं वदन्त्या सर्वस्वं कथं स्याद् ब्रूहि रक्षितम् ॥ १९ ॥
मलापकर्षणेऽशक्ता रुचितानवदुर्बला ।
उचितामपि नाधातुं शुचितां सखि ! शक्नुयाम् ॥ ३२० ॥
धार्मिकीं स्थितिमाधातुं त्रातुं च विपुलं धनम् ।
भर्तारमनुरुन्धत्या नारुन्धत्याऽपि शक्यते ॥ २१ ॥
कदर्थिता सन्ततिभिः प्रसूता दुर्भगा वधूः ।
बन्ध्या तु नित्यतारुण्या सपुण्या सुभगा वधूः ॥ २२ ॥
अधन्या मुग्धधीः प्राप्तबन्धना सधवा वधूः ।
स्निग्धे ! निर्बन्धना धन्या विदग्धा विधवा वधूः ॥ २३ ॥
सद्यःप्रसूता बीभत्सदर्शनाः प्राप्तयातनाः ।
स्मरन्त्या एव सखि ! मे रोमाञ्चः पश्य जायते ॥ २४ ॥
अपत्यहितमाधातुं नित्यं पत्या कदर्थिता ।
तथ्यं वच्मि न जीवेयं सखि ! पथ्यपरायणा ॥ २५ ॥

(१) सुवर्णरजतभिन्नं द्रव्यम् । ताभ्यां यदन्यत्तत्कुप्यम्-इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादिकं तर्कशतं कुर्वाणा दैववञ्चिता ।
तत् फलं नैव बुभुजे सा सखीदत्तसंमतिः ॥ २६ ॥

धुन्धुलीदुर्विमर्शः ।

प्रत्यावृत्तेन सा पृष्टा पत्या प्रीत्याऽपि निष्ठुरा ।
भुक्तं भुक्तमिति प्रोचे हसन्त्युच्चतरस्वरा ॥ २७ ॥
नवीनगर्भामनुजां कदाचिद्गृहमागताम् ।
[१]दुर्गतां वशयामास विविधैः सा प्रलोभनैः ॥ २८ ॥
"पतिं प्रसाद्य दास्यामि जातमात्रं शिशुं तव" ।
इति प्रतिश्रुतवतीं साऽनुजां स्वामतूतुषत् ॥ २९ ॥
अथ स्वीयं प्रशंसन्ती तादृशं कौशलं हृदा ।
तोषयामास भर्तारं सा प्रदर्शितदौहृदा ॥ ३० ॥
आत्मदेवः शिथिलितावयवायाः स्वयोषितः ।
[२]उत्क्लेशदर्शनादेव बभूव क्लेशवर्जितः ॥ ३१ ॥
यतिदत्तं फलं स्मृत्वा विफलं मा भवत्विति ।
धुन्धुली धेनवे प्रादात्तेनागात् सा सगर्भताम् ॥ ३२ ॥
वीक्ष्य पत्न्याः कुक्षिमुच्चैः सिचयोच्चयसंवृतम् ।
पतिस्त्वं निभृतं तिष्ठेत्यूचे वाचाऽतिनीचया ॥ ३३ ॥
कृतप्रबन्धा समये जातमात्रं प्रहर्षिता ।
धुन्धुलीं प्रापयामास स्वकीयं भगिनी सुतम् ॥ ३४ ॥
आसन्नप्रसवीभूय सा सखीभिः समावृता ।
पश्य सूनुरलम्भीति स्वं भर्तारमसूसुचत् ॥ ३५ ॥
"दिष्ट्या ! सफलतां याता मनोरथलता मम" ।
इति जल्पन्नात्मदेवः सूतिकासदनं ययौ ॥ ३६ ॥

---

(१) दुर्गतां दरिद्राम् । दरिद्रो दुर्गतोऽपि सः इत्यमरः ।

(२) उत्क्लेशो मुहुर्निष्ठीवनहेतुरह्ययरसोद्गारमयो गार्भिण्यादे रोगविशेषः । तद्दर्शनादात्मदेवोऽनपत्यत्वजन्यं क्लेशं जहौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दारकोत्पत्तिमुदितो यथाचारं यथाविधि ।
उदारतां समालम्ब्य जातकर्म चकार सः ॥ ३७ ॥
"अप्रस्नवत्कुचयुगा बिभर्मि कथमर्भकम् ।
सद्यःपरेततनुजामनुजां मे त्वमाह्वय" ॥ ३८ ॥
इति पत्न्या समादिष्टः स च प्रचुरवैभवः ।
चक्रे सादरमाहूय श्यालिकां पुत्रपालिकाम् ॥ ३९ ॥
एकादशेऽहनि कृते विधिवद्धवनादिके ।
धुन्धुली धुन्धुकारीति नाम चक्रे स्वयं शिशोः ॥ ३४० ॥
सौम्यशीला जग्धफला ततो मासद्वयान्तरे ।
आदित्यवर्णं गोकर्णं दिव्यं सुतमसूत गौः ॥ ४१ ॥
मूर्तौ समानं देवेन कर्णयोः सदृशं गवा ।
द्युतौ तुल्यं तमर्केण हर्षात्प्रैक्षन्त मानवाः ॥ ४२ ॥
आत्मदेवो लब्धवर्णवर्णनीयगुणावलेः[1] ।
काले नाम चकाराऽस्य गोकर्ण इति हर्षितः ॥ ४३ ॥
वृत्तेन वपुषा बुद्ध्या विभिन्नौ तौ परस्परम् ।
धुन्धुलीधेनुतनयौ ववृधाते यथोत्तरम् ॥ ४४ ॥
आत्मदेवो यथाकालं तयोः समुपनीतयोः ।
अध्यापनाय विदधे प्रयत्नमधिकं सुधीः ॥ ४५ ॥
धौन्धुलेयो मलिनधीरासीन्मूर्खजनाग्रणीः ।
गोकर्णोऽभूद्बुद्धिपूर्णस्तूर्णमेव विचक्षणः ॥ ४६ ॥
अधन्यधीर्धुन्धुकारी हर्षयन् द्विषतो जनान् ।
सुहृदः खेदयन् सर्वान् युवभावमवाप सः ॥ ४७ ॥
वर्जयन्नीचसंसर्गमर्जयन्नुच्चतां धियः ।
युवाऽप्यभूज्ज्ञानवृद्धो गोकर्णः प्राणिनां प्रियः ॥ ४८ ॥

(१) लब्धवर्णैः पण्डितैः वर्णनीया प्रशंसनीया गुणावलिः यस्य तस्य । लब्धवर्णो विचक्षणः इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्तस्नानस्त्यक्तसन्ध्योपासनः कृतमण्डनः ।
चचार धुन्धुलीसूनुः स्वपितुः खण्डयन् मनः ॥ ४९ ॥
अकृत्वैव श्रुतिगतमुपदेशशतं पितुः ।
स विवेशाऽसभ्यवेशः प्रत्यहं वेशमुद्धतः ॥ ३५० ॥
विटसंसर्गमासाद्य स निसर्गेण दुर्जनः ।
अभूत् प्राप्तक्ष्वेडपानो निस्त्रिंश इव दारुणः ॥ ५१ ॥
भुजङ्गाननुरुन्धानः[1] प्रददानः स्वकं वसु ।
भुञ्जानस्तामसं भोज्यं मोदमानश्चचार सः ॥ ५२ ॥
वेश्यामावर्जयन्नेष पितुर्विद्वेषमाचरन् ।
सर्वं विनाशयामास पूर्वजैरर्जितं धनम् ॥ ५३ ॥
स दग्ध्वा तृणवच्चूर्णमृणतोऽप्यर्जितं धनम् ।
असंकुचन्नेव चौर्यमाचचारातिनीचधीः ॥ ५४ ॥
प्रताड्य प्रतिबध्नन्तौ पितरौ कृतरोदनौ ।
जहार पिठरादीनि[2] स कठोरमतिः शठः ॥ ५५ ॥

धुन्धुकारिदुराचाराः ।

अनिवार्यां तस्य दशां तादृशीं वीक्ष्य दुःखितः ।
आत्मदेवो विमुक्ताश्रुर्विललाप सगद्गदः ॥ ५६ ॥
धिग्धिग्धिगीदृशं पुत्रं दुर्वृत्तं कुलकज्जलम् ।
धिग्धिग्धिगीदृशं भाग्यं प्रतिक्षणमनुज्ज्वलम् ॥ ५७ ॥
हन्त ! नष्टोऽस्मि नग्नोऽस्मि भग्नमानोऽस्मि हा ! हरे ! ।
विधे ! क्व यामि ? मग्नोऽस्मि पङ्केऽस्मिन्नतिदुस्तरे ॥ ५८ ॥
कृतं पुत्रेण कर्तव्यं दारेभ्यः शतशो नमः ।
एते गृहाः प्रदह्यन्तां प्राणैरेतैरलं मम ॥ ५९ ॥
इति व्याकुलतां प्राप्य विलपन्तं जरातुरम् ।
तमुपागम्य गोकर्णः प्रणम्योच्चैरवोचत ॥ ३६० ॥

(१) भुजङ्गान् विटान् । (२) पिठरादीनि स्थाल्यादीनि पात्राणि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असारमेव संसारं जानानोऽपि भवादृशः।
शोचतीति महामोहः सहासान् कुरुते जनान् ॥ ६१ ॥
विचक्षणेन मूर्खेण जीवितेन मृतेन वा।
हन्त ! दग्धाः प्रदृश्यन्ते प्रायः पुत्रेण जन्तवः ॥ ६२ ॥
आपातमात्रसरसैः किं ? तात ! क्षणभङ्गुरैः।
दीनारैर्दारिकैर्दारैर्दूयन्ते दीर्घदर्शिनः ॥ ६३ ॥
कः पिता का च जननी कः पुत्रः के च बान्धवाः।
वृथैव तात ! पीड्यन्ते महामोहेन मानवाः ॥ ६४ ॥
सञ्चयेन निबध्यन्ते वस्तुनः काञ्चनादिनः।
(१)आकिञ्चन्येन मुच्यन्ते जना इति विचारय ॥ ६५ ॥
बोधाय सेवितः सद्भिरधीतनिगमागमः।
स्वयमित्थं शोकजातमबोधं तात ! मा गमः ॥ ६६ ॥
यत् सौख्यं वीतरागस्य वने निवसतो यतेः।
न तत्सौख्यं धनपतेर्न तत्सौख्यं प्रजापतेः ॥ ६७ ॥
व्यामोहदा पातहेतुर्मतिमद्भिस्तिरस्कृता।
सुरेव ममता तात ! न स्प्रष्टुमपि युज्यते ॥ ६८ ॥
स्नेहस्य हतकस्याऽस्य परिणामोऽतिदारुणः।
पीड्यन्ते हि पितः ! प्रीतैः स्नेहवन्तस्तिला इव ॥ ६९ ॥
न कर्मणा न प्रजया मृत्युः प्रतिविधीयते।
अमृतत्वाय जीवानां त्यागः श्रुत्या विधीयते ॥ ३७० ॥
(२)परेण नाकं निहितं गुहायां वस्तु वाञ्छता।
श्रयणीया गृहान् हित्वा गिरेरेव गुहा सता ॥ ७१ ॥

(१) आकिञ्चन्येन अकिञ्चनत्वेन. सर्वत्यागेनेत्यर्थः।
(२) गृहान् अजहता जनेन गुहायां निहितं वस्तु न लभ्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन विपरीतेन संसारेण कदर्थितः ।
[1]आदातुमवनं धीमान् वनमेवाऽवगाहते ॥ ७२ ॥

इत्यात्मदेव आकर्ण्य गोकर्णस्य सरस्वतीम् ।
निःशल्य इव कल्याणीमाससाद दशां पुनः ॥ ७३ ॥

आत्मदेवोपदेशः

[2]" अन्धकूपात् समुद्धृत्य प्रेषितस्य वनं प्रति ।
प्रत्यहं मम कर्तव्यं प्रीत्या गोकर्ण ! वर्णय " ॥ ७४ ॥

इति प्रेम्णा प्रब्रुवाणं तं गोकर्ण उदारधीः ।
प्रत्यवोचत हर्षेण द्राक्षापाकसदृक्षगीः ॥ ७५ ॥

आदेहमखिलं वस्तु गत्वरं प्रति निःस्पृहः ।
सत्वरं सदनं हित्वा वस त्वं तात ! कानने ॥ ७६ ॥

त्वङ्मांसमेदोरुधिरमज्जशुक्रादिनिर्मिते ।
अनासक्तमतिर्देहे वस त्वं तात ! कानने ॥ ७७ ॥

दायादान् द्रविणं दारान् दुःखदान् दूरयन् हृदः ।
निरन्तरं जातशान्तिर्वस त्वं तात ! कानने ॥ ७८ ॥

ऐहिकामुष्मिकान् भोगान् रोगानिव धिया त्यजन् ।
विरक्तमानसतया वस त्वं तात ! कानने ॥ ७९ ॥

अनुरक्तेर्नातिरिक्तां भक्तिमाधाय चेतसि ।
सेवमानः कृष्णदेवं वस त्वं तात ! कानने ॥ ३८० ॥

निधाय ध्यानयोगेन साधुना माधवं हृदि ।
विस्मृत्य सकलं वस्तु वस त्वं तात ! कानने ॥ ८१ ॥

---

(१) " यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसाऽपि न कृतं तदिहाभ्युपैति " एवमादिभिः सुभाषितशतैरावेद्यमानां सांसारिकीं प्रकृतिमजानन् पामरो जनः अवनं (रक्षां) न क्वापि लभते । तादृशीं सांसारिकीं प्रकृतिं विदन् सुधीजनस्तु अवनं लब्धुं वनं प्रविशति, लभते च तत्र तद्, इति वैदुष्यमवश्यमाश्रयणीयमिति भावः।

(२) द्वाभ्यामन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्रित्य परमं धर्मं ग्राम्यधर्मपराङ्मुखः ।
वीतदुःखः प्राप्तसुखस्त्वं तात ! वस कानने ॥ ८२ ॥
आराधयन् साधुजनान् दुर्जनान् परिवर्जयन् ।
वीततृष्णः कृष्णसेवी वस त्वं तात ! कानने ॥ ८३ ॥
कृतोपेक्षः सदसतोः सतोषमुदितान्तरः ।
विश्वम्भराश्रयपरस्त्वं तात ! वस कानने ॥ ८४ ॥
अन्यत्कर्तुमशक्तोऽपि गायन् भगवतो गुणान् ।
अहर्निशं जातभक्तिर्वस त्वं तात ! कानने ॥ ८५ ॥
इति पुत्रस्य वचनाद्गात्रमात्रपरिग्रहः ।
हरिं परिचरिष्यन् स परिवव्राज धीरधीः ॥ ८६ ॥
सानन्दो वर्तयन्देहं कन्दमूलफलादिभिः ।
शरण्यं शिश्रिये सोऽयं नारायणमरण्यगः ॥ ८७ ॥
सभक्ति दशमं स्कन्धं नित्यमावर्तयन्नयम् ।
१४९ अचिरादात्मदेवोऽगान्नारायणपदद्वयम् ॥ ८८ ॥

इत्यात्मदेवगोकर्णाऽऽलापतस्तापशान्तिदः ।
परिवार्धितचातुर्योऽध्यायस्तुर्योऽप्ययं गतः ॥ ४ ॥

इतश्च नारद ! गते वनं पितरि हर्षितः ।
औद्धत्यमधिकं भेजे हतश्रीर्धुन्धुलीसुतः ॥ ८९ ॥
विविधैः कर्मभिः क्रूरैर्वचोभिस्तस्य निष्ठुरैः ।
कठोरैश्च पदाघातैर्धुन्धुली भूरि विव्यथे ॥ ३९० ॥
पतित्यक्ता गतवया नष्टवित्ता सुताऽऽहता ।
अधीरधीर्मुक्तकण्ठमुच्चकैर्विललाप सा ॥ ९१ ॥
देववत्सेवनीयस्य पत्युराज्ञामलङ्घिषि[1] ।
आः ! फलं प्राप्तवत्यसि तस्य पापस्य कर्मणः ॥ ९२ ॥

(१) अलङ्घिषि अलङ्घयम् लङ्घतेर्लुङ् । इतः प्रभृति समस्तु पद्येषु तत्तद्धातुभ्यो लुङ् लकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाऽभौक्षं भिक्षुणा दत्तं प्रसादं मदशालिनी ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९३ ॥
सतीः स्वधर्मनिरता धृतगर्भा अगर्हिषि ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९४ ॥
प्राशंसिषं मुक्तबन्धा इत्यहं विधवा वधूः ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९५ ॥
अनिन्दिषं प्राप्तबन्धा इत्यहं सधवा वधूः ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९६ ॥
प्रातीतरं स्वभर्तारं प्रीतिमन्तं तपस्विनम् ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९७ ॥
अभैषं सत्यसन्तोषशौचदानदयादितः ।
आः ! फलं प्राप्तवत्यस्मि तस्य पापस्य कर्मणः ॥ ९८ ॥
पत्युरीदृग्विधं दुःखमादधाना कुलक्षणा ।
नाहं जन्मशतेनाऽपि पाप्मनः शुद्धिमाप्नुयाम् ॥ ९९ ॥
परिस्थितिं समुल्लङ्घ्य दुराचारा पुरातनीम् ।
हताऽस्मि सुभगम्मन्या गतास्ते हन्त ! वासराः ॥ ४०० ॥
यदीतोऽप्यधिकां पीडामकरिष्यत् स्वगर्भजः ।
तदाऽपि कर्हिचिन्नेत्थमभविष्यं विषादिनी ॥ १ ॥
चेदज्ञास्यत् तमुद्वृत्तं परगर्भसमुद्भवम् ।
अनेष्यत् सानुकम्पो मां सहैव विपिनं पतिः ॥ २ ॥
स्वयं कृतापराधाऽस्मि हतधीर्बत ! संप्रति ।
कमाक्रन्दामि कं याचे को मे दुःखं हरिष्यति ॥ ३ ॥
नमोऽस्तु मम कर्मभ्यो धिग्भाग्यं मम धिग्जनुः ।
तत्तादृशी सती हन्त ! द्रुतं जाताहमीदृशी ॥ ४ ॥

(१) प्रतारयतेर्वञ्चनार्थकाल्लुङ् । उत्तमः पुरुषः । (२) क्रियातिपत्तौ लृङ् एवमुत्तरत्राऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पार्ष्णिनिष्ठुराघातैः प्राणान् स्वस्थानतश्च्युतान् ।
करोमि हन्त ! स्ववशा स्वयमेव विसर्जितान् ॥ ५ ॥

धुन्धुलीपश्चात्तापः ।

इत्थं निराश्रयीभूय शोचन्ती सा मुहुर्मुहुः ।
दुर्धरान् कूपपातेन निशि प्राणानमुञ्चत ॥ ६ ॥
महर्षे ! वृत्तमेतादृक् तीर्थयात्रार्थनिर्गतः ।
न जानाति स्म गोकर्णः शिलास्वर्णसमानधीः ॥ ७ ॥
ततश्च चौर्यवृत्त्यैव वर्तमानः समुद्धतः ।
आनिन्ये पञ्च वेश्म स्वं बन्धकीर्धुन्धुलीसुतः ॥ ८ ॥
स जातु ता वारयोषास्तोषयन् भूषणादिभिः ।
मुमोष धनचुञ्चूनां(१) कोषतः प्रचुरं धनम् ॥ ९ ॥
गृहीत वित्तनिचयं सिचयादि सभूषणम् ।
परिधत्त प्रियाः ! स्वैरमित्यायातोऽभ्यधत्त सः ॥ ४१० ॥
तास्तथा तादृशं वित्तमानीतं प्रेक्ष्य हर्षिताः ।
प्रशस्य तं रहस्येतं युक्त्वा मन्त्रमकुर्वत ॥ ११ ॥
वित्तमाहृतमेतावद् यावज्जीवं सुखाय नः ।
भविष्यति यदि त्वेतन्न विनाशं गमिष्यति ॥ १२ ॥
नूनं सत्यश्चारचक्षुर्नृपतिश्चोरमीदृशम् ।
निगृह्य सर्वमेतन्नः सनिकारं ग्रहीष्यति ॥ १३ ॥
तद्वरं वयमेवैनं निहत्य धनसञ्चयम् ।
समादाय शनैर्याम जनैरनुपलक्षिताः ॥ १४ ॥
इति नारद ! निश्चित्य ताः सर्वाः कर्कशाशयाः ।
मारणावसरार्थिन्यस्तं निन्युर्मदमूढताम् ॥ १५ ॥
निशि तस्य प्रसुप्तस्य पाणी पादौ च रज्जुभिः ।
बध्वा दृढं गले पाशं ददुः कुलिशकर्कशाः ॥ १६ ॥

(१) धनेन वित्ताः (प्रसिद्धाः) धनचुञ्चवः तेषाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः प्राणाननुत्क्रान्तान् प्रेक्ष्य तास्तप्तमानसाः ।
प्राक्षिपँस्तन्मुखे तप्तं भस्माङ्गारसमुच्चयम् ॥ १७ ॥
इति व्यापाद्य तं गर्ते कृत्वा तं च यथास्थिति ।
प्रपूर्य वेश्यानिवहस्तस्थौ निष्कल्मषाकृतिः ॥ १८ ॥

धुन्धुकारिदुर्मरणम् ।

यदृच्छया समागत्य पृच्छतः प्रतिवेशिनः ।
अर्जयन्निर्गतः स्वामीत्यूचिरे ताः कृतस्मिताः ॥ १९ ॥
जडा अपि स्वयं पुंभिश्चेतनत्वमवापिताः ।
स्त्रियस्तानेव बध्नन्ति मुने ! प्रकृतयो यथा ॥ ४२० ॥
अतनुज्वरतप्तेन पुरुषेण निषेविता ।
अबला संनिपाताय श्रीखण्डद्रवशीतला ॥ २१ ॥
चित्तेन क्षुरधारेण गोपितेनाऽपि सर्वतः ।
मुण्डिता वारयोषिद्भिर्दृश्यन्ते धनिनो जनाः ॥ २२ ॥
मा भून्मालिन्यमिति या नीताः सस्नेहतां स्त्रियः ।
शिरश्छिन्दन्ति ता एव नृणामसिलता इव ॥ २३ ॥
वृश्चिकाः परुषास्तेभ्यः परुषाः कृष्णपन्नगाः ।
तेभ्योऽपि नेत्रान्तविषाः परुषा वारयोषितः ॥ २४ ॥
आ एवं दुरिताचारी वारनारीपरायणः ।
परकीयद्रव्यहारी धुन्धुकारीव नश्यति ॥ २५ ॥
अप्राप्तोचितसँस्कारः सद्य एव स दुर्मृतः ।
प्रेतभावं समासाद्य चचार परितो गृहान् ॥ २६ ॥
अनवाप्तोचिताहारः पिपासाव्याकुलान्तरः ।
शीतातपार्तः साक्रन्दः स बभ्राम समन्ततः ॥ २७ ॥
चिरेण मरणं प्राप्तं तं ज्ञात्वा सुरभीसुतः ।
श्राद्धं तस्याऽपि विदधे यथाश्रद्धं गयादिषु ॥ २८ ॥
तीर्थयात्रावसानेऽथ रात्रावेष गृहागतः ।
अलक्षित उपालिन्दं निदद्रौ प्रचुरश्रमः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथो निशीथे संप्राप्ते मेषमेकं महत्तरम् ।
एष उन्मीलिताक्षः सन् पश्यति स्म पुरश्चरम् ॥ ४३० ॥
अनिमेषतया मेषं वीक्षमाणः क्षणान्तरे ।
तमेव महिषाकारं स्पष्टमेव व्यचष्ट सः ॥ ३१ ॥
तं पश्यन्नेव साश्चर्यमुच्चपीवरविग्रहम् ।
स्थितं विनैव यन्तारं स दन्तावलमैक्षत ॥ ३२ ॥
क्षणादवेक्षमाणस्तं क्षपितध्वान्तमण्डलाम् ।
विशालां दहनज्वालामतिलोलां ददर्श सः ॥ ३३ ॥
दत्तदृष्टिस्तत्र सोऽयमद्राक्षीदुपरि क्षितेः ।
युक्तं दृष्टिसहस्रेण साक्षात्पौरन्दरं वपुः ॥ ३४ ॥
स तर्कयन्नेव पुनः पुरुषं लोलचक्षुषम् ।
दयनीयाकृतिजुषं बृहद्वपुषमैक्षत ॥ ३५ ॥

धुन्धुकारिप्रेतदशा

ततश्च "कोऽसि, किमिदं कुरुषे, किं नु वाञ्छसि" ।
इति पप्रच्छ तमसौ धीरधीर्धेनुनन्दनः ॥ ३६ ॥
स तु वक्तुमशक्तः सन् गोकर्णं करुणामयम् ।
सुव्यक्तं ज्ञपयामास संज्ञया निजमाशयम् ॥ ३७ ॥
अथ तत्तत्तीर्थजलैर्विमलैर्धेनुसूनुना ।
अभिषिक्तः पापमुक्तः प्रेतो वक्तुं प्रचक्रमे ॥ ३८ ॥
भ्रातर्गोकर्ण ! हतधीर्गतश्रीः कृतकिल्बिषः ।
वेश्याहतः प्रेतभावं प्राप्तोऽहं धुन्धुलीसुतः ॥ ३९ ॥
एतेन प्रेतभावेन यातनाशतहेतुना ।
अनेकधा खिद्यमानं मामुद्धर निराश्रयम् ॥ ४४० ॥
[1]इति प्रेतोक्तिमाकर्ण्य गोकर्णः करुणामयः ।
न मुक्तोऽसि गयाश्राद्धाद्यथाविधिकृतादपि ॥ ४१ ॥

(१) द्वाभ्यामन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद् ब्रूहि येन मुक्तः स्यास्तदहं त्वत्कृते द्रुतम् ।
यथामति यथाशक्ति करिष्यामीत्यभाषत ॥ ४२ ॥
ततः प्रेतो विनिःश्वस्य स्मरन् कर्माणि चेतसा ।
निरुद्धकण्ठो मुक्ताश्रुः सगद्गदमभाषत ॥ ४३ ॥
गयाश्राद्धशतेनापि मया मुक्तिर्न लभ्यते ।
ततः श्रेष्ठतरं कर्म कुरु कष्टनिवृत्तये ॥ ४४ ॥
इति प्रेतवचः श्रुत्वा तिष्ठ तावद्यथास्थितम् ।
प्रयतिष्ये त्वद्धितायेत्युवाच सुरभीसुतः ॥ ४५ ॥
ततः प्रेते विनिर्याते प्रभाते सति सर्वतः ।
गोकर्णं प्राप्तमाकर्ण्य समाजग्मुः पुरौकसः ॥ ४६ ॥
स आख्याय प्रेतवृत्तं तन्मुक्त्यै ज्ञानिनो जनान् ।
समागतान् सतः सर्वानपृच्छत् साश्रुलोचनान् ॥ ४७ ॥
ते च प्रोचुर्ज्ञानवयोवृद्धाः प्रेतविमुक्तिदम् ।
किन्तु ? स्यात् कर्म नो विद्मो गयाश्राद्धशताधिकम् ॥ ४८ ॥
प्राप्तयोगबलः पृच्छ गोकर्ण ! प्रकृतं स्वयम् ।
त्रिलोकीसाक्षिणं देवं सूर्यमेनं त्रयीमयम् ॥ ४९ ॥
इति श्रुत्वा स सर्वेषामुपपत्तिमतीं गिरम् ।
तमर्थं भावयामास कृत्वा लोलं मनः स्थिरम् ॥ ४५० ॥
योगर्द्धिरुद्धगमनं भगवन्तमहर्मणिम् ।
नतेन मूर्ध्ना प्रणमन् स प्रावोचत साञ्जलिः ॥ ५१ ॥
नमस्तुभ्यं त्रयीमूर्ते ! जगन्नेत्र ! प्रभाकर ! ।
प्रेतमुक्त्युपदेशेन व्याकुलं मां समुद्धर ॥ ५२ ॥
इति गोकर्णवचनं समाकर्ण्य ग्रहाग्रणीः ।
हरन् विषादं सर्वेषां व्याजहार विदूरतः ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जहाति[1] गर्हितं वेश्म[2] जिहीते[3] धाम वैष्णवम् ।
नगाहश्रवणात्[4] प्रेतः पुनर्गर्भं न गाहते ॥ ५४ ॥
इति श्रुत्वा धेनुसूनुर्गिरं भानोर्यथाविधि ।
सप्ताहवाचनं कर्तुं प्रतिजज्ञे स्वयं सुधीः ॥ ५५ ॥

प्रेतोद्धारमीमांसा ।

श्रीसूर्येण समादिष्टं गोकर्णेन प्रकीर्तितम् ।
सप्ताहं श्रोतुमाजग्मुः सश्रद्धाः सर्वतो जनाः ॥ ५६ ॥
मन्दैरन्धैर्जडैर्मूकैः पङ्गुभिश्च सभक्तिभिः ।
इतरैश्चागतैः श्रोतृसमाजो ववृधेतराम् ॥ ५७ ॥
सोऽपि मण्डपमागत्य प्रेतोऽलब्धवपुर्धृतिः ।
वेणुपर्वच्छिद्रमध्यं विवेश पवनाकृतिः ॥ ५८ ॥
अथ प्रेतसमुद्धारबद्धबुद्धिः शुभेऽहनि ।
आरेभे धेनुभूर्वक्तुं गम्भीरमधुरध्वनिः ॥ ५९ ॥
श्रोतारं वैष्णवं विप्रं स प्रकल्प्य जितेन्द्रियम् ।
आरम्भाद्वाचयामास सन्दर्भं सकलप्रियम् ॥ ४६० ॥
हिरण्याक्षविमोक्षान्तं वाचिते प्रथमेऽहनि ।
उच्चकैः शुश्रुवे वेणुग्रन्थिभेदभवो ध्वनिः ॥ ६१ ॥
एवमेव द्वितीयादिष्वपि घस्रेषु पञ्चसु ।
कथान्ते वैणवो ग्रन्थिः स्फुटति स्म सनिस्वनः ॥ ६२ ॥
समापिते सप्तमेऽह्नि श्रीमद्भागवते ततः ।
यथापूर्वं ध्वनिर्धीरो वंशग्रन्थेर्विनिर्गतः ॥ ६३ ॥
अकस्मादेव तस्माच्च महतो मण्डपान्तरात् ।
आविरासीद्दिव्यमूर्तिः पुरुषस्तपनद्युतिः ॥ ६४ ॥
तुलसीदाम दधतं वक्षसाऽतुलसौरभम् ।
संवीतपीतवसनं कुण्डलद्वयमण्डितम् ॥ ६५ ॥

---

(१) त्यजति । (२) शरीरम् । (३) गच्छति । (४) नगाहः सप्ता
(५) प्रविशति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



यतिप्रसादसंभूतः करुणाकोमलान्तरः।
कृतार्थितचतुर्वर्णो गोकर्णः प्रणिधीयताम् ॥

"गुजराती" प्रिंटिंग प्रेस-मुंबई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किरीटकोटिविलसन्माणिद्योतितमण्डपम् ।
सतोयतोयदश्यामवपुषं विमलत्विषम् ॥ ६६ ॥
तं प्रपश्यन्नशेषोऽपि निर्निमेषतया जनः ।
विस्मयेन सहर्षेण प्रपूर्णं विदधे मनः ॥ ६७ ॥
अथोपसृत्य गोकर्णं स गीर्वाणोत्तमाकृतिः ।
नतमौलिः स्मितमुखः कृताञ्जलिरवोचत ॥ ६८ ॥
प्रेतोद्धारः सप्ताहतः ।
तारितोऽस्मि त्वया साधो ! कृतपापसमुच्चयः ।
अनेन त्वत्प्रसादेन हन्त ! जातोऽस्मि निर्भयः ॥ ६९ ॥
तत्तादृगपि मौर्ख्यं मे श्रीमद्भागवतश्रुतेः ।
सहैव प्रेतभावेन विनष्टं नावशिष्यते ॥ ७० ॥
अहो ! भ्रातर्भागवती धन्या साप्ताहिकी कथा ।
कल्पभोग्यं पापपुञ्जं या नाशितवती तथा ॥ ७१ ॥
दिष्ट्या ! संसारिणः सर्वेऽनुगृहीताः कृतैनसः ।
अहं विमुक्तः किं ? नान्ये विमुच्येरन् सचेतसः ॥ ७२ ॥
कलिकालप्रजातानां पुण्यमार्गमजानताम् ।
नानाकलुषतप्तानां सप्ताहः शरणं नृणाम् ॥ ७३ ॥
वाङ्मनःकर्मजनितं प्रदर्शितमहाभयम् ।
भस्मीकरोति सप्ताहसप्तार्चिः पातकोच्चयम् ॥ ७४ ॥
यैर्न भारतवर्षीयैः पीता भागवती कथा ।
अनिर्वृतानां दुरितैस्तेषामेव जनिर्वृथा ॥ ७५ ॥
मलमूत्रादिपूर्णेन शरीरेण विनाशिना ।
श्वःश्रेयसकरं कर्म साधयन्ति सुबुद्धयः ॥ ७६ ॥
पूर्वेद्युः संस्कृतं भोज्यं परेद्युर्विकृतं विदन् ।
आस्थां सुधीर्न बध्नाति तेन पुष्टे कलेवरे ॥ ७७ ॥
जलाशये जन्तुवर्गे बुद्बुदा मशका इव ।
सत्कर्महीना जायन्ते विपद्यन्ते च भूतले ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धन्या साप्ताहिकी गाथा वैणवग्रन्थिभेदिका ।
हृद्ग्रन्थिव्यथितैर्लोकैः श्रवणीया सभक्तिभिः ॥ ७९ ॥
शुकशास्त्रमये तीर्थे पङ्के प्रक्षालिते सति ।
न जातु जन्तुर्जगति पुनः पङ्केन लिप्यते ॥ ४८० ॥

प्रेतसौभगम् ।

एवं तस्मिन् प्रब्रुवाणे विष्णुभृत्यसमन्वितम् ।
अवाततार शनकैर्विमानं द्युतिमद्दिवः ॥ ८१ ॥
आरोह धुन्धुलीसूनो ! सप्ताहश्रवणार्जितम् ।
एतद्विमानमिति ते विष्णुभृत्या बभाषिरे ॥ ८२ ॥
स च गोकर्णमापृच्छ्य वैकुण्ठार्पितमानसः ।
आरुरोह व्योमयानमुत्कण्ठां जनयन्नृणाम् ॥ ८३ ॥
अन्येषामथ गोकर्णः कथाः श्रुतवतां सताम् ।
पप्रच्छ फलवैषम्यं विष्णुभृत्यान् विमानगान् ॥ ८४ ॥
ते च प्रोचुर्विभेदेन श्रवणस्य यथातथम् ।
एतद्धि फलवैषम्यं श्रोतॄणां समभूदिति ॥ ८५ ॥
पुनः पप्रच्छ गोकर्णः शुश्रूषापूर्णचेतसाम् ।
अभेदि श्रवणं कस्माद्भक्तिभाजां सतामिति ॥ ८६ ॥
तद्गोकर्णस्य वचनं विनीतस्य निशम्य ते ।
छिन्दन्तः संशयं प्रोचुः श्रोतॄणां शृण्वतां सताम् ॥ ८७ ॥
कथाः श्रुत्वा प्रतिदिनं प्रेतो मननमाचरन् ।
कर्मणः साङ्गताहेतोः प्राप्तवानीदृशं फलम् ॥ ८८ ॥
यथातथा श्रुतकथा मननेन विवर्जिताः ।
कथमन्ये जनाः सौम्य ! लभेरन्नीदृशं फलम् ॥ ८९ ॥
कृतोपवासः सश्रद्धः प्रेतोऽपि सुसमाहितः ।
श्रुतवानिति पुण्यस्य पूर्णं फलमवाप्तवान् ॥ ९० ॥
विस्मृत्य देहगेहादि श्रद्धामाधाय चेतसि ।
श्रवणीया यथाबुद्धि मननीया कथा बुधैः ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैथिल्याद्धन्यते ज्ञानं प्रमादाद्धन्यते श्रुतम् ।
सन्देहाद्धन्यते मन्त्रश्चापल्याद्धन्यते जपः ॥ ९२ ॥
कुपात्रसन्निधानेन श्राद्धकर्म निहन्यते ।
अवैष्णवतया साधो ! देश एव निहन्यते ॥ ९३ ॥
अश्रोत्रिये जने दानं क्रियमाणं निहन्यते ।
अनाचारेण च कुलं समृद्धमपि हन्यते ॥ ९४ ॥
समाहितैः सत्त्ववद्भिः श्रद्धाशोधितबुद्धिभिः ।
यथोदितं फलं दत्ते श्रूयमाणा हरेः कथा ॥ ९५ ॥
पुनः सप्ताहमाकर्ण्य श्रोतारोऽत्र समागताः ।
यास्यन्ति वैष्णवं धाम सामरस्यसमाश्रितम् ॥ ९६ ॥
काले प्राप्तस्य गोलोकं श्रीगोविन्दानुकम्पया ।
भवतो भविता नूनं साधो ! नाऽधोगतिस्ततः ॥ ९७ ॥

भगवद्भृत्यभाषितम् ।

इत्युक्त्वा ते धेनुसूनुं धुन्धुलीसुतसंयुताः ।
प्रशंसिताः श्रोतृजनैः प्रययुर्वैष्णवं पदम् ॥ ९८ ॥
अथोद्धाराय सर्वेषां प्राणिनां समयान्तरे ।
वाचयामास सप्ताहं गोकर्णः सज्जनाग्रणीः ॥ ९९ ॥
कथासमाप्तिदिवसे श्रद्धानिर्धूतपाप्मनः ।
श्रोतॄञ्जनान् समुद्धर्तुं प्रादुरासीज्जनार्दनः ॥ ५०० ॥
जनानालोक्य सश्रद्धं जयध्वनिविधायिनः ।
पाञ्चजन्यं स्वयमपि ध्वनयामास माधवः ॥ १ ॥
आलिङ्गनेन सारूप्यं गोकर्णाय प्रदाय सः ।
श्रोतॄनप्यनुजग्राह नयनान्तनिरीक्षितैः ॥ २ ॥
तदीयकरुणादृष्ट्या सकिरीटाः सकुण्डलाः ।
तेऽभूवन् पार्षदास्तस्य घनश्यामा द्विबाहवः ॥ ३ ॥

(१) आनन्दमग्नतान्वितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णभेदमनाश्रित्य गोकर्णग्रामवासिनः ।
आशूद्रमाविप्रजनं प्रापुः कृष्णसरूपताम् ॥ ४ ॥
यावन्त आसन् सप्ताहश्रोतारस्तत्र देहिनः ।
व्योमयानानि तावन्ति समायान्ति स्म नारद ! ॥ ५ ॥
अगोचरं भानुभासां ते गोकर्णपुरःसराः ।
गोलोकं विपुलालोकं निन्यिरे मुरवैरिणा ॥ ६ ॥

पुनर्गोकर्णसप्ताहः ।

सभक्ति संभृतश्रद्धं समाहितमनोगति ।
एवं कथायाः श्रवणात् प्रीयते स जगत्पतिः ॥ ७ ॥
सप्रेतानि ययुर्मुक्तिं जनवृन्दानि नारद ! ।
भवेत् सप्ताहमाहात्म्यं किमस्मादाधिकं वद ? ॥ ८ ॥
न योगान्नैव तपसस्तां गतिं यान्ति मानवाः ।
सप्ताहाद्यां गतिं यान्ति त्वरातोषितमाधवाः ॥ ९ ॥
इतिहासमिमं पुण्यं शाण्डिल्यश्चित्रकूटगः ।
नित्यमावर्तयन्नेव वर्ततेऽद्यापि धीधनः ॥ ५१० ॥
अस्याऽऽख्यानस्य पठनात् सश्रद्धं श्राद्धकर्मणि ।
पितरः स्युः कृतोद्धाराः प्राप्ताहाराः शतं समाः ॥ ११ ॥
पठन्नेतदुपाख्यानं समाहितमतिर्जनः ।
(१२७) देहावसाने जायेत स्वयमेव जनार्दनः ॥ ५१२ ॥

इति श्रीमद्भागवतसप्ताहस्तुतिबोधकः ।
अयं समाप्तिमध्यायः समगादपि पञ्चमः ॥ ५ ॥

शृणु तादृशसप्ताहविधानमधुना मुने ! ।
नालं फलोपधानाय कृतं कर्माऽविधानतः ॥ १३ ॥
आषाढे श्रावणे भाद्र इषे कार्तिकमार्गयोः ।
मोक्षाभिलाषिभिः कार्यं सप्ताहश्रवणं जनैः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माघे तपस्ये वैशाखे ज्येष्ठे मासि यथेप्सितम् ।
ऐहिकं शर्म वाञ्छद्भिः श्रोतुं सप्ताह इष्यते ॥ १५ ॥
त्यक्त्वा पूर्वोदितान् मासान् स्वास्थ्यभाजा सुबुद्धिना ।
चैत्रे पौषे च सप्ताहो न श्रोतव्यः शरीरिणा ॥ १६ ॥
जनाश्चैत्रेऽपि पौषेऽपि रोगादिभिरुपद्रुताः ।
सप्ताहश्रवणं कुर्युः संशयापन्नजीविताः ॥ १७ ॥
सप्ताहनामा प्रथितः सोऽयं ज्ञानमयो मखः ।
यथावैभवमौदार्यं प्राणभाजामपेक्षते ॥ १८ ॥
आरम्भात्प्रभृति श्रोतुमात्मीया अपि दूरगाः ।
आमन्त्रणीयाः सर्वेपि यथासमयमादरात् ॥ १९ ॥
अभ्यागतानां वासाय सोपस्करणमास्तृतम् ।
स्थानं प्रकल्पयेद्धीमान् शुचि प्रायेण विस्तृतम् ॥ ५२० ॥
प्रकल्पितचतुर्द्वारं ध्वजादिभिरलङ्कृतम् ।
यथापद्धति कुर्वीत मण्डपं रुचिराकृति ॥ २१ ॥
ग्रहवेदीं वास्तुवेदीं विनिर्माय यथादिशम् ।
प्रधानवेदिकां रम्यां कुर्यान्मण्डपमध्यगाम् ॥ २२ ॥
आरम्भात्पूर्वदिवसे कृतक्षौरः समाहितः ।
प्रायश्चित्ताय गां दत्वा कुर्यात्पूर्वाङ्गमादृतः ॥ २३ ॥
गणनाथं समभ्यर्च्य पूजयित्वा च मातृकाः ।
कुर्वीत श्रद्धया युक्तो नान्दीश्राद्धं यथाविधि ॥ २४ ॥
ग्रहान् संपूज्य विधिवद्वास्तुमण्डलदेवताः ।
अर्चयित्वा पूजयेत सर्वतोभद्रदेवताः ॥ २५ ॥
निधाय कलशं मध्ये तत्राऽभ्यर्च्य जलाधिपम् ।
तन्मुखे प्रतिमां विष्णोरर्चयित्वाऽर्थयेदिति ॥ २६ ॥
" संसारसागरे मग्नं दीनं मां करुणानिधे ! ।
कर्ममोहगृहीताङ्गं समुद्धर भवार्णवात् " ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुचतुष्पदिकान्यस्तं पुस्तकं वेदिकोपरि।
यथाविधि समभ्यर्च्य प्रार्थयेत कृताञ्जलिः ॥ २७ ॥
" श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि।
स्वीकृतोऽसि मया नाथ ! मुक्त्यर्थं भवसागरे ॥ १ ॥
मनोरथो मदीयोऽयं सफलः सर्वथा त्वया।
निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ! " ॥ २ ॥
ततश्च वेदवेत्तारं विविधागमपारगम्।
प्रार्थयेद्वाचकं वृत्वा व्यासरूपं द्विजोत्तमम् ॥ २८ ॥
"शुकरूप ! प्रबोधज्ञ ! सर्वशास्त्रविशारद !।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय !" ॥ १ ॥
वृत्त्वोपवाचकादींश्च द्रव्यैर्विधिनिवेदितैः।
प्रणम्य वैष्णवाञ्छ्रोतॄन् गृह्णीयान्नियमं सुधीः ॥ २९ ॥
उपविष्टः सदारादिः स्थाने शुचिनि विष्टरे।
यथावकाशं माहात्म्यं शृणुयाद्भक्तिसंभृतः ॥ २३० ॥
एवं समाप्य पूर्वाङ्गं परेद्युः समयोत्थितः।
संक्षेपकृतसन्ध्यादिर्वाचकाद्यर्चनं चरेत् ॥ ३१ ॥
ततो मङ्गलमाचर्य वाचको वाचयेत्कथाम्।
सूर्योदयं समारभ्य सहार्धप्रहरत्रयम् ॥ ३२ ॥
असङ्कीर्णव्यक्तपदं यथास्थानोत्थिताक्षरम्।
नातिद्रुतं नातिमन्दं वक्तुर्वाचनमिष्यते ॥ ३३ ॥
अस्पष्टवर्णं संकीर्णपदश्रेणि हतस्वरम्।
अविमृष्टस्थानभेदं नेष्यते वाचनं बुधैः ॥ ३४ ॥
माध्याह्निकक्रियाहेतोर्मध्याह्ने घटिकायुगम्।
विरम्य पुनरारभ्य भागशेषं समापयेत् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीराजनं यथायोगं कथान्ते कुर्युरादृताः ।
उद्यद्भक्ति मिलद्वाद्यं प्रव्यक्तहरिकीर्तनम् ॥ ३६ ॥

---

(१) श्रद्धावद्भिः नीराजनसमयोचितं हरिकीर्तनं हरिभक्तेभ्यो जनेभ्य एव वा, मदीयस्य हरिविरिवस्याकाव्यस्य औपचारिकोल्लासतो वाऽधिगन्तव्यम्, यथा— (ध्रु)

जय सज्जनजनरञ्जन ! जय दुर्जनजनहन् !
जय बन्धनभयभञ्जनपदवन्दन ! भगवन् ! ॥

[१] धृतसाध्वसमितराश्रयरहितं गुणमहितं
शरणागतमकृतागसमबलं विधिमधिनोः ।
अधिसागरमघसंकुलमनसं घनतमसं
सहजान्वितमहितं गतकरुणं मधुमकृणोः ॥ जय सज्जनजनरञ्जन !

[२] चतुराननवरगर्वितमनयं निजनखरै-
रवधीरितविबुधोत्तममसुराधिपमवधीः ।
नरकेशरिवपुरीश्वर ! चरणादरनिरतं
सदयः किल गुरु तस्य च तनयं पदमनयः ॥ जय सज्जनजनरञ्जन !

[३] भवनं त्यज विपिनं भज दयितानुजसहितः
सहितान् कुरु विहितातुलतपसः प्रशमधनान् ।
कपिभिर्मिल जलधिं तर दशकन्धरमधमं
सकुलं जहि सकलद्विषमिति वैभवमतनोः ॥ जय सज्जनजनरञ्जन !

[४] वसनाञ्चलविधृतां गतिरहितां पतिपाणिता-
मकरोर्नतशिरसं हतविपदं द्रुपदसुताम् ।
जडतावृतमितरोन्नतिकलुषीकृतनयनं
धृतराष्ट्रजमशुभाशयमदयामयमदुनोः ॥ जय सज्जनजनरञ्जन !

[५] प्रभाविष्यसि समये पुनरसिना सह महता
तुरगोत्तममवलम्ब्य च विहरिष्यति तरसा ।
परिपास्यसि विरलानपि सुकृतोन्नतिरसिकान्
निहनिष्यसि सकलानपि मनुजान् कलिमलिनान् ॥ जय सज्जनजनरञ्जन !

इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथाप्रतिज्ञं नियमान् पालयन्तः समाहिताः ।
कथाया मननं कुर्युः श्रोतारोऽन्वहमादृताः ॥ ३७ ॥
अनाहारो हविष्याशी पयःपायी घृताशनः ।
फलभुग्वा भवेच्छ्रोता शक्तिसात्म्यविचारवान् ॥ ३८ ॥
पत्रावलीपात्रभोजी कथान्तकृतभोजनः ।
अधःशायी ब्रह्मचारी शान्तस्वान्तः प्रशस्यते ॥ ३९ ॥
अन्यनिन्दाममेध्यान्नभक्षणं नीचभाषणम् ।
नैव कुर्वीत मनुजः सप्ताहमखदीक्षितः ॥ ५४० ॥
सत्यशौचदयौदार्यमौनार्जवसमन्वितः ।
विनीत एव वर्तेत सप्ताहमखदीक्षितः ॥ ४१ ॥
दारिद्र्यदवदग्धानां दौर्भाग्यव्यथितात्मनाम् ।
जातपातकपुञ्जानां व्याधिव्याकुलचेतसाम् ॥
अनपत्यत्वतप्तानां विरक्तमनसां भवे ।
साप्ताहिकी हरेर्गाथा श्रुता कल्याणकारिणी ॥ ४२–४३ ॥
कन्याप्रसूर्नष्टगर्भा वन्ध्या नष्टप्रजा वधूः ।
सप्ताहसाधुश्रवणाद्दोषैरेतैर्विमुच्यते ॥ ४४ ॥
सप्ताहस्य समाप्तस्य सतः साद्गुण्यसिद्धये ।
जन्माष्टमीव्रतस्येव कुर्यादुद्यापनं सुधीः ॥ ४५ ॥
श्रोतॄणामसमृद्धानां नैवोद्यापनमिष्यते ।
तेषां हि शुद्धा श्रद्धैव सर्वतोऽप्यतिरिच्यते ॥ ४६ ॥
समापिते भागवते विष्णोर्नाम्नां सहस्रकम् ।
अच्छिद्रताविधानाय वाचयेद्वाचकः स्वयम् ॥ ४७ ॥
पुस्तकं वाचकमपि प्रपूज्य चरितं हरेः ।
श्रोता गायेद्वापयेद्वा समृदङ्गादिवादनम् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्विण्णेन सता श्रोत्रा गीता श्राव्याऽन्तिमे दिने ।
गृहस्थेन तु कर्तव्यो होम एव यथाविधि ॥ ४९ ॥

गायत्र्या वा त्रिपदया वह्निजायान्तया सुधीः ।
दशमस्कन्धपद्यैर्वा स्वाहान्तैर्जुहुयाद्धविः ॥ ५५० ॥

मधुद्राक्षानारिकेलपायसादिविमिश्रितः ।
सर्पिस्तिलयवप्रायश्चरुर्विष्णोः प्रशस्यते ॥ ५१ ॥

होमाऽसमर्थो होतव्यं वस्तु दद्याद् द्विजन्मने ।
विष्णोरग्निश्च विप्रश्च मुखमाख्यायते यतः ॥ ५२ ॥

सर्पिःपायसमध्वादि भोजयेद् द्वादश द्विजान् ।
शक्तौ सुवर्णधेनुं च विधिना वितरेत्सुधीः ॥ ५३ ॥

ततः पलत्रयमिते हेमसिंहासने स्थितम् ।
समर्चयेद्भागवतमुपचारैः समुचितैः ॥ ५४ ॥

समस्तोपस्करोपेतं ततः पुस्तकमादरात् ।
संकल्प्य शुकरूपाय वाचकाय समर्पयेत् ॥ ५५ ॥

वाचकायाऽपरेभ्यश्च दक्षिण्येभ्यः कृतक्रमः ।
शुद्धया श्रद्धया धौतां प्रदद्याद्दक्षिणां सुधीः ॥ ५६ ॥

सर्वसाद्गुण्यसिद्ध्यर्थं वत्सयुक्तां पयस्विनीम् ।
अलङ्कृतां सौम्यशीलां वितरेद्वाचकाय गाम् ॥ ५७ ॥

ततश्च वाचकः कृत्वाऽभिषेकमपरैः सह ।
प्रीणयेत् सकलाञ्छ्रोतॄन् प्रसादतुलसीदलैः ॥ ५८ ॥

सप्ताहविधिः ।

---

(१) दक्षिणार्हेभ्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं नारद ! पौराणीमिमामाकर्ण्य संहिताम् ।
स्थितिं लभन्ते मनुजाश्चतुर्वर्गसमुच्चिताम् ॥ ५९ ॥

इति भार्गव ! देवर्षिश्चतुःसनमुखोत्थितम् ।
पीत्वा वचनपीयूषं प्रोवाच प्रेमगद्गदः ॥ ६० ॥

" श्रावयित्वा समाहात्म्यं विधिं कालं स्थलं फलम् ।
समुद्धृताः स्मः सर्वेऽपि युष्माभिः सूक्ष्मदर्शिभिः ॥ ६१ ॥
कलिकालोपतप्ताः स्मः सप्ताहश्रवणोत्सुकाः ।
यथाकालं श्व आरभ्य श्रोतास्मः श्रद्धयान्विताः " ॥ ६२ ॥
इति देवर्षिवचसा सनकाद्याः प्रसादिताः ।
परेद्युः प्रातरारभ्य प्रोचुर्भागवतीं कथाम् ॥ ६३ ॥
सश्रद्धमाकर्णयतां हर्षयन्तो मनांसि ते ।
इत्थं समाप्य सप्ताहं तुष्टुवुर्जगदीश्वरम् ॥ ६४ ॥

सनकादीनां सप्ताहसमाप्तिः ।

[क] स्वकीयसंकल्पनमात्रनिर्मित-
प्रपन्नसत्यव्रतकामपूर्तये ।
मुदे गृहीताय सदा सुधीवरै-
र्विविक्तधाम्ने झषमूर्तये नमः ॥ ६५ ॥

[क] स्वकीयेन संकल्पनमात्रेण निर्मिता, प्रपन्नस्य शरणागतस्य, सत्यव्रतस्य तन्नाम्नो राजर्षेः कामपूर्तिः येन तस्मै । विविक्तधाम्ने शुद्धरूपाय, विजनवासिने च, सुधीवरैर्विद्वद्भिर्मुदे आनन्दार्थं, सदा गृहीताय ध्यानगोचरीकृताय, झषमूर्तये मीनरूपाय, नम इति संक्षिप्तः पदार्थः । धीवरैः (दाशैः) कदाचित् मुदे गृहीतात् अविविक्तधाम्नः सर्वस्मादपि मीनजातात् सुधीवरैः सदा गृहीतोऽयं विविक्तधामा मीननमूर्तिर्भगवान् सर्वतोऽप्यतिरिच्यमानः सुधिया नमस्कार्य इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[ख] समुच्छलन्मन्दरमूलघर्षणा-
सुखप्रकर्षाद् दृशमर्धमीलिताम् ।
हिरण्यगर्भादिषु पोषहेतवे
प्रयच्छते कच्छपमूर्तये नमः ॥ ६६ ॥

[ग] अखण्डभूमण्डलपिण्डमण्डित-
द्विजद्वयीदर्शितदिव्यदीप्तये ।
जगत्त्रयीपङ्कविलोपिकीर्तये
मुहुर्मुहुः सूकरमूर्तये नमः ॥ ६७ ॥

[ख] समुच्छलतो मन्दरस्य मूलस्य घर्षणायाः सुखस्य प्रकर्षात् अर्धमीलितां दृशं पोषहेतवे हिरण्यगर्भादिषु समुद्रमथनश्रमव्यापृतेषु ब्रह्मादिषु देवेषु, प्रयच्छते ददते, कच्छपमूर्तये नमः इति सरलोऽर्थः । क्षुत्तृट्श्रमादिभिर्म्लानान् निजार्भकान् पयःपाननिरपेक्षया सौम्यया दृशैव वर्धितबलान् विदधतः कच्छपान् वपुषा कर्मणा चाऽनुकुर्वाणोऽयं हिरण्यगर्भादिगीर्वाणगणजनको भगवानचिन्त्यमहिमा कच्छपः केवलया प्रणत्यैव सत्कार्य इति भावः ।

[ग] स्पष्टतरः पदार्थः । भगवति सूकरमूर्तौ जगद्धातरि अखण्डभूमण्डलपिण्डमण्डितया द्विजद्वय्या (दन्तयुगेन) दिव्यदीप्तिप्रदर्शनकर्मणि व्यापृते [त्यक्तनिजरूपोचितपङ्काहरणकर्मणि] तदीयत्वसंबन्धेन धन्या कीर्तिर्जगत्त्रयीपङ्कं विलुम्पति स्मेति परमोचिताचारचमत्कृतः सचेता नम आवर्तयतीति भावः । पङ्कः कर्दमः पापं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[घ] कयाधुसौभाग्यदशाविघातकृ-
न्निशातताख्यातनखोग्रशक्तये ।
जराजनित्रासनिरासकारिणे
नरार्धकण्ठीरवमूर्तये नमः ॥ ६८ ॥

[ङ] सुपर्वपक्षाश्रयसावहित्थता-
पदत्रयक्ष्मातलमात्रभिक्षवे ।
विनीतविन्ध्यावलिवल्लभादृत-
व्रताय ते वामनमूर्तये नमः ॥ ६९ ॥

[घ] कयाधोः हिरण्यकशिपुभार्यायाः, सौभाग्यदशायाः जीवद्भर्तृकत्वादिरूपाया अवस्थाया, विघातकृत्,—निशाततया तीक्ष्णतया, ख्याता च नखानामुग्रा शक्तिर्यस्य तस्मै। जरा—जन्म—त्रास (मरण) हारिणे नरार्धकण्ठीरवमूर्तये नृसिंहवपुषे, नम इति सरलोऽर्थः। प्रपन्नजनजन्मजरामरणहरणप्रकाशितनरत्वानुरूपमार्दवगुणाय कयाधुवैधव्यविधानप्रकटीकृतकण्ठीरवत्वानुरूपनैष्ठुर्यगुणाय मार्दवनैष्ठुर्यसांकर्यभ्राजमानवपुषे भगवते नम इति च नातिगूढो भावः।

[ङ] सुपर्वपक्षाश्रयेण देववर्गपक्षपातेन, या सावहित्त्थता आकारगुप्तिः, तया पदत्रयप्रमिते क्ष्मातलमात्रे विषये भिक्षवे याचकाय। विनीतेन विन्ध्यावलिवल्लभेन बलिना, आदृतं व्रतं स्वल्पसंतोषितादिकं, यस्य तस्मै वामनाय नमः इति वाच्योऽर्थः। सुपर्वपक्षाश्रयस्य [खादतमोदताद्युत्सवप्रायपक्षावलम्बिनः] कृताकारगुप्तेः [अप्रकटीकृताकिञ्चनभावस्य] स्वल्पतरं प्रयाचतः सरलतरधिया स्त्रीजनेन स्त्रीप्रायेण जनेन च समाद्रियमाणस्य धूर्ततयैव समीहितं साधयतः सादृश्यं चेतसि व्यञ्जनया भासत इति सचेतसः प्रमाणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[च] कुवृत्ततादूषितबाहुजव्रज-
क्षयादृतच्छान्दसमार्गशुद्धये ।
निरीहताकोङ्कणकोणचारिणे
कुठारिणे भार्गवमूर्तये नमः ॥ ५७० ॥

[छ] विशालतावद्भुवनक्षयोच्छल-
त्सबन्धुपौलस्त्यतिमिङ्गिलारये ।
पवित्रनाम्ने सरयूविलासिने
दिने दिने राघवमूर्तये नमः ॥ ७१ ॥

[ज] वयःस्थदन्तावलिभङ्गतुष्टिभृ-
त्कलिङ्गराजस्तुतमुष्टिकीर्तये ।

[च] कुवृत्ततया दुराचारितया, दूषितानां बाहुजव्रजानां क्षत्रियवर्गाणां, क्षयेण आदृता स्वीकृता, छान्दसमार्गस्य वैदिकाचारस्य, शुद्धिः परिष्कृतिर्येन तस्मै । निरीहतया निजोपार्जिताखण्डभूमण्डलसाम्राज्यभोगविमुखतया, कोङ्कणनाम्नः समुद्रोत्सृष्टस्य प्रदेशस्य, कोणचारिणे एकदेशवर्तिने, कुठारिणे परशुधारिणे, भार्गवमूर्तये जामदग्न्याकृतये, नम इति वाच्योऽर्थः । कुवृत्ततया [कुत्सितच्छन्दोयुक्ततया] दूषितानां क्षयेण छान्दसमार्गस्य [छन्दःपद्धतेः] शुद्धिं विदधतः सादृश्यमिह व्यञ्जनया समुल्लसतीति सचेतसः ।

[छ] विशालानां तावतां भुवनानां लोकानां, क्षयाय नाशाय, उच्छलत उद्वर्तमानस्येति पौलस्त्यपक्षीयोऽर्थः । विशालतावति विशालतायुक्ते, भुवनक्षये जलरूपे निवासे, उच्छलत इति तिमिङ्गिलपक्षीयोऽर्थः । तथाभूतस्य सबन्धोः पौलस्त्यरूपस्य रावणरूपस्य तिमिङ्गिलस्य महामीनविशेषस्य, अरये घातकाय, सरयूविलासिने तन्नामकनदीविहारिणे, पवित्रनाम्ने राघवमूर्तये रामरूपाय, सर्वातिशायिमहामीनवपुषे, च दिने दिने नम इति विचारवर्धनीयः सूक्ष्मोऽर्थः।

[ज] वयःस्थेन यूना, दन्तावालिभङ्गे दन्तपङ्क्तिनिपाते, तुष्टिभृता संतोषवता (निर्दन्तमुखकुहरतया व्यक्तमालपितुमशक्तेनापि अनुत्क्रान्तप्राणतयैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयोग्रधर्त्रे समरोग्रशक्तये
खलप्रहर्त्रे बलमूर्तये नमः ॥ ७२ ॥

[झ] हसद्यशोदाकरपङ्कजद्वयी-
समुल्लसद्दामनिबद्धवर्ष्मणे ।
प्रपन्नमुक्तिप्रदपादपल्लव-
प्रशस्तये बल्लवमूर्तये नमः ॥ ७३ ॥

प्रसीदता) कलिङ्गराजेन कालिङ्गेन, स्तुता मुष्टिकीर्तिर्यस्य तस्मै । अयोग्र-धर्त्रे मुसलधारिणे, समरोग्रशक्तये युद्धप्रचण्डप्रतापाय, खलप्रहर्त्रे दुष्टप्रहारिणे, बलमूर्तये बलभद्राकृतये, नमः इति सरलोऽर्थः । यदीयमुष्टिकीर्तिः पातित-दन्ततया व्यक्तमालपितुमशक्तेन यूनाऽपि प्रसीदता द्विषता सता कलिङ्गराजेन स्तूयते स्म ("दिष्ट्या ! सद्यःप्राणापहारकारणीभूत-प्रहारे मदीये मर्मान्तरे मुष्ट्या न प्राहरत्प्रलम्बघ्नः । शतकोटिचूर्णी-करणक्षमां तदीयां मुष्टिं कः सोढुमीष्टे ? । भगवन् ! विधे ! भृशमनु-गृहीतोऽस्मि, दन्तेष्वेव पातिता बलस्य मुष्टिः । अनुत्क्रान्तप्राणतयैव पतितदन्तोऽव्यक्तगीरपि जरन्निव जनस्तुष्टधीर्जीवामि" एवमादि-भिर्विविधाभिर्गीर्भिरभिनन्द्यते स्म) तत्तादृक्सकललोकप्रथितमुष्टि-नैष्ठुर्योऽपि खलेषु प्रहर्तुं समरेषु मुसलमवलम्बमानो भगवान् बल औचित्यचमत्कृतैः कैर्वा सचेतोभिर्निबद्धाञ्जलिभिः श्रद्धाविशुद्धव-चोभिः सद्भिर्न प्रणम्यत इति संक्षिप्तो भावः । कालिङ्गदन्तभञ्जनकथा च दशमस्कन्धोत्तरार्धे एकषष्टितमे (६१) अध्याये द्रष्टव्या । अयोग्रं मुसलः ।

[झ] प्रणयपूर्णया करकलितदामसमूहया यशोदया बद्धविग्रहः प्रथमानां दामोदरतां नीतोऽपि, पदपल्लवविरुदपाठकान् प्रपन्नान् भवबन्धनान्मोचयन् भक्तवात्सल्यसुधामहोदधिर्लीलाकलितगोपाल-मूर्तिर्भगवाननाकलिततरोपचारैर्दृष्टशास्त्रपारैर्विहितविचारैः कलिकद-र्थितैर्जनैः प्रणत्यैव सत्क्रियते इति संक्षिप्तो भावः । स्पष्टः पदार्थः । बल्लवो गोपालः ।

---

(१) केचिद्बलं केचिच्च कृष्णमेव दशस्ववतारेषु गणयन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[ञ] यथायथं तत्त्वमजानतां श्रुते-
रवैधहिंसाविनिवृत्तिमिच्छते।
श्रुतिप्रशस्तप्रशमैकवर्त्मने
दयाब्धये श्रीघनमूर्तये नमः ॥ ७४ ॥

[ट] हयाधिरूढाय कृपाणपाणये
कृतावतारोचितकर्मकारिणे।
नमो नमः कल्पितकल्किमूर्तये
परेश ! तुभ्यं दुरितापहारिणे ॥ ७५ ॥

दशावतारस्तवः।

इति स्तुतिं समाकर्ण्य कुमारवदनोद्गताम्।
सश्रोतृवर्गा ससुता भक्तिः प्राप सहर्षताम् ॥ ७६ ॥

अथाऽऽनन्दमयीं वीक्ष्य भक्त्यादीनां तथा दशाम्।
अगाधबुद्धिर्देवर्षिर्जगाद सनकादिकान् ॥ ७७ ॥

[ञ] सरलः पदार्थः। अविदितश्रुतिमर्मणः फलश्रुतिश्रद्धाविहितहिंसाप्रायनानाविधश्रौतकर्मणः स्वल्पमतीन् अयथातथविहितहिंसासंपत्स्यमाननिरयगतीन् अर्वाक्तनान् प्राणिनः समुद्धर्तुमेव "अहिंसा परमो धर्मः" इति प्रायोऽविरोधिनं धर्ममुपदिशन् स्थूलमतिभिरापाततः श्रुतिविरोधितया प्रतीयमानोऽपि स्वयं श्रुतिशतप्रशस्तं प्रशममार्गमेवावलम्बमानः करुणाम्बुधिर्विशुद्धतरपद्धतिर्बुद्धमूर्तिर्भगवान् प्रबुद्धबुद्धिभिर्निबद्धाञ्जलिभिः सश्रद्धैरेव वन्द्यते इति भावः। श्रीघनो बुद्धः।

[ट] व्यक्तः पदार्थः। कृतावतारोचितं (सत्ययुगावतारयोग्यं, कृपाणपाणित्वादिलक्षणलक्षितस्य कृतस्य (धृतस्य) अवतारस्य च योग्यं दुष्टसंहरणरूपमितरावतारव्यतिरेकहेतुभूतम्) कर्म कृतवते दुरितापहारितयेव कल्किनामापन्नाय च भगवते मुहुर्नम इति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिष्ट्या ! भवद्भिः संप्राप्तैः पूरितो मे मनोरथः ।
हन्त ! धन्योऽस्मि भगवान् सदयो मयि माधवः ॥ ७८ ॥
किन्तु ? प्रत्युपकुर्वीय निरासितबृहद्भ्रमः ।
हिताय हतकामेभ्यो युष्मभ्यं शतशो नमः ॥ ७९ ॥
श्रीपतिप्रीणनद्वारा श्रेयःश्रेणिविधायिने ।
सर्वधर्मधुरीणाय श्रवणाय मुहुर्नमः ॥ ५८० ॥

नारदप्रमोदः ।

इति शौनक ! सानन्दं मुहुर्ब्रुवति नारदे ।
श्रीशुकः पुरतः प्राप्य वाचमेतां समाददे ॥ ८१ ॥

शुकाभिसरणम् ।

[१] निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो ! रसिका ! भुवि भावुकाः ! ॥
[२] धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा ? परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥
[३] श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं
यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते ।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥
[४] स्वर्गे मर्त्ये च कैलासे वैकुण्ठे नास्त्ययं रसः ।
अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित्" ॥

भागवतप्ररोचना ।

इति बादरायणिमुखाम्बुरुहा-
द्गलितां निपीय मधुरोक्तिसुधाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुदिता सती नयनयोः पुरतः
परिषद्ददर्श हरिमेव तदा ॥ ८२ ॥

हरेराविर्भावः ।

धृतस्मितं दत्तदृगन्तवीक्षितं
सकम्बुचक्रं सगदं सहाम्बुजम् ।
अधोक्षजं वीक्ष्य पुरः सभाजिरे
जना जयेति प्रणता बभाषिरे ॥ ८३ ॥

अवेक्ष्य कौन्तेयकयाधुनन्दनो-
द्धवादिभिर्माधवमग्रतः स्थितम् ।
परिस्खलद्वाणि समुल्लसन्मुखं
निबद्धपाणि प्रणनाम नारदः ॥ ८४ ॥

दिदृक्षमाणे द्रुहिणे संमागते
सदारपुत्रे गिरिशेऽप्युपस्थिते ।
सभक्ति भक्तैः समकीर्ति विष्टरे
सुखोपविष्टः किल विष्टरश्रवाः ॥ ८५ ॥

हरिकीर्तनोपक्रमः ।

उदैरयद्रागमभङ्गुरस्वरः
पृथासुतश्चित्ररथानुशासितः ।
प्रवीणभावादतुलादवीवदत्
करेण वीणामुपलाल्य नारदः ॥ ८६ ॥

समृद्धभक्तिः स्थिरबुद्धिरुद्धव-
श्चलत्करः कांस्यधरस्तदाऽजनि ।
कयाधुबालः किल तालमुच्चकै-
र्मुदा मिलत्कालमदात्पटुध्वनि ॥ ८७ ॥

---

(१) अर्जुनश्चित्ररथनाम्नो गन्धर्वराजाद्गान्धर्वं वेदमधीतवानिति भारतीयवन पर्वणि छ्यक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगे कुमारैर्मधुराऽन्तराऽन्तरा
जयप्रयुक्ता विरुदावलेस्ततिः ।
धुतोत्तमाङ्गोऽतिजवादवादय-
न्मृदङ्गमादाय मुदा दिवस्पतिः ॥ ८८ ॥

ननर्त भक्तिस्तनयद्वयान्विता
समुद्भवद्भावमुदारदर्शना ।
सगौरवं साधु जगौ सदग्रणीः
प्रभोः पुरस्तादथ बादरायणिः ॥ ८९ ॥

शुककृतहरिकीर्तनारम्भः

"चिरादुदासीनतयैव केवलः
स्थितिं प्रयासीत्यवजग्मुषी सती ।
सनर्तना त्वां जगदीश ! तोषये-
दियं च ते भक्तिरियं च मे मतिः ॥ ५९० ॥

[क] जय प्रमाणातिगदुर्गमत्रयी-
महाटवीप्रान्तविहारसाग्रह ! ।
अनन्तलोकत्रयपिण्डकल्पना-
पटुत्ववच्चिन्मयचारुविग्रह ! ॥ ९१ ॥

[क] यथावर्ण यथाऽऽश्रमं च श्रौतकर्मकाण्डानुसारीणि तानि तानि कर्माणि कृतवतां पर्यन्ते च विमलमतीनां गुरुप्रसादासादितोपनिषद्भागरहस्यानां विपश्चितां साक्षाद्गोचरीभवन् ! अनन्तकोटिब्रह्माण्डघटकतया पटुधिया मनुमानगम्योपि भवन् ! "सत्यं ज्ञानमानन्दं ब्रह्म" इत्यादिभिर्वैदिकैर्वचनैः श्रद्धाशोधितचेतसां साधनवतामनुसन्धेयोऽपि भवन् ! प्राप्तोत्कर्षपरभाग ! भगवन् ! एवमेव सततं वर्तस्व" इति ज्ञाततत्त्वतया विस्रब्धो व्याससूनुः सन्तमपि भगवदुत्कर्षं प्रणयातिशयेनाऽऽशास्ते जयेत्यादिना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[ख] जय त्रिदिष्टानुपसृष्टसौहिती-
सुधार्णवाभ्यन्तरगोचरस्थिते ! ।
कलम्बुटप्रार्थनपाणिसंपुट-
प्रसारिगोपालकबालकाकृते ! ॥ ९२ ॥

[ग] जय स्वसीताहृदयैकताधनु-
र्द्विखण्डतासाधनदक्षताश्रय ! ।

[क] प्रमाणातिगाया अनन्तायाः प्रत्यक्षादिप्रमाणमौलिभूतायाश्च, त्रय्याः श्रुतिमय्याः, महाटव्या अरण्यान्याः,प्रान्ते पर्यन्ते उपनिषद्रूपे चरमभागे, विहारे प्रकाशरूपे विलासे, साग्रह ! तदेकरुचे ! । अनन्तानामगणितानां सततोत्पत्तिशालिनां च, लोकत्रयपिण्डानां ब्रह्माण्डानां, कल्पनायां रचनायां, पटुत्ववान् सद्रूपतया दक्षः, चिन्मयः चैतन्यरूपः, चारुरानन्दमयतया रम्यः, विग्रहः कायः यस्य तस्य संबोधनम् । इति संक्षिप्तोऽर्थः ।

[ख] "नित्यतृप्तिरूपसुधासागराभ्यन्तरस्थितः स्वयमखण्डितैश्वर्योऽपि प्रकटीकृतगोपशिशुकाकृतिर्नवनीतपिण्डखण्डाय पाणिसम्पुटं प्रसारयन् प्रदर्शितमुग्धभावः स्वैरमचरः, अननुयोज्यकर्मन् ! भगवन् ! इत्थमेव महिमानं प्रथयन् जगदुद्धारं विधेहि" इति भगवल्लीलामाधुर्यसमाकृष्टचेताः शुकमहामुनिः पुनरुत्कर्षमाशास्ते जयेत्यादिना—

त्रिदिष्टेन कालत्रयेण, अनुपसृष्टस्य अनुपद्रुतस्य, अबाधितस्य नित्यस्येति यावत्. सौहितीसुधार्णवस्य तृप्तिमयसुधासमुद्रस्य, अभ्यन्तरे अन्तः, गोचरः विषयरूपा, स्थितिः वर्तमानता, यस्य तस्य संबोधनम् । कलम्बुटस्य नवनीतस्य, प्रार्थने याचने, पाणिसंपुटप्रसारिणः निबद्धकरयुगलपुरस्कारिणः, गोपालबालकस्येव आकृतिर्यस्य तस्य च संबोधनम् । नवनीतं मन्थजातं दधिसारं कलम्बुटम् इत्यायुर्वेदीयनिघण्टुः ।

[ग] "एकेनैव दाक्ष्यपूर्णेन कर्मणा दुष्करमपि रौद्रधनुर्द्विधाभावं स्वसीतोभयहृदयैक्यं च संपादयन्, दशास्यकृतत्रिदशादिदुर्दशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशास्यजातत्रिदशादिदुर्दशा-
निशान्तकृद्भास्वदुदारदोर्द्वय ! ॥ ९३ ॥

[घ] जय स्वभक्तोदितभक्तभृत्यता-
चराचरव्यापकतासमर्थक ! ।
महत्तरस्तम्भसदम्भसंभव-
न्महत्तमात्युग्रनृसिंहविग्रह ! ॥ ९४ ॥

[ङ] जय द्विषत्कौरवदत्तयातना-
विहस्तकृष्णाञ्जलिबन्धवन्दित ! ।
सवेमसूत्रौघतुरीगवेषणा-
ऽनपेक्षनानापटसृष्टिपण्डित ! ॥ ९५ ॥

निशान्तकारिभास्वद्भुजयुगलतां च, भजन् प्रज्ञापौरुषप्रकर्षचरमभू- मिर्भगवान् प्रदर्शयन्नेवमेव प्रकर्षं भक्तजनश्रेयसे भूयात्" इति शुक- मुनिः पुनराशास्ते जयेत्यादिना । स्पष्टः पदार्थः ।

[घ] स्वभक्तेन प्रह्लादेन उदितां (कथितां) भक्तभृत्यतां (भक्त- परतन्त्रतां) चराचरव्यापकतां च समर्थयन्, महत्तरात् स्तम्भात् स- दम्भं संभवता महत्तमेन दारुणतरेण च नृसिंहवपुषा प्रकटीकृतवैभ- वश्च दर्शितभक्तरक्षणपद्धतिश्च भगवान् शुकमहर्षिणा पुनः प्रार्थ्यते जयेत्यादिना । व्याख्यातप्रायः पदार्थः ।

[ङ] द्विषद्भिः कौरवैर्यातनायां दत्तायां तत्तादृशविहस्ततताव- सरेऽपि नितान्तदुष्करेऽञ्जलिबन्धे कृतार्थतां प्रयातां, प्रकटीकृतपटुबु- द्धितां द्रुपदसुतां प्राप्तरक्षणां क्षणादेव वितन्वन्, वेमतुरीसूत्रादिसंभर- णानपेक्षविविधपटानिर्माणकर्मणि परिणतमतिर्भगवान् दयामयमाधु- र्यसंपन्नां धीधनधयनीयां वैदग्ध्यसुधां मुहुर्मुहुरेवमाविर्भावयन् प्रद- र्शितोत्कर्षः स्यादित्यभ्यर्थ्यते जयेत्यादिना । व्यक्तः पदार्थः । विहस्तो व्याकुलः हस्तरहितश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[च] जय प्रपञ्चक्षितिजैकबीजता-
समर्थनस्वीकृतवामनाकृते ! ।
अनल्पसंकल्पजलप्रवर्षण-
क्षणस्फुटीभूतविराड्वपुःस्थिते ! ॥ ९६ ॥

[छ] जय प्रपन्नाखिलकामपूरण-
प्रवीणतादर्शितदोश्चतुष्टय ! ।
क्षताढ्यशुष्यच्छबरीकरस्खल-
त्फलोररीकारवितीर्णविस्मय ! ॥ ९७ ॥

[ज] जय श्रुतिक्षीरसमुद्रमन्थन-
प्रयासगीतामृतपानदायक ! ।
प्रभूतभृत्यान्तकभीतिभित्पद-
प्रभुत्व ! लोकत्रितयैकनायक ! ॥ ९८ ॥

[च] स्वस्य संसारतरुबीजतां व्यञ्जयन् प्रकटीकृतवामनाकृतिर्बलिविहितं संकल्पजलप्रवर्षणं समासाद्य, प्रतिक्षणवर्धमानवपुर्वैराजं भावमापन्नो भगवानित्थमेव लीलाविहारेण रसिकमनांसि रञ्जयन्प्रवर्तेतेत्याशास्यते जयेत्यादिना—सुगमः पदार्थः ।

[छ] प्रपन्नानां जनानामखिलान् कामान् (धर्मादिचतुष्टयविषयान् मनोरथान्) परिपूरयितुं संख्ययाऽपि चतुरः पाणीन् प्रदर्शयन्, प्रपन्नायाः शबर्या अञ्जलिपुटात् स्खलतां क्षताढ्यानां (क्षतसहितानामुच्छिष्टानामित्याकूतम्) शुष्यतां च फलानामुररीकारेण विस्मयं च जनयन्, ऐश्वर्यभक्तपारवश्यद्वितयप्रकर्षचरमभूमिर्भगवान् पुनरेवंविधोत्कर्षप्रदर्शनार्थं श्रीशुकेनाशास्यते जयेत्यादिना । अतिरोहितः पदार्थः ।

[ज] पदप्रणतिमात्रात् समस्तानां भक्तजनानां भवभयापहारकोऽपि भगवान् तत्तादृग्दुर्वितर्क्यश्रुतिसागरमथनश्रममङ्गीकृत्याऽपि गीतामयममृतमुद्भावयन्, भक्तवात्सल्येन स्वकीयं महिमानमजानान इव प्रावर्तत इति भक्तवात्सल्यप्रदर्शनरूपमुत्कर्षं शुकमहामुनिः पुनराशास्ते जयेत्यादिना । सरलः पदार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहीश्वरः संकुचति स्वयं विधिः
स्खलत्यजस्रं त्रपते सरस्वती।
व्रजेत् पुराणस्य कवेस्तव स्तवे
नदीष्णतां किं जगदीश ! मे मतिः'' ॥ ९९ ॥

हरिकीर्तनस्तवः।

इति वदति सभक्ति श्रीशुके किं मुदे वः
कथयत वितराणीत्यालपद्वासुदेवः।
अधिमहि भवतैवं सन्निधेयं नगाहे
ध्रुवमिति जनता सा प्रोच्य मौनं जगाहे ॥ ६०० ॥
हरिरथ मुदितः सन्नोमिति स्वीकृतार्थः
पदमभि निरगच्छत् स्वं मिलद्भृत्यसार्थः।
अनुपदमितरे च प्राप्तदुःखप्रहाणा
भृगुतनय ! यथेच्छं निर्ययुः प्रीयमाणाः ॥ १ ॥
सनकमुखशुकादीञ्छीलसारान् सुरर्षि-
र्व्यसृजदमृतधाराधौतवर्णैर्वचोभिः।
तदनु स मुदितः सन् कृष्णकर्माणि गायन्
विषयगणवितृष्णः क्वापि भूमेर्जगाम ॥ २ ॥

भगवदादिनिर्गमः।

इति शौनक ! सानन्दा कुमारोक्त्या सती सताम्।
सपुत्रा विहतत्रासा भक्तिर्वसति मानसे ॥ ३ ॥
शुकेनापि समादिष्टा सर्वलोकोद्दिध्रीर्षया।
श्रीमद्भागवते भक्तिर्जागरूकैव वर्तते ॥ ४ ॥
उच्चकैः शुकशास्त्रेण कल्याणार्थाय गर्जता।
महामोहमयी निद्रा मुने ! केषां न भज्यते ॥ ५ ॥
अर्थज्ञः शुकशास्त्रस्य पत्राणि परिवर्तयन्।
श्रियः प्राणेश्वरं प्राप्य चित्तशूलं विमुञ्चति ॥ ६ ॥

(१) कुशलताम्। (२) ददानि। (३) पृथिव्यास्। (४) स्वंपदमभि निरगच्छदित्यन्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋणैः कदर्थ्यमानानां विविधैः शास्त्रवर्णितैः ।
त्राणाय कल्पते नृणां मुने ! भागवताश्रयः ॥ ७ ॥
अव्रतानामश्रुतानां गदव्याकुलिताऽऽत्मनाम् ।
अकिञ्चनानां जगति श्रीमद्भागवतं गतिः ॥ ८ ॥
तृष्णातरलचित्तानां रिक्तानां साधनं प्रति ।
कृष्णाऽनवाप्तिखिन्नानां श्रीमद्भागवतं गतिः ॥ ९ ॥
मुने ! भाग्यवतामेव शुकशास्त्रसरस्वती ।
प्रविश्य कर्णरन्ध्रेण तापशान्तिं प्रयच्छति ॥ १० ॥
अप्रबोधमयं गाढं तमः किल विपत्तिदम् ।
शुकशास्त्रसहस्रांशुर्भिनत्ति शतधा मुने ! ॥ ११ ॥
प्रसादयन्ती श्रीनाथं श्रीमद्भागवतश्रुतिः ।
किं ? न दद्यात् किं ? न कुर्यात् साधो ! साधु कृता सती ॥ १२ ॥
आधिभिर्विविधैर्घोरैर्व्याधिभिश्च निरन्तरैः ।
अनाथाः क्लेशमायान्ति शुकगाथापराङ्मुखाः ॥ १३ ॥
मुने ! नवरसाढ्येन शुकशास्त्रेण मानवः ।
श्रवसा साधु पीतेन दोषैः सद्यः प्रमुच्यते ॥ १४ ॥
चर्चया शुकशास्त्रस्य विनाऽऽयासेन चेतसि ।
कृष्णचन्द्रोदयं प्राप्य जाड्यं जहति जन्तवः ॥ १५ ॥
शुकशास्त्रस्य गुटिकां सभक्ति हृदि बिभ्रताम् ।
मायापिशाची नायाति पुरस्तादेव धीमताम् ॥ १६ ॥
गरुत्मति स्थितं नाथं निधाय हृदि तिष्ठताम् ।
विषयाशीविषोद्भूतं क्व ? भयं शुकशास्त्रिणाम् ॥ १७ ॥
शुकशास्त्रानादरेण प्राप्तान् मनुजपाशताम्[1] ।
जनान् शौनक ! बध्नन्ति पाशेन यमकिङ्कराः ॥ १८ ॥
शुकशास्त्राश्रयादेव प्राप्तोडुपकुलेश्वराः[2] ।
समुद्ध्रियन्ते मज्जन्तः संसाराम्बुनिधौ नराः ॥ १९ ॥

(१) कुत्सितमनुष्यताम् । याप्ये पाशप् प्रत्ययः । (२) प्राप्तचन्द्रवंशाधीश्वरश्रीकृष्णाः, प्राप्तनौनिवहाधीश्वरकर्णधाराश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याचन् यो वै कंण्ठनाथः शुकशास्त्रे भवेज्जनः ।
वैकुण्ठनाथ उचितः स भवेदेव धीधनः ॥ ६२० ॥
विपथभ्रान्तमनसो जन्तवः शर्म लिप्सितम् ।
पृच्छन्तु पृथिवीनाथं धियाऽऽहूय परीक्षितम् ॥ २१ ॥
शौनक ! श्रेयसां श्रेयः प्रेयश्च कमलापतेः ।
श्रीमद्भागवताद्वस्तु नेतरत् किल वर्त्तते ॥ २२ ॥

भागवतसेवनं श्रेयः ।

एतत्सूतस्य वचनं निशम्य प्रीतिवर्धनम् ।
इत्यूचे शौनकमुनिर्मुनिवर्गपुरःसरः ॥ २३ ॥
" पाययन् प्रत्यहं प्रीत्या भगवच्चरिताऽमृतम् ।
जीव साधो ! सौम्यशील ! त्वं चिराय निरामयः ॥ २४ ॥
भद्र ! सर्वेऽनुगृहीताः श्रेयः श्रावयता त्वया ।
न तृप्तिमधिगच्छामः पृच्छामः स्वल्पसंशयाः ॥ २५ ॥
परत्रेह च कल्याणं भविनां भावयन् सदा ।
सोऽयमश्रावि सप्ताहः केनकेन ? कदाकदा ? " ॥ २६ ॥
इति श्रुत्वा शौनकस्य वचनं सूतनन्दनः ।
प्रभूतहर्षः प्रत्यूचे पुराणार्णवपारगः ॥ २७ ॥
द्रौण्यस्त्रदग्ध-श्रीकृष्णकरुणाप्राप्त-वर्ष्मणा ।
निर्द्वन्द्व-दिव्यदृग्-विद्वद्वृन्द-वर्णितकर्म्मणा ॥ २८ ॥
प्रचण्डतरदोर्दण्डप्रतापाऽऽवलिशालिना ।
पराऽनाक्रान्तसकलधरामण्डलपालिना ॥ २९ ॥
श्रुतिस्मृतिसमादिष्टपुण्यकर्म्माऽनुरागिणा ।
नयनैपुण्यसुप्रीतप्रजाचित्तापहारिणा ॥ ६३० ॥

---

(१) शुकशास्त्रे विषये कण्ठरवेण याचमानः जनः वै कण्ठनाथो भवन् उचितः (योग्य उकारयुक्तश्च) सन् वैकुण्ठनाथो भवति । भागवतं कण्ठरवेण सश्रद्धं याचमानो जनः विष्णुरेव भवतीत्यर्थः । नाथतिर्याचने । (२) लिप्सितं लब्धुमिष्टम् ।
(३) अष्टभिरन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सद्यःप्रवृत्तदुर्वृत्तकलिनिग्रहकारिणा।
अनन्यजनसामान्यराजन्यव्रतधारिणा ॥ ३१ ॥
दुर्दैवयोगाद् दुष्कर्म मुनौ कृतवता तथा।
शृङ्गितः प्राप्तशापेन सताऽपि वत ! तुष्यता ॥ ३२ ॥
सज्ज्ञानपास्य संसारं मायोद्भूतं जिहासता।
प्रायोपवेशं चरता गङ्गामाश्रयता सता ॥ ३३ ॥
मुनिव्रजपदाम्भोजरजःप्रशमितांऽहसा।
बादरायणिसान्निध्यसुधाऽऽप्लावितचेतसा ॥ ३४ ॥
त्रिंशद्वर्षेष्वतीतेषु कृष्णनिर्याणकालतः।
शुश्रुवे किल सप्ताहः सश्रद्धेन परीक्षिता ॥ ३५ ॥
नभस्यशुक्लपक्षस्य नवम्याः स नरेश्वरः।
श्रुत्वा सप्ताहमनघः पूर्णायां पूर्णतां ययौ ॥ ३६ ॥

परीक्षित्सप्ताहश्रवणकालः।

व्यतीतायां शतद्वय्यां वत्सराणां ततः परम्।
चक्रे नगाहं गोकर्णश्चतुर्वर्णप्रियङ्करम् ॥ ३७ ॥
समाप्य पूर्णिमायां च शुचेः साप्ताहिकीं कथाम्।
निराचकार गोकर्णः श्रोतॄणां भवजां व्यथाम् ॥ ३८ ॥

गोकर्णकथाकथनकालः।

त्रिंशे वर्षे ततः प्राप्ते नारदर्षेः प्रयत्नतः।
चक्रुः कुमाराः सप्ताहपारायणमहोत्सवम् ॥ ३९ ॥
ते पौर्णमास्यां कार्तिक्यां चक्रिरे तेन कर्म्मणा।
मुने ! युवानौ पीवानौ सशक्ती भक्तिनन्दनौ ॥ ६४० ॥

कुमारसप्ताहवाचनकालः।

ततः प्रभृति सप्ताहः शौनक ! प्रतिवत्सरम्।
गृहे गृहे भक्तिमतां सर्वत्रैव प्रवर्तते ॥ ४१ ॥
स्वयमाविरबीभवद्धरिः प्रथितः सत्यवतीसुतात्मना।
इति भार्गव ! शर्मसिद्धये किल मार्गं विविधागमोद्धृतम् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुधिया शुकशास्त्रसेवनं महदत्यद्भुतमीदृशं धनम् ।
वसुवेश्मवपूंषि हास्यता सहगामीति समूह्य गृह्यते ॥ ४३ ॥
इति सूतकथामयीं सुधामतिपीय प्रमदात् कृतत्वराः ।
(१३२)"हरये नम" इत्यनेकशः सममेवोदगिरन् मुनीश्वराः ॥६४४॥

परिमलोपसंहारः।

इति श्रीमद्भागवतगुणगौरवगुम्फितः ।
हरेरनुग्रहादेष षष्ठोऽध्यायः समापितः ॥ ६ ॥

इति प्रणीय सुधियां पुरस्तादुपढौकितः ।
न मञ्जरीपरिमलः किं? प्रमोदाय कल्पते ॥ १ ॥
मासृण्यं वस्तुनो वाञ्छन् विहितं पिष्टपेषणम् ।
परीक्षमाणो जानीयाद्गुणमेव विचक्षणः ॥ २ ॥
अबोधानवधानाभ्यां स्खलतोऽपि सतः खलु ।
भवेन्नेदीयसी सत्सु नतमौलेर्मम क्षमा ॥ ३ ॥
इमं वह्निगजाङ्केन्दु-[१९८३] मिते वैक्रमवत्सरे ।
गौतमः कुलचन्द्राख्यः प्राणैषीत्प्रीतये हरेः ॥ ४ ॥

॥ इति शिवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) सप्तमे प्रशमं गच्छन्ननुरुन्धन् वचो विधेः ।
अध्वरं संदधे शम्भुर्निःसीमकरुणानिधिः ॥ १ ॥
भगः प्रजापतिर्जातो मित्रनेत्रेण नेत्रवान् ।
यजमानस्य दशनैः पूषाऽभूत्पिष्टभोजनः ॥ २ ॥
बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यामितरर्त्विजः ।
सबाहुहस्ता अभवँश्छिन्नहस्ता विबाहवः ॥ ३ ॥
अभूद्दक्षश्छागशिरा भृगुः श्मश्रूल्लसन्मुखः ।
इतरे छिन्नभिन्नाङ्गाः सद्यः पूर्णाङ्गतां ययुः ॥ ४ ॥
तथा ध्वस्तं सप्ततन्तुं तथा सन्धाय शंकरः ।
स्वकीयमैश्वरं नाम महिमानमदर्शयत् ॥ ५ ॥
अथ प्रत्यागतमतिर्दक्षः स्तुत्वा सतीपतिम् ।
क्रतोर्विच्छिन्नतां प्राप्तं कर्म प्रावर्तयत् पुनः ॥ ६ ॥
अथ मन्त्रसमाहूतः प्रादुर्भूतः स्वयं हरिः ।
अस्तूयत प्रमुदितैर्दक्षाद्यैरखिलैः पृथक् ॥ ७ ॥
विरिञ्चेरात्मनः शम्भोरुपदिश्यैकतां हरिः ।
गरुत्मन्तं समारुह्य धामोद्दिश्य निजं ययौ ॥ ८ ॥

मखसन्धानम् ।

(८) इह स्वायम्भुवमनोर्द्वितीयस्तनयश्चिरम् ।
उत्तानपादो राजर्षिः शशास क्षितिमण्डलम् ॥ १ ॥
द्विभार्यस्य च तस्यासीत् सुरुचिः प्रेयसी रुचा ।
नातिप्रिया गुणवती सुनीतिर्नीतिवेदिनी ॥ २ ॥
उत्तमः सुरुचेः सूनुः सदा पार्श्वचरः पितुः ।
ध्रुवः सुनीतेस्तनयो जनन्यनुगतोऽभवत् ॥ ३ ॥

---

(१) अन्यस्य नेत्राभ्यामन्यः पश्यति स्म । अन्यस्य दशनैरन्यश्चर्वयति स्म । अन्यदीयाभ्यां बाहुभ्यां हस्ताभ्यां चान्ये दानाऽऽदानादिकं कुर्वन्ति स्म । इत्यहो ! विपश्चितोपि चमत्कारचकितान् करोति पारमेश्वरो महिमा !

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिवादयितुं तातं जनन्या प्रहितः सुधीः ।
अगात्कदाचिदेकाकी पञ्चवर्षः शिशुर्ध्रुवः ॥ ४ ॥
सिंहासने समासीनमभिवाद्य यथोचितम् ।
पितरं तस्य चोत्सङ्गमध्यासितुमियेष सः ॥ ५ ॥
अथाऽमर्षेण कलुषा सुरुचिः पार्श्ववर्तिनी ।
नागीव गरलं तीव्रमुज्जगारोर्जितं वचः ॥ ६ ॥
सिंहासनारोहणेच्छां तुच्छभाग्य ! निवारय ।
शिशो ! स्वेनैव मनसा कोऽहमित्यवधारय ॥ ७ ॥
इति निर्भर्त्सितस्ताते मौनमालम्ब्य पश्यति ।
प्रत्याजगाम जननीं रुदन् सरलधीर्ध्रुवः ॥ ८ ॥
अङ्कमारोप्य पृच्छन्तीं जननीं मुग्धया गिरा ।
वृत्तं निवेद्य सकलं पृच्छति स्म स दुःखिताम् ॥ ९ ॥
कलत्रत्वाऽविशेषेऽपि किं त्वमेवं हतद्युतिः ।
राज्ञः समीपे सुरुचिर्हेतुना केन रोचते ? ॥ १० ॥
उत्तमोऽङ्कं पितुः प्राप्य मोदते केन हेतुना ? ।
अहं च दूरतो मातर्निरस्तः केन हेतुना ? ॥ ११ ॥
इति निर्बन्धतः पुत्रे मुग्धभाषिणि पृच्छति ।
सुनीतिः प्रतिवक्ति स्म मन्युम्लानमुखी सती ॥ १२ ॥
सुरुचिर्गुरुतां याता भाग्येन गुरुणा सता ।
अहं च लघुतां वत्स ! तेनैव लघुना सता ॥ १३ ॥
न शीलं वत्स ! न कुलं न गुणानामपि व्रजः ।
देहिनां हतभाग्यानां गौरवाय प्रजायते ॥ १४ ॥
प्रियाया उदराज्जातः प्रियस्ते पितुरुत्तमः ।
मामकीनतया दीनस्त्वं तु तात ! मतोऽधमः ॥ १५ ॥
आस्तां वत्स ! निजं भाग्यं भुङ्क्ष्व संतोषवान् भव ।
असंतोषवतो जन्तोर्भासते भीषणो भवः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



विद्वानां वचनशरैर्वृथा जनानां
विश्वेशं वरिवसितुं समुत्सुकानाम् ।
श्रेयः स्यादिति किल कर्म्मणैव शंसन्
सिद्धानां जयति गुरुर्विरिञ्चिसूनुः ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्षः सदयमनाः सुनीतिसूनोः
संपन्नः सपदि वयोऽनपेक्षभक्तिः।
सेराग्यः सकलसुपर्वचक्रवर्ती
चित्ते नश्वरतु वचोविदूरशक्तिः ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसादयस्व गोविन्दमानन्दं यदि वाञ्छसि ।
मानवं पदमापन्नस्तद्भक्त्या ते पितामहः ॥ १७ ॥
इति मातुर्वचः श्रुत्वा स एकाकी महामनाः ।
आरिराधयिषुः श्रीशं शिश्रिये गहनं वनम् ॥ १८ ॥
नारदादिष्टमार्गेण तपः कुर्वन् स बालकः ।
देवान् व्यस्मापयदिति वृत्तं वर्णितमष्टमे ॥ १९ ॥

ध्रुवोपाख्यानम् ।

(९) नवमे तत्तपस्तुष्टः प्रादुर्भूतः श्रियः पतिः ।
तेनाऽस्तूयत दिव्याभिः स्तुतिभिर्विमलात्मना ॥ १ ॥
तेजस्वितां तस्य पश्यँल्लालसां च गरीयसीम् ।
ज्योतिश्चक्राश्रयत्वं च साम्राज्यं च ददौ हरिः ॥ २ ॥
अथ प्रत्यागतः सोयं पित्रा तद्वृत्तवेदिना ।
सपौरेण पुरस्कृत्य प्रापितोऽभून्निजं पुरम् ॥ ३ ॥
तस्मिन् यौवनमारूढे प्रकृतिप्रियतां गते ।
धरायां धुरमाधाय पिताऽगात् तपसे वनम् ॥ ४ ॥

ध्रुवतपःसिद्धिः ।

(१०) दशमे शिशुमारस्य भ्रमिं कन्यां प्रजापतेः ।
परिणीय ध्रुवो लेभे तनयौ कल्पवत्सरौ ॥ १ ॥
वायुपुत्र्यामिलायां च पत्न्यामुत्कलनामकम् ।
तनयं तनयां चैकां रम्यरूपामलब्ध सः ॥ २ ॥
उत्तमश्चाकृतोद्वाहो ध्रुवभ्राता महाद्युतिः ।
गहने गुह्यकैर्जघ्ने मृगयायै विनिर्गतः ॥ ३ ॥
ध्रुवोऽप्यमर्षी निरगात् कृतप्रतिचिकीर्षया ।
अभूच्च तुमुलं युद्धं तस्य तैः सह गुह्यकैः ॥ ४ ॥
मायाविभिर्युध्यमानं तं विदित्वा महर्षयः ।
आशंसन्ति स्म कल्याणं समागत्य समन्ततः ॥ ५ ॥

ध्रुवगुह्यकयुद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११) एकादशे ध्रुवः क्रुध्यन्नस्त्रं नारायणाभिधम् ।
प्रयुज्य कदनं तेषां चकार मदशालिनाम् ॥ १ ॥
यक्षक्षयक्षुब्धबुद्धिर्मनुः पौत्रमुपागतः ।
निवारयामास मितैरुचितैर्वचनैर्हितैः ॥ २ ॥
धनदस्य प्रसादाय तमादिश्य तदर्चितः ।
स्वायम्भुवः प्रतीयाय साकमेव महर्षिभिः ॥ ३ ॥

ध्रुवविजयः ।

(१२) द्वादशे गुह्यकाधीशः समागत्य सुनीतिजम् ।
अभ्यनन्दद्विष्टकृतं यक्षक्षयमचिन्तयन् ॥ १ ॥
अथ स्वपुरमायातो महाभागवतो ध्रुवः ।
ईजे मखैरसङ्ख्यातैर्बर्हिर्मुखसुखप्रदैः ॥ २ ॥
आसेव्य दुर्लभान् भोगानाराध्य मधुसूदनम् ।
पालयित्वा भुवो गोलं समाप्य बहुलं वयः ॥ ३ ॥
आक्रम्य मृत्योर्मूर्धानं स्तूयमानोऽखिलैर्जनैः ।
व्योमयानं समारुह्य ध्रुवोऽगच्छन्निजां गतिम् ॥ ४ ॥
तं तस्य महिमानं च सचेता नारदो मुनिः ।
वीणामादाय मुदितो जगौ सत्रे प्रचेतसाम् ॥ ५ ॥

ध्रुवस्य ध्रुवलोकप्राप्तिः ।

(१३) त्रयोदशे ध्रुवसुते प्रपञ्चविमुखे गते ।
उत्कलेऽकल्पि भूपालः प्रजाभिर्वत्सरोऽनुजः ॥ १ ॥
सप्तमः पुरुषस्तस्मादङ्गो नाम व्यजायत ।
सुनीथां मृत्युतनयां परिणिन्ये स पार्थिवः ॥ २ ॥
अनपत्यत्वसंतप्तः स पुत्रेष्ट्या चिरान्नृपः ।
तनयं वेननामानं सुनीथायामविन्दत ॥ ३ ॥
तं च दुर्वृत्तमालोच्य बाल्यादेव, विषण्णधीः ।
अङ्गोऽगात्तपसेऽरण्यं परिवारैरलक्षितः ॥ ४ ॥

अङ्गराजनिर्गमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१४) चतुर्दशे सुनीथायास्तनयं वेनमुद्धतम् ।
अभ्यषिञ्चन् प्रकृतयः क्षितिरक्षणकर्मणे ॥ १ ॥
स प्रकृत्यैव दुष्टः सन्नधर्मान्वयसंभवः ।
न्यषेधत् सर्वतो धर्मं तपोदानाऽध्वरादिकम् ॥ २ ॥
हितार्थिभिर्मुनिजनैरनुनीतोऽपि दुर्मतिः ।
सर्वेश्वरोऽहं मामेव यजध्वमिति सोऽब्रवीत् ॥ ३ ॥
धर्मबाधामनिच्छद्भिस्ततः क्रुद्धैस्तपोधनैः ।
निर्ह्रादजयिभिर्घोरैः पातितोऽभूत् स हुङ्कृतैः ॥ ४ ॥
सुदुस्त्यजाऽऽत्मजस्नेहविवशाऽनन्यसन्ततिः ।
सुनीथा स्थापयामास योगैः सुतकलेवरम् ॥ ५ ॥
अराजकत्वसंजातप्रजाविप्लवभीषिताः ।
ममन्थुरूरुं वेनस्य समवेता महर्षयः ॥ ६ ॥
ऊरौ प्रमथ्यमाने च मेचको विकृताकृतिः ।
वेनकिल्बिषभागेन निषादः समजायत ॥ ७ ॥

वेनोपाख्यानम् ।

(१५) अथ पञ्चदशे वेनबाहोरुन्मथितादभूत् ।
पृथुर्नाम कला विष्णोरर्चिर्नाम श्रियः कला ॥ १ ॥
अथ प्रमुदितैर्देवैः पृथिवीपालनक्षमः ।
संपूर्णलक्षणः सोऽयमभ्यषेचि यथोचितम् ॥ २ ॥
हरिप्रभृतिभिर्दत्तमुपायनमवाप्य सः ।
सुदर्शनादिकं दिव्यमत्यरिच्यत दिक्पतेः ॥ ३ ॥
लोकातीतगुणग्रामः स्पृहणीयतराकृतिः ।
न्यवारयत् स्वं स्तुवतः सूतादीन् स महामतिः ॥ ४ ॥

पृथूत्पत्तिः ।

(१६) षोडशे मुनिभिः सर्वैर्भविष्यद्वृत्तवेदिभिः ।
आदिष्टा एनमुर्वीशमस्तुवन् सूतवन्दिनः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भविष्यद्भिः शुभतरैश्चरितैरस्य कीर्तितैः ।
ते सन्तापं निरहरन् प्रकृतीनां चिरन्तनम् ॥ २ ॥

पृथुप्रशंसा ।

(१७) अथ सप्तदशे वैन्यमभिषिक्तं समन्ततः ।
प्रजा अभ्याययुः सर्वाः क्षुधाक्षीणकलेवराः ॥ १ ॥
निरन्नतां प्रपन्नानां प्रजानां वीक्ष्य दुर्दशाम् ।
अनुत्पादितसस्यायै धरायै क्रुध्यति स्म सः ॥ २ ॥
शरोत्तमधरे तस्मिन् करे कुर्वति कार्मुकम् ।
पराद्रवद्दराक्रान्ता धेनुरूपधरा धरा ॥ ३ ॥
पृथुरप्यन्वगादेनां धीरः सज्जधनुर्धरः ।
तत्र तत्र गता सा च न त्रातारमविन्दत ॥ ४ ॥
परानपेक्षया योगसिद्ध्यैव सकलाः प्रजाः ।
भर्तुमिच्छन्तमालोक्य पृथुमस्तौद्वसुन्धरा ॥ ५ ॥

पृथुविजयः ।

(१८) अष्टादशे " तिरोधानं कदाचारकदर्थिता ।
कृतवत्यस्मि सस्यानां तानि दुग्धि यथेप्सितम् " ॥ १ ॥
इति क्षोणीं व्याहरन्तीं धृतधैर्यामदुग्ध सः ।
वत्सं स्वायम्भुवं कुर्वन्नोषधीर्विविधाः पृथुः ॥ २ ॥
अथाऽपरेऽपि देवाद्याः पृथक्कल्पितवत्सकाः ।
यथामनोरथं वस्तु तदा दुदुहिरे धराम् ॥ ३ ॥
ततः प्रीतः पृथुः पृथ्वीं पर्वतैर्विषमामिमाम् ।
तानुत्सार्य समां चक्रे धनुष्कोट्या महाबलः ॥ ४ ॥

पृथ्वीदोहः ।

(१९) एकोनविंशे तु पृथुः पालयन् पृथिवीतलम् ।
शतेन हयमेधानां यष्टुमैहिष्ट धीरधीः ॥ १ ॥

१ दरेण भयेन आक्रान्ता सती पराद्रवत् पलायते स्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रद्धोपकरणं तेन सश्रद्धेन समापितम्।
ऊनमेकेन तु शतं मखानां विघ्नवर्जितम् ॥ २ ॥
अथाऽन्तिमं मखं कर्तुं समुत्सृष्टं तुरङ्गमम्।
अन्तर्हितोऽहरत्तस्य स्पर्धमानः पुरन्दरः ॥ ३ ॥
अत्रिरैक्षिष्ट तं दिव्यदृष्टित्वेन तपोधनः।
जहीमं हयहर्तारमिति चोचे पृथोः सुतम् ॥ ४ ॥
जटाधरं भस्मदिग्धं हरन्तं यज्ञियं हयम्।
न प्राहरत् पृथोः सूनुर्वर्णिनं तं वितर्कयन् ॥ ५ ॥
पुनरत्रिनियुक्तोऽसौ तं प्रहर्तुमुपाद्रवत्।
सरूपमश्वमुत्सृज्याऽन्तरधाच्च पुरन्दरः ॥ ६ ॥
अश्वं पुनर्यूपबद्धं हरन्तं मुनिदर्शितम्।
न जघान पृथोः पुत्रः पात्रखट्वाङ्गधारिणम् ॥ ७ ॥
नियुक्तश्चात्रिणा भूयस्तं जिघांसुरुपागमत्।
इन्द्रश्चाश्वं समुत्सृज्य त्वरयैव तिरोदधे ॥ ८ ॥
निषिध्य शक्रनाशाय सन्नद्धं पृथुमात्मना।
ऋषयो हयहर्तारं होतुमारेभिरे रुषा ॥ ९ ॥
आविर्भूय ततो ब्रह्मा बोधयित्वा सदुक्तिभिः।
पृथुं न्यवारयद्यज्ञाद्वृद्धवाक्याविरोधिनम् ॥ १० ॥
मनोजवसतां प्राप्तः पृथुसूनुर्निजैर्गुणैः।
विश्वविख्यातमहिमा विजिताश्वाऽभिधोऽभवत् ॥ ११ ॥

पृथुहयमेधः।

(२०) विंशे मरुत्वता सार्धमाविर्भूय श्रियः पतिः।
सखेदमनुजग्राह पृथुं तत्त्वोपदेशतः ॥ १ ॥
कृतकृत्यो ज्ञाततत्त्वः पृथुरिन्द्रेण लज्जया।
वन्दितः पदयोर्द्वन्द्वे गोविन्दानुग्रहाश्रयः ॥ २ ॥

(१) मनोजवसः पितृसन्निभः, इत्यमरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जहौ पृथुर्वैमनस्यं परिष्वज्य शतक्रतुम् ।
वरं ब्रूहीति भगवान् विष्णुश्चैनमभाषत ॥ ३ ॥
स च गद्गदगीः स्तुत्वा गदाधरमुदारधीः ।
अनिच्छन्नितरत्तुच्छं वव्रे भक्तिमयं वरम् ॥ ४ ॥

पृथोरनुग्रहः ।

(२१) एकविंशे कृतार्थः सन् प्रत्यावृत्य पुरीं प्रति ।
रञ्जयन् शुद्धया नीत्या स शशास निजाः प्रजाः ॥ १ ॥
एकदा च स राजर्षिः क्वापि दीर्घे दिवौकसाम् ।
सत्रे बहुजनाकीर्णे व्याचचक्षे विचक्षणः ॥ २ ॥
स्वयं सन्नद्धमतयः ! पुमर्थश्रेणिसिद्धये ।
सभ्या ! ममापि सिद्धान्तं शृणुत श्रुतविश्रुताः ! ॥ ३ ॥
प्रशासितुरनुज्ञातुः कर्तुः श्रेयस्करोऽपरः ।
संसारान्धो[१]ः समुद्धर्ता न धर्मादस्ति बान्धवः ॥ ४ ॥
धर्मात्मनां परिणतिं प्रेक्षध्वं दीर्घया दृशा ।
पापात्मनामुदर्कं च वितर्कयत सर्वतः ॥ ५ ॥
सर्वेश्वरः सर्वसाक्षी कश्चिदस्ति विचारितः ।
तमाराधत प्रीतास्तदाज्ञावशवर्तिनः ॥ ६ ॥
मनसा वपुषा पुंसा वचसा च समर्जिता ।
धुनीते भगवद्भक्तिः स्वर्धुनीवाऽखिलं मलम् ॥ ७ ॥
शाब्दं ब्रह्म दधानानां सर्वकल्याणकारिणाम् ।
ब्राह्मणानां पदद्वन्द्वं वन्दध्वं नतमौलयः ॥ ८ ॥

पृथुशासनम्

इति श्रुत्वा पृथोर्वाचं धर्मामृतपरिप्लुताम् ।
सभ्यवर्गः शंमाशंसन्नभ्यनन्दत् प्रहर्षितः ॥ ९ ॥

(१) अन्धुः कूपः तस्मात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२२) द्वाविंशे हरिणाऽऽदिष्टान् सनकादीन् नृपः पृथुः।
दर्दर्श दर्भाग्रमतीन् पुरस्तादर्भकाकृतीन् ॥ १ ॥

यथोचितं समादृत्य समाहितमतिः स तान्।
आत्यन्तिकक्षेमहेतुं पप्रच्छ विहिताञ्जलिः ॥ २ ॥

अन्यैः पुरस्कृतः स्वच्छास्मितद्योतितदिङ्मुखः।
सनत्कुमारः प्रत्यूचे भगवान् दिव्यदर्शनः ॥ ३ ॥

भक्तेर्विरक्तियुक्ताया भगवद्भजनात्मनः।
आत्यन्तिकक्षेमकर्ता नृपते ! नापरो विधिः ॥ ४ ॥

नाङ्गनायां नाङ्गजे[1] च न गाङ्गेयादिवस्तुनि[2]।
विद्यते मङ्गलं जन्तोः सङ्गभङ्गे[3]ऽस्ति मङ्गलम् ॥ ५ ॥

ईशाङ्घ्रिनावमाश्रित्य भक्तिं चारित्रतां[4] गताम्।
समादाय तर क्षिप्रं दुस्तरं भवसागरम् ॥ ६ ॥

इति क्षेमपथं श्रुत्वा कृतार्थः सन् पृथुर्नृपः।
व्यसर्जयत् समादृत्य मुनीन् कृत्यविदग्रणीः ॥ ७ ॥

अवञ्चितः प्रपञ्चेन समाहितमतिः पृथुः।
अर्चिर्नामनि भार्यायां पञ्च पुत्रानजीजनत् ॥ ८ ॥

पृथवे कुमारोपदेशः।

(२३) त्रयोविंशे जराजीर्णं स्वं वपुर्वीक्ष्य धीरधीः।
राज्यं समर्प्य पुत्रेभ्यः सदारोऽगात् पृथुर्वनम् ॥ १ ॥

---

(१) अङ्गजे पुत्रे। (२) गाङ्गेयादिवस्तुनि सुवर्णादौ द्रव्ये। (३) सङ्गभङ्गे निःसङ्गतायाम्। (४) अरित्रतां नौकावाहककाष्ठविशेषतां, (कामादिषड्वर्गवैरिसमुद्भूतभयनिवारकतां च) प्राप्तां भक्तिमालम्ब्य परमेश्वरचरणमयीं तरणिमाश्रयद्भिर्जनैर्दुस्तरोऽपि भवसागरस्तीर्यते, इति भावः। अरित्रं केनिपातकः इति चामरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स निर्जितेन्द्रियग्रामस्तपस्यन् भक्तिभावितः ।
ज्ञाततत्त्वो रुद्धवृत्तिर्योगेन तनुमत्यजत् ॥ २ ॥
अर्चिश्च महिषी तस्य विषीदन्ती धृतव्रता ।
कृतोदका भक्तिमती प्राविशज्जातवेदसम् ॥ ३ ॥
तयोस्तां तादृशीं वीक्ष्य दुर्लभां गतिमुत्सुकाः ।
प्रसूनानि प्रवर्षन्त्यः प्रशशंसुः सुरस्त्रियः ॥ ४ ॥

पृथुनिर्वाणम् ।

(२४) चतुर्विंशे पृथोः सूनुर्विजिताश्वोऽनुजप्रियः ।
विभज्य राज्यमकरोद् द्विभार्यः सज्जनाग्रणीः ॥ १ ॥
पुत्रत्रयं शिखण्डिन्यामुत्पाद्याऽग्न्यंशसंभृतम् ।
नभस्वत्यां हविर्धानं नाम पुत्रमविन्दत ॥ २ ॥
हाविर्धानिस्तस्य पुत्रः, षट् पुत्रास्तस्य जज्ञिरे ।
प्राचीनबर्हिर्नृपतिस्तेषामाद्योऽतिविश्रुतः ॥ ३ ॥
उपयेमे शिवाऽऽदिष्टः स सामुद्रीं शतद्रुतिम् ।
तस्यां दशाऽभवन् पुत्राः सर्वे नाम्ना प्रचेतसः ॥ ४ ॥
तपःसमुद्यतांस्तांश्च शङ्करः करुणामयः ।
रुद्रगीताभिधं स्तोत्रमुपादिक्षदितीर्यते ॥ ५ ॥

पृथुवंशवर्णनम् ।

(२५) प्राचीनबर्हिषं भूपं नानाविषयलोलुपम् ।
अध्यात्मं बोधयन्नूचे पारोक्ष्यान्नारदो मुनिः ॥ १ ॥
पुरञ्जनो[1] नाम पुरा राजासीद्विश्वविश्रुतः ।
अविज्ञाता[2]ऽभिधो यस्य सखाऽऽसीद्बहुविक्रमः ॥ २ ॥
अनुरूपां पुरी[3]मिच्छन् भ्रमन्नेव पुरञ्जनः ।
आससाद पुरीमेकां नवद्वारां[4] मनोरमाम् ॥ ३ ॥

---

(१) पुरञ्जनः जीवः । (२) अविज्ञातनामा सखा ईश्वरः । (३) पुरी शरीरम् । (४) नवद्वारां पुरीं नरशरीरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिमवद्गिरिपार्श्वस्थांमारामशतशोभिताम् ।
दुरासदां तां नगरीमध्यासितुमियेष सः ॥ ४ ॥
तावद्रुचिरसर्वाङ्गीं नीलेन्दीवरलोचनाम् ।
फणपञ्चकविभ्राजिभुजङ्गकृतरक्षणाम्– ॥
संयुक्तां दशभिर्भृत्यैरनेकपरिवारकैः ।
साभिलाषं समायान्तीं ददर्श वनितोत्तमाम् ॥ ५–६ ॥
अथ कामयमानोऽयं तामादृत्य शुचिस्मिताम् ।
द्वितीयां विदधे दूराद्विजिहीर्षुतयाऽऽगताम् ॥ ७ ॥
राजत्परिजनाढ्यायां तस्यां पुरि तया सह ।
दाम्पत्यमाश्रितः स्वैरं विजहार मनामनाः ॥ ८ ॥
यथेच्छं नवभिर्द्वारैर्निर्गच्छन् प्रविशन्नपि ।
पुरीमुद्द्योतयामास विहारेण पुरञ्जनः ॥ ९ ॥
गाढानुरागी दयितां पुरस्कृत्यैव सर्वदा ।
तदिच्छानुचरो भूत्वा कर्म सर्वं चकार सः ॥ १० ॥
इति बुद्ध्या निबद्धस्य तनुमाश्रित्य मानवीम् ।
जीवस्य संसृतिदशा पञ्चविंशे प्रदर्शिता ॥ ११ ॥

पुरञ्जनोपाख्याने संसृतिदशा ।

(२६) मृगयारासिकत्वेन कदाचन पुरञ्जनः ।
रथं पञ्चाश्वमारुह्य पञ्चप्रस्थवनं ययौ ॥ १ ॥

---

(१) कर्मक्षेत्रभूते भारतवर्षे विद्यमानाम् । (२) आरामसदृशनानाविधभोग्यविषयसंपन्नाम् । (३) दुर्लभां दुराधर्षां च । (४) पञ्चविधप्राणरक्षिताम् । (५) भरणीयैः दशभिरिन्द्रियैः । (६) नानाविधवृत्तिसहितैः । (७) इच्छन् । (८) द्वितीयां विदधे–पत्नीं चकार, स्वयमेकस्तां सत्यतया जानन् द्वितीयां चक्रे च । (९) जायापतिभावं संबन्धमित्यर्थः । (१०) चक्षुः श्रोत्रादिमार्गेण विषयोपभोगाय । (११) जानाति इच्छति यतते इति क्रमानुसारेणेत्यर्थः । (१२) भोगैकलम्पटतया । (१३) ज्ञानेन्द्रियसंयुक्तं स्वप्नदेहरूपं रथ । (१४) शब्द–स्पर्शादिविषयपञ्चकयुक्तां भोगभूमिम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुप्तां कान्तामनादाय सेनापतिसमन्वितः ।
उच्चावचे वनोद्देशे मृगयामाचरन्नृपः ॥ २ ॥
अथ श्रान्तः परावृत्य स्वकीयां नगरीं गतः ।
स्नातानुलिप्तस्तृप्तः सन्नियेष महिषीं नृपः ॥ ३ ॥
स्वस्थानस्थामदृष्ट्वा तां पृच्छँस्तत्परिचारिकाः ।
ददर्श कुपितां भूमौ स्थितां म्लानमुखीं प्रियाम् ॥ ४ ॥
अनुरागोद्गारपूर्णैरपराधप्रमार्जकैः ।
मधुरैर्वचनैरेनामनुनिन्ये पुरञ्जनः ॥ ५ ॥
इति बुद्धिं विवेकाढ्यां विहाय मनसा सह ।
स्वप्नं गतस्य जीवस्य वृत्तं षड्विंशके स्थितम् ॥ ६ ॥

पुरञ्जनोपाख्याने स्वप्नदशा ।

(२७) सप्तविंशे प्रसन्नायां महिष्यां स पुरञ्जनः ।
रेमे प्रसादमासाद्य सुचिरं तदनन्यधीः ॥ १ ॥
सहस्राभ्यधिकान् पुत्रान् दुहितॄश्च शताधिकाः ।
उत्पादयामास बली स पञ्चालमहीपतिः ॥ २ ॥
पुत्रान् दारैर्योग्यरूपैः पुत्रीः समुचितैर्वरैः ।
संयोज्य सुचिरं रेमे कृतार्थ इव सोऽनिशम् ॥ ३ ॥

---

(१) बहिरिन्द्रियेषु श्रमादिना विरतव्यापारेषु वृत्तिवर्जितामिव । (२) प्रियं विवेकवतीं बुद्धिम् (३) सेनापतिना इन्द्रियवर्गनायकेन मनसा समन्वितः । (४) उच्चावचे उच्चनीचरूपे विविधात्मके च । (५) भोगभूमौ । (६) स्वकीयां नगरीं जाग्रद्देहम् । (७) पूर्वं स्नातः पश्चादनुलिप्तः । (८) तृप्तः कृताहार इत्यर्थः । (९) स्वस्थानस्थां तत्तद्विषयविवेकदशायां वर्तमानाम् । (१०) विविध बुद्धिवृत्तीः ।

(१) प्रबोधावस्थामापन्नायाम् । (२) अनन्तान् इन्द्रियपरिणामान् । (३) दुहितः बुद्धिवृत्तीः । (४) पञ्चालमहीपतिः शब्दादिविषयपञ्चकभोगवान् । (५) इन्द्रियपरिणामानन्तरोत्पन्नाभिर्हिताहितचिन्तनाभिः । (६) वरैः उचितैर्विषयभोगैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ गन्धर्वराजेन[1] चण्डवेगेन सा पुरी[2] ।
[3]जिहीर्षिताऽभवत्तेन चिन्तामाप पुरञ्जनः ॥ ४ ॥
[4]गन्धर्वानुचरैर्नानारूपैरेकः समागतैः ।
[5]पुराध्यक्षः स युयुधे बली पञ्चफणः फणी[6] ॥ ५ ॥
इति बुद्ध्याऽऽलम्बनस्य कालाक्रान्तस्य जाग्रतः ।
प्राणरक्षितदेहस्य स्थितिर्जीवस्य दर्शिता ॥ ६ ॥

पुरञ्जनोपाख्याने वार्धक्यदशा ।

(२८) [1]उपद्रुतां चण्डवेगाऽनुचरैर्यवनाऽनुगाः[2] ।
तां [3]पुरीमर्दितुं द्वारैः सर्वैरेव समाविशन् ॥ १ ॥
[4]कालकन्याऽभिधा काचिद्दुर्हृदरूपा दुराकृतिः ।
अज्ञातैवाऽविशद्राज्ञा तां पुरीं बलशालिनी ॥ २ ॥
[5]तदात्वे रक्षितुं तेभ्यः पुराध्यक्षश्च तां पुरीम् ।
कुर्वन् प्रयत्नमधिकं न शशाक फणीश्वरः ॥ ३ ॥
यवनानुचराणां च गन्धर्वाणां च पौरुषात् ।
सा विशीर्णा पुरी रम्या सप्राकारा[6] सतोरणा[7] ॥ ४ ॥
पुरीं जिहासन् निर्विण्णो हतोत्साहः पुरञ्जनः ।
[8]भयभ्रात्रोपस्थितेन [9]प्रज्वारेण न्यरुध्यत ॥ ५ ॥
अदाहि सा च नगरी तेनैकेन गरीयसी ।
अन्वतप्यत राजा च स्वकुटुम्बानुकम्पया ॥ ६ ॥

---

(१) अनवरतप्रवाहेण क्षणलवनिमेषनाडिकादिनरात्रिपक्षमासत्वयनवत्सररूपेण कालेन । (२) पुरीदेहः । (३) जिहीर्षिताऽभवत् हर्तुमिष्टाऽभूत् । (४) क्षणलवप्रभृतिभिः कालकलाभिः । (५) पुरपालकः । (६) प्राणः ।

(१) उपद्रुतां दत्तोपद्रवाम् । (२) मृत्युपार्षदा रोगाः । (३) अर्दितुं पीडयितुम् । (४) कालकन्या मृत्युः । (५) तदात्वे तत्कालम् । (६) प्राकारोपमसप्तावरणकुड्यकसहिता । (७) तोरणोपमश्रोत्रादिद्वारयुक्ता । (८) भयस्य मरणस्य भ्रात्रा सहजेन । (९) प्रज्वारेण मरणसमयोत्थतापेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चिन्तयन् महिषीमेव प्राधान्येन पुरञ्जनः ।
भयं[1]नाम्ना भूरिधाम्ना[2] भटेन समगृह्यत ॥ ७ ॥
स सखायं[3]मविज्ञातं स्मृ[4]त्युपस्थायिनं निजम् ।
अहितैरुपसंतप्तस्तस्यामापदि नाऽस्मरत् ॥ ८ ॥
नीयमानं क्षयं घोरैर्यवनैर्बद्धविग्रहम् ।
अन्वगच्छन् क[5]तिपये स्वामिभक्ताः पुरञ्जनम् ॥ ९ ॥
पुरञ्जने च निर्याते साऽनुगे सा पुरी पुनः ।
स्वकीयां प्र[6]कृतिं प्राप जनयन्तीव विस्मयम् ॥ १० ॥
अथोत्क्रान्तश्च तामेव कान्तां दृढतया स्मरन् ।
विद[7]र्भराजतनयारूपमाप पुरञ्जनः ॥ ११ ॥
वैदर्भीं तां च राजन्यः समये म[8]लयध्वजः ।
उवाह तस्यां तनयां[9] सप्त[10] पुत्राश्च जज्ञिरे ॥ १२ ॥
नाम्ना धृ[11]तव्रतां तां च तनयां मलयध्वजः ।
अदादग[12]स्त्याय तयोः सूनुरासीद् दृ[13]ढच्युतः ॥ १३ ॥

---

(१) मरणेन। (२) बलवता। (३) ईश्वरम्। (४) स्मृतिमात्रेण उपतिष्ठमानम्। (५) लिङ्गशरीरारम्भका इन्द्रियमनस्तन्मात्ररूपाः स्वामिभक्ता भृत्याः।

(६) यथायथं पृथ्व्यप्तेजोवाय्वाकाशेषु स्वप्रकृतिषु लीनतां प्राप। (७) पतिव्रतायाः स्वप्रियाया निरन्तरानुध्यानवशात् सत्कर्मशालिनः कस्यचिद्विदर्भनृपतेः कन्यारूपेण पुनरुत्पन्नः। "अन्ते या मतिः सा गतिः" इति भावः। (८) दाक्षिणात्यो भगवद्भक्तो राजर्षिः। (९) स्त्रीभावं प्राप्तस्य पुरञ्जनस्य भगवद्भक्तसंसर्गात् भगवद्भजनरुचिरूपा कन्या, (१०) श्रवण–कीर्तन–स्मरण–पादसेवन–पूजन–वन्दन–दास्य, रूपाः सप्त पुत्राश्च समजायन्तेति भावः। सख्यमात्मार्पणं च प्रान्ते भविष्यति।

(११) शमदमादिव्रतवतीं भगवद्भजनरुचिरूपां तां कन्याम्। (१२) अगस्त्याय निष्क्रियशरीरारम्भकाय मनसे। (१३) दृढतमसत्यलोकादिभोगपराङ्मुखो निर्वेदः।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां सन्तानमालोक्य सदारोऽसौ विनिर्गतः ।
कुलाचले तपस्तेपे किल संभृतसाधनः ॥ १४ ॥
योगत्यक्तशरीरे च तस्मिन् मरणकाङ्क्षिणी ।
वैदर्भी चिरमित्रेण संप्राप्तेनाऽभ्यधीयत ॥ १५ ॥
कच्चित् स्मरसि मित्र ! त्वं तौ हंसौ सच्चिदाकृती ।
एकं वृक्षं परिष्वज्य भविष्यावः सहोषितौ ॥ १६ ॥
कच्चित् स्मरसि मित्र ! त्वं ग्राम्यभोगबुभुक्षया ।
विचरन् युवतीमेकां साभिलाषो ग्रहीष्यसि ॥ १७ ॥
कच्चित् स्मरसि मित्र ! त्वं नवद्वारां पुरीं गतः ।
लप्स्यसे विपदो भेदान्निर्वेदादनुतप्स्यसे ॥ १८ ॥
कच्चित् स्मरसि मित्र ! त्वं यवनाद्यैरुपद्रुतः ।
स्वप्रेयसीमनासाद्य रुदन्नेव मरिष्यसि ॥ १९ ॥
न त्वं विदर्भतनया न चायं वल्लभस्तव ।
वैदर्भीतां सखे ! प्राप्ता तामनुध्यायता त्वया ॥ २० ॥
यया त्वं विविधामेतामापदं गमितः सखे ! ।
सा न जाया त्वदीया भोः ! सा माया प्रचुराकृतिः ॥ २१ ॥
यस्त्वं सोऽहं, यश्च सोऽहं स त्वं, साधु विचारय ।
उपाधिकल्पितामेतां भेदबुद्धिं निवारय ॥ २२ ॥
इति प्रबोधिता तत्त्वं तेन तत्त्वमवाप सा ।
इत्यष्टाविंशतितमे मुनिना प्रकटीकृतम् ॥ २३ ॥

पुरञ्जनस्य संसरणं प्रबोधश्च ।

(२९) ऊनत्रिंशेतु यद्वृत्तं पारोक्ष्येण प्रदर्शितम् ।
तदेव साधु विवृतं नारदेन विपश्चिता ॥ १ ॥

(१) तेषां श्रवणमननादिरूपाणां सप्तानां पुत्राणां सन्तानं । विस्तारम् । (२) चिरमित्रेण अज्ञातनाम्ना ईश्वरेण । (३) संप्राप्तेन साधनसंपत्त्या साक्षाद्भूतेन, सख्यमात्मार्पणं च एतावता लभ्यते । (४) एतेन— "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति श्रुत्यर्थः सूच्यते । (५) भविष्यावः अभवाव । भूते 'अभिज्ञावचने लृट्' इति लृट् । एवमुत्तरत्रापि ।

(६) विदर्भराजतनयाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धः सङ्गात् सङ्गहानान्मुक्तिर्भवति देहिनाम् ।
इति वेदान्तसिद्धान्तोऽप्यत्रैव प्रतिपादितः ॥ २ ॥
"आरामे[1] कुसुमाकीर्णे[2] चरन्तं मधुवाञ्छया[3] ।
वृकैरनुद्रुतं[4] हन्त ! हरिणं[5] हन्ति लुब्धकः[6] ॥ ३ ॥
अन्वेषय तमेतं त्वं ततः सिद्धिमवाप्स्यसि" ।
इत्यादिश्य च तं भूपं मुनिना तेन निर्ययै ॥ ४ ॥

प्राचीनबर्हिषः प्रबोधः ।

(३०) त्रिंशे तु रुद्रगीतेन श्रद्धया समुपासितः ।
प्रचेतसां पुरः साक्षादाविरासीदधोक्षजः ॥ १ ॥
वार्क्षीं कन्यामुद्वहध्वं ततश्च सृजत प्रजाः ।
मां भजध्वं भवाद्भीताः परमं पदमाप्नुत ॥ २ ॥
इत्यादिष्टा भगवता भक्तिभावितबुद्धयः ।
तुष्टात्मानः स्फुरद्वाचस्तुष्टुवुस्तं प्रचेतसः ॥ ३ ॥
यथाऽऽदेशं च ते वार्क्षीं परिणीय सचेतसः ।
दक्षमुत्पादयामासुः समवेताः प्रचेतसः ॥ ४ ॥

प्रचेतउपाख्यानम्

(३१) एकत्रिंशे सुते दक्षे पृथिवीपालनक्षमे ।
राज्यमाधाय निर्जग्मुस्तपसे ते प्रचेतसः ॥ १ ॥
नारदोक्तेन मार्गेण भक्तिमाश्रित्य कैशवीम् ।
तपस्यन्तोऽचिरेणैव प्रापुस्ते शाश्वतीं गतिम् ॥ २ ॥
इति मैत्रेयमुनिना वर्णितां भगवत्कथाम् ।
श्रुत्वा कृतार्थो विदुरः प्रत्यागाद्धास्तिनं पुरम् ॥ ३ ॥
इति श्रीशुकदेवश्च श्रीशकीर्तिमुदारधीः ।
अश्रावयत् क्षितिभृतं परीक्षितमितीरितम् ॥ ४ ॥

प्रचेतसां निर्वाणम् ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
चतुर्थः स्कन्ध एषोऽपि समक्षेपि यथामति ॥४॥

पद्यसंकलनाङ्काः २१०

(१) गृहे स्त्रीजनमनोहरे । (२) मृदुतराङ्गयोषिज्जनसमन्विते । (३) भोगलिप्सया । (४) क्षणलवादिभिः कालावयवैः । (५) विहाररसिकं जीवम् । (६) कृतान्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः ५)

प्रियव्रतादिप्रथितपृथिवीपतिपूजितम् ।
प्रपञ्चप्रशमं प्रेप्सुः प्रार्थये परमेश्वरम् ॥ ५ ॥

श्रीमते पुराणपुरुषोत्तमाय नमः ।

(१) अथातः पञ्चमः स्कन्धः स्थानत्वेन प्रपञ्च्यते ।
लोकद्वीपादिमर्यादारक्षादिप्रतिपादकः ॥ १ ॥
प्रथमे नारदात्प्राप्तविज्ञानोऽपि प्रियव्रतः ।
समादिष्टोऽपि मनुना नैच्छद्राज्यं महामतिः ॥ २ ॥
अथाऽऽजगाम भगवान् सगणः कमलासनः ।
उपतस्थे सपुत्रश्च मनुरेनं कृताञ्जलिः ॥ ३ ॥
विधिः प्रियव्रतं प्रोचे वत्स ! नैतन्मतं मम ।
निःसङ्गतां समासाद्य कर्म यत्त्वं जिहाससि ॥ ४ ॥
अहं च त्वत्पिता चाऽयमन्ये च गिरिशादयः ।
पश्य नित्यं कर्म कुर्मः सर्वेश्वरनियन्त्रिताः ॥ ५ ॥
तमेव देवं त्वमपि समाराधय कर्मणा ।
नाकर्मणो भद्रमस्ति कुर्वन्कर्माणि सिद्ध्यति ॥ ६ ॥
उपलब्धात्मतत्त्वोऽसि निर्विण्णोऽसि स्वभावतः ।
अलं बन्धभिया वत्स ! भुङ्क्ष्व भोगान्सृज प्रजाः ॥ ७ ॥
इत्यादिष्टः पद्मभुवा प्रियव्रत उदारधीः ।
ओमित्यूचे ततः सोऽपि स्वधाम प्रत्यपद्यत ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बर्हिष्मत्यां स भार्यायां सुतायां विश्वकर्मणः ।
दश पुत्रानजनयत्कन्यामूर्जस्वतीमपि ॥ ९ ॥
तस्य पुत्रेषु दशसु त्रयो निर्मुक्तबन्धनाः ।
निवृत्तिमार्गरसिकास्तदुद्दिश्य प्रतस्थिरे ॥ १० ॥
अथाऽन्यस्यां स जायायां त्रींल्लोकत्रयविश्रुतान् ।
सुतान्मन्वन्तरपतीनुत्तमादीनजीजनत् ॥ ११ ॥
एकादशार्बुदमितानब्दानेष महामनाः ।
वर्धयन् धर्मकर्माणि शशासोर्वीतलं नृपः ॥ १२ ॥
समवेगे रथे स्थित्वा समश्रीर्दूरनिर्गतम् ।
अनुगच्छन् रविं चक्रे नामशेषामसौ निशाम् ॥ १३ ॥
तच्चक्रनेमिपद्धत्यां गभीरायां धरातले ।
सप्तधा प्रविभक्तायां समुद्राः सप्त जज्ञिरे ॥ १४ ॥
तत्र तत्र भुवो भागा रथचर्यान्तरालगाः ।
प्रकल्पिताः किल द्वीपाः सप्त तेन महात्मना ॥ १५ ॥
कन्यामूर्जस्वतीं नाम शुक्राय प्रतिपाद्य सः ।
निवेशयामास सुतान् पृथग्द्वीपेषु सप्तसु ॥ १६ ॥
इति निर्विण्णधीर्योगी स भुक्त्वा विषयाँश्चिरम् ।
सर्वमुत्सृज्य रुचिरं शिश्रिये ज्योतिरान्तरम् ॥ १७ ॥

प्रियव्रतविजयः ।

(२) द्वितीये तु भुवो भागं जम्बूद्वीपाख्यमुत्तमम् ।
प्रियव्रतात्मजो ज्यायानाग्नीध्रः पर्यपालयत् ॥ १ ॥
स पुत्रकामः स्रष्टारं तपसा तोषयन्नृपः ।
तदादिष्टां पूर्वचित्तिमचष्टाऽऽश्रममागताम् ॥ २ ॥
लावण्यपूर्णतारुण्यां चलाचलविलोचनाम् ।
वीक्षमाणः क्षणादेतां ययौ सोन्मादतां नृपः ॥ ३ ॥
कथंकथंचित् कथयन्नुत्पथं मन्मथार्दितः ।
तां तपःफलतां यातां स चक्रे स्वानुरागिणीम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा तेन संगता राज्ञा विहरन्ती यथासुखम् ।
प्रसूय नाभिप्रमुखान् नवाऽगाद्ब्रह्मणः पदम् ॥ ५ ॥
कामेष्वतृप्त आग्नीध्रस्तामेव सततं स्मरन् ।
लोकमाप्सरसं प्राप श्रौतैः कर्मभिराहृतैः ॥ ६ ॥
सदारा मेरुपुत्रीभिर्नवभिर्नाभिनन्दनाः ।
जम्बूद्वीपस्य वर्षाणि नव ते पर्यपालयन् ॥ ७ ॥

आग्नीध्रचरितम् ।

(३) तृतीये भूभुजो नाभेः पुत्रेष्ट्या यजतः सतः ।
यज्ञे चतुर्भुजः साक्षादाविरासीज्जगत्पतिः ॥ १ ॥
ऋत्विग्भिर्निर्मलतरैर्वचनादिभिरर्चितः ।
अंशेनाऽवतरिष्यामीत्युक्त्वा सोऽन्तरधीयत ॥ २ ॥
आर्षवर्त्मप्रकाशार्थी सत्त्वमूर्तिर्जनार्दनः ।
कालेनाल्पीयसा नाभेर्मेरुदेव्यामजायत ॥ ३ ॥

ऋषभोत्पत्तिः ।

(४) चतुर्थे भगवल्लक्ष्मलक्षितं वीक्ष्य पुत्रकम् ।
अपूर्यत प्रमोदेन नाभिः प्रकृतिभिः सह ॥ १ ॥
सर्वातिशायि सकलं तस्य पश्यन्मनीषया ।
नामर्षभ इति प्रीतश्चक्रे स गुणसूचितम् ॥ २ ॥
निर्वृतोऽथ स राजर्षिर्निवृत्तिपथमाश्रितः ।
कियताचन कालेन जीवन्प्राप विमुक्तताम् ॥ ३ ॥
ऋषभस्त्विन्द्रकन्यायां जयन्त्यां सदृशान्छतम् ।
जनयामास तनयान् भरतादीन् महायशाः ॥ ४ ॥
भरतः सर्वतो ज्यायान्, कुशावर्तादयो नव ।
राजानः, कविमुख्याश्च बभूवुर्नव योगिनः ॥ ५ ॥
एकाशीतिमिताः शेषा यज्ञशीला महाधियः ।
विनीताः श्रुतसंपन्ना ब्राह्मण्यं कर्म्मणा ययुः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋषभश्च प्रमुदितः सप्ततन्तुभिराद्दतः ।
आराधयन्यज्ञमूर्तिमध्यतिष्ठद्वसुन्धराम् ॥ ७ ॥
पर्यटन्नेष राजर्षिर्ब्रह्मावर्ते निजान्सुतान् ।
ब्रह्मर्षिसदसि प्राप्तानुपदेष्टुं प्रचक्रमे ॥ ८ ॥

ऋषभोपाख्यानम् ।

(५) पञ्चमे सञ्चितं चारु सारं संसारिणां तपः ।
कीटजुष्टैरसारैश्च भोगैरलमनिष्टदैः ॥ १ ॥
मुक्तिः सत्सङ्गतः प्राप्या स्त्रैणसङ्गादधोगतिः ।
इत्येतज्जानते वत्साः ! सर्वतः श्रुतशालिनः ॥ २ ॥
परिचेया गुणैरेव सन्तस्ते च मनीषिभिः ।
आडम्बरेषु विश्रम्भः श्रेयोघाताय जायते ॥ ३ ॥
सदा सदाचारपराः शान्तशीतलचेतसः ।
द्वन्द्वैरनर्दिताः सन्तः परोपकृतिसस्पृहाः ॥ ४ ॥
नातिप्रसक्ताः संसारे भक्ता भगवतो हरेः ।
निषेवितास्तारयन्ति सन्तः सुकृतशालिनः ॥ ५ ॥
वपुषा जायते कर्म कर्मणा जायते वपुः ।
इति विच्छिद्यते जन्तोर्न संसारपरम्परा ॥ ६ ॥
अतः सन्तः प्रशंसन्ति नैष्कर्म्यं तत्त्वकोविदाः ।
तच्च कर्मार्पणकृतां भक्तिभाजां प्रजायते ॥ ७ ॥
अहैतुकी ततो भक्तिः साधनीया शरीरिभिः ।
नैष्कर्म्यसिद्धेरपरा पद्धतिर्नैव वर्तते ॥ ८ ॥
विरक्त्या तपसा शान्त्या धैर्येण नियमैर्यमैः ।
आसाद्यते हरेर्भक्तिर्मतिमद्भिः कृतश्रमैः ॥ ९ ॥
यो मृत्योर्मोचयेद्घोरात्स एव भविनां गुरुः ।
स पतिः स पिता स स्वः स माता नियतिश्च सः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्साः ! समवधार्यैतदार्यतां नित्यमाश्रिताः ।
भजध्वं भरतं प्रेम्णा सौमनस्यविभूषिताः ॥ ११ ॥
आकिञ्चन्यानन्तधनान् भगवन्मुखतां गतान् ।
सत्कुरुध्वं शमरतान्ब्राह्मणान्वेदवेदिनः ॥ १२ ॥
अनुशास्य सुतानेवं भरतार्पितभूभरः ।
ऋषभः परिवव्राज गात्रमात्रपरिग्रहः ॥ १३ ॥
सता संपन्नतां यातो व्रतमाजगरं चरन् ।
स चिरं पावयामास सोन्माद इव मेदिनीम् ॥ १४ ॥
ऋषभदेवव्याख्यानम् ।

(६) षष्ठे सिद्धीरनादृत्य विविधा योगसाधिताः ।
स्वानन्दतुष्टः स नृपश्चचारोर्वीं दिगम्बरः ॥ १ ॥
निर्दिश्यमानः स जनैर्दूरतो दक्षिणां दिशम् ।
समानधीर्भग्नमानः प्राप नग्नः शनैः शनैः ॥ २ ॥
ग्रसन्पाषाणशकलं संप्राप्तः कुटकाचलम् ।
सर्वदर्शी स राजर्षिर्दह्यते स्म दवाग्निना ॥ ३ ॥
कलौ कच्चरचित्ताश्च तच्चरित्राऽनुकारिणः ।
स्थाने स्थाने भविष्यन्तीत्युदितं व्याससूनुना ॥ ४ ॥
ऋषभदेवचर्या ।

(७) सप्तमे भरतो राज्यं प्राप्य विश्वजनीपतिः ।
पश्चाऽऽत्मजान् समुत्पाद्य मखैरीजे महाधनैः ॥ १ ॥
समेधमानया भक्त्या प्रेरितोऽथ सुधीः सुतान् ।
संस्थाप्य रिक्थिनः स्थाने निर्विण्णः स जहौ गृहान् ॥ २ ॥
पुलहाश्रममासाद्य चक्रनद्या समाश्रितम् ।
कन्दमूलफलाहारी शिश्रिये चक्रधारिणम् ॥ ३ ॥
वसानो हारिणीं कृत्तिं दधानः कपिला जटाः ।
स रुद्धवृत्तिर्नृपतिर्दध्यौ श्रीशद्युतिच्छटाः ॥ ४ ॥
प्रेक्षाप्रकल्पिताऽशेषं रजःपरमहं महः ।
प्रवर्तकं प्रयामीति प्रातः सूर्यमुपास्त सः ॥ ५ ॥
भरततपश्चर्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८) अष्टमे तटिनीतीरे जपन्प्रणवमग्रहीत् ।
गर्जत्सिंहत्रस्तमृगीगर्भप्रच्युतमर्भकम् ॥ १ ॥
तं च सुन्दरसर्वाङ्गं स राजर्षिर्दयामयः ।
अनन्यगतिकं दीनं पुपोष मृतमातृकम् ॥ २ ॥
सहाऽऽसीनेन सर्वत्र सर्वत्र सह गच्छता ।
कुरङ्गशिशुना तेन शनकैर्बध्यते स्म सः ॥ ३ ॥
आयुषोऽन्तेऽपि राजर्षिस्तमेव मृगबालकम् ।
स्मरन् कलेवरं हित्वा मृगत्वं सत्वरं ययौ ॥ ४ ॥
पूर्वं जन्म स्मरन् भक्तिप्रभावादनुतप्य सः ।
निर्विण्णस्त्यक्तसंसर्गः काले मृगवपुर्जहौ ॥ ५ ॥

भरतस्य मृगभावस्तत्त्यागश्च ।

(९) नवमे नवपुत्रस्य द्विभार्यस्य द्विजन्मनः ।
द्वितीयस्यां द्वितीयायां भरतस्याऽभवज्जनिः ॥ १ ॥
स्मृतपूर्वजनुर्वृत्तः सङ्गभीतः समाहितः ।
श्रीशपादार्पितमतिः स बभूव जडाकृतिः ॥ २ ॥
ताते स्वकीये स्वर्याते‌ऽनुयातायां च मातरि ।
स्वभ्रातृभिरवज्ञातोऽभुङ्क्त कर्म स निर्ममः ॥ ३ ॥
शीतोष्णवातवर्षादिसहिष्णुस्तुष्टधीश्च सः ।
यथोपलब्धभुक् पीनो वपुषाऽऽसीन्मलीमसः ॥ ४ ॥
कर्माणि कार्यमाणोऽपि स चकार यथातथा ।
अनिवार्यं मन्यमानः स्वं कर्म प्राक्तनं तथा ॥ ५ ॥
चण्ड्यै नरबलिं दातुं जातु दस्युगणाधिपः ।
भृत्यैः समानीतममुं पशुत्वे समकल्पयत् ॥ ६ ॥
अर्चितं भोजितं चैनं गन्धमाल्यैरलङ्कृतम् ।
पुरस्ताच्चक्रिरे चण्ड्याः पणयः पीवरं पशुम् ॥ ७ ॥

(१) पत्नी पाणिगृहीतीचेत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नतमौलिं निर्विकारं तं छेत्तुमतिदारुणम् ।
कौक्षेयकं तीक्ष्णधारं पाणिभ्यां पणिराददे ॥ ८ ॥
अथ व्यतिक्रमक्रुद्धा प्रकटीभूय चण्डिका ।
तेनैव खलु खड्गेन ताञ्जघान तरस्विनी ॥ ९ ॥
पीत्वाऽसृगासवं देवी सगणा मुण्डकन्दुकैः ।
क्रीडन्ती च हसन्ती च नृत्यन्ती च तिरोदधे ॥ १० ॥

जडतां गतस्य भरतस्य वधप्रसङ्गः ।

(१०) दशमे कपिलं द्रष्टुं गच्छन् राजा रहूगणः ।
चरन्तमेनमकरोच्छिबिकावाहकं बलात् ॥ १ ॥
अनभ्यासवशादेष विषमां गतिमाश्रयन् ।
भूभुजा शिबिकाभाजा सरोषमधिचिक्षिपे ॥ २ ॥
"भ्रातः ! कृशीयाञ्जीनश्च त्वमेकः शिबिकां मम ।
वहन्नश्रान्तमेवाऽऽसीर्हन्त ! श्रान्तोऽसि दुर्बलः" ॥ ३ ॥
अधिक्षिप्तोऽपि तेनेत्थं दर्पभाजा महीभुजा ।
स मौनेनैव शिबिकामुवाह निरहङ्कृतिः ॥ ४ ॥
"पुनर्विषमतां यातां शिबिकां वीक्ष्य रोषणः ।
नीचयोग्यामनुच्चार्यां वाचमूचे रहूगणः ॥ ५ ॥
पुनः कदर्थयसि रे जीवन्मृत ! न पश्यसि ।
प्रमत्तोऽसि ततो मत्तश्चिकित्सां द्रुतमर्हसि" ॥ ६ ॥
इति राजमदेनान्धं प्रविष्टं दुस्तरं तमः ।
हसन्निव प्रशान्तात्मा प्रत्यूचे स द्विजोत्तमः ॥ ७ ॥
"सत्यं ब्रूषे न मे भारो न पन्था न परिश्रमः ।
शिशुर्युवा कृशः पीन इत्यादिर्वपुषः क्रमः ॥ ८ ॥
तथ्यं जीवन्मृतत्वं च भावानां परिणामिनाम् ।
भवेऽस्मिन् भङ्गुरे स्वत्वं स्वामित्वं वा क्व वर्तताम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुन्मत्तस्य किं दण्डैरुन्मत्तस्य सतः स्वतः ।
दण्डमिच्छसि चेत्पिण्ढि पिष्टं द्विष्टमिदं न नः ॥ १० ॥
भर्तृतां भृत्यतां जन्तोर्जानन्तश्चित्तकल्पिताम् ।
सेवेमहि कथङ्कारं तं प्रकारं समादिश" ॥ ११ ॥
इति प्रतिवचः श्रुत्वा भूपतिर्निरहङ्कृतिः ।
अवरुह्य क्षमां प्रार्थ्य जगाद पदयोर्नतः ॥ १२ ॥
प्रपञ्चोऽर्थक्रियाकारी सत्यतां नातिवर्तते ।
तथात्वे च श्रमादीनां मिथ्यात्वं वाचि वर्तते ॥ १३ ॥
पच्यन्ते तण्डुलाः स्थालीपृष्ठलग्नेन वह्निना ।
जीवः सुखादि लभते वस्तुना देहसङ्गिना ॥ १४ ॥
शास्यता शास्तृता कालकलयाऽपि प्रजायते ।
स्थिता उन्मत्तदण्डाय शास्त्रयोनिप्रवर्तिताः ॥ १५ ॥
भगवन्निति सन्देहतरलीकृतचेतसम् ।
पदयोस्ते सापराधं प्रपन्नं शाधि मामिति ॥ १६ ॥

भरतरहूगणसंवादः ।

(११) एकादशेऽर्थकर्तापि प्रपञ्चस्तत्त्ववेदिनाम् ।
दृष्टानुश्रविकात्माऽयं मिथ्यात्वेनैव भासते ॥ १ ॥
गुणत्रयानुविद्धेन मनसेदं चराचरम् ।
आविर्भावितमस्याऽस्ति न सत्ता जातु तात्त्विकी ॥ २ ॥
यदा नैर्गुण्यमायाति भक्त्याद्यैर्निर्जितं मनः ।
तदा विविधरूपेयं माया नाम विलीयते ॥ ३ ॥
प्रकाशयन् सुविशदं भावं तात्त्विकमात्मनः ।
चरमः पुरुषार्थोऽयं मनसो निग्रहो मतः ॥ ४ ॥

प्रपञ्चमिथ्यात्वोपदेशः ।

(१२) द्वादशे सर्वतुल्यत्वे द्वैतान्धतमसैधिता ।
भर्तृभर्तव्यधीर्भाति केवलं कल्पनामयी ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



सतां प्रसङ्गे य उदेति मानसे रहूगणक्ष्मापतिसिद्धिसाधकः ।
प्रमादमस्माकमुदीर्णसाध्वसं बहूभवन्तं प्रति सोऽस्तु बाधकः ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजन् ! विजयते भक्तिः पूर्वं जन्म ययाऽस्मरम् ।
उत्क्रान्तिसमयासङ्गात् कुरङ्गत्वमुपागतः ॥ २ ॥
वरिवस्या हरेरेव श्रेयसी वीर ! यद्बलात् ।
यातः कुरङ्गतां त्यक्त्वा विप्रतामहमीदृशीम् ॥ ३ ॥
बाधाविधायिनो राजन् ! जायादिविषयाँस्त्यज ।
आधारभूतं जगतां मुहुर्मायाधवं भज ॥ ४ ॥
क्रियात्यागाद् ब्रह्मनिष्ठम्मन्या उत्सृष्टभक्तयः ।
पदे पदे पतन्तीति विद्धि सिद्धान्तमेव नः ॥ ५ ॥
भक्तिक्षालितपङ्कानां पुंसां सत्सङ्गशालिनाम् ।
ब्रह्म सत्यं जगन्मिथ्या भासतेऽध्यासनाशतः ॥ ६ ॥

भक्तेरेव मुक्तिद्वारता ।

(१३) त्रयोदशे जगत्तत्त्वं विदित्वा तत्त्वमाप्यते ।
इतीरिता भूरिभीतिर्भरतेन भवाटवी ॥ १ ॥
[1]निसर्गदुष्टषड्वर्गदस्युसंसर्गदूषिते ।
कलत्रपुत्रमित्रादिगोमायुगणदारुणे ॥ २ ॥
प्रभूतप्रततानन्तकर्मव्रततिदुस्तरे ।
दुर्जातमनुजव्रातमशकश्रेणिसङ्कुले ॥ ३ ॥
सुवर्णोल्कापिशाचोच्चैर्ज्वालादीपितदिङ्मुखे ।
अनन्तविषयव्यूहमृगतृष्णामयान्तरे ॥ ४ ॥
स्त्रीवात्याविभ्रमरजःपूरपूरितचक्षुषि ।
दुर्वादिदुर्जनस्तोमझिल्लीकौशिकदुःसहे ॥ ५ ॥
क्षुत्पीडाप्राप्यकृपणविषवृक्षनिरन्तरे ।
भूरिदम्भिजनव्यूहवितोयतटिनीगणे ॥ ६ ॥
गार्हस्थ्यजातदारिद्र्यतीव्रदावानलाकुले ।
प्राणायितधनग्राहिराजराक्षसभीषणे ॥ ७ ॥

(१) दशभिरन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रौतस्मार्तक्रियामूर्तिदुरारोहगिरिव्रजे।
आधिभौतिकसंतापकटुकण्टकदुश्चरे॥ ८॥
ध्वान्तप्रकर्षदुर्धर्षनिद्राजगरदुःसमे।
मध्वर्थलुब्धसरघागणध्वस्तमनोरथे॥ ९॥
नानादुर्मतसंघातजातदुर्दमदिग्भ्रमे।
मोहान्धकूपबहुले मृत्युमातङ्गदुर्गमे॥ १०॥
असाधनः कथं राजन्! संसाराध्वनि धावसि।
ज्ञानरूपो भक्तिधारस्त्वरया गृह्यतामसिः॥ ११॥

भवाटवी तत्तरणोपदेशश्च।

(१४) चतुर्दशेऽनन्तरोक्तां व्याकुर्वन् रूपकावलीम्।
अदर्शयद्विषयिणं विषयं च पृथक्तया॥ १॥

(१५) प्रोक्तः पञ्चदशे वंशो भरतस्य महीभुजः।
चतुर्दशो यत्र जज्ञे गयस्त्रैलोक्यविश्रुतः॥ १॥
विरजो गयराजर्षेरेकादश उदीरितः।
सर्वतोऽलङ्कृतं येन राज्ञा प्रैयव्रतं कुलम्॥ २॥

भरतवंशवर्णनम्।

(१६) षोडशे वर्ण्यते सप्तद्वीपानां मध्यतः स्थितः।
जम्बूनामा महाद्वीपो नववर्षसमन्वितः॥ १॥
इलावृतामिधे वर्षे मध्यस्थे मध्यगो गिरिः।
सुमेरुः कर्णिकारूपैर्गिरिभिः परिशोभते॥ २॥
इलावृतं दक्षिणेन मर्यादागिरिभिर्निजैः।
हरिवर्षादिकं प्रोक्तं निषधादिभिराश्रितम्॥ ३॥

---

(१) पूर्वतः—जठर—देवकूटौ, पश्चिमतः—पवन-पारियात्रौ, दक्षिणतः—कैलास-करवीरौ, उत्तरतः-त्रिशृङ्ग-मकरौ, इत्यष्टौ मेरोः कर्णिकागिरयः। (२) मध्यवर्तिन इलावृतस्य वर्षस्य दक्षिणतः–हरिवर्षं किंपुरुषवर्षं भारतवर्षं चेति त्रीणि वर्षाणि, निषधः–हेमकूटः–हिमालयः इति च त्रयो मर्यादागिरयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदुत्तरेण कथितं रम्यकप्रमुखत्रयम्[1]।
मर्यादागिरिभिर्नीलश्वेतादिभिरुपाश्रितम् ॥ ४ ॥
मर्यादागिरिभूतेन गन्धमादनभूभृता।
इलावृतस्य पूर्वेण भद्राश्वं वर्षमीर्यते ॥ ५ ॥
परिच्छिन्नं माल्यवता मर्यादागिरिणा सता।
केतुमालं नाम वर्षं तत्प्रत्यग्दिशि वर्तते ॥ ६ ॥

जम्बूद्वीपपरिस्थितिः।

(१७) इहैकधारा[2] भगवच्चरणाङ्गुष्ठनिस्सृता।
चतुर्धारत्वमायाता पतन्ती मेरुमूर्धतः- ॥ १ ॥
नामानि[3] लब्ध्वा चत्वारि पावयन्ती चतुर्दिशम्।
गङ्गा समुद्रानभ्येति स्मृतिमात्राघहारिणी ॥ २ ॥
तद्धाराऽलकनन्दाख्या पुनाना भारतान्तरम्।
सरितोऽन्याः सहादाय धन्या विशति सागरम् ॥ ३ ॥
धत्ते मूर्ध्ना क्रतुध्वंसी यां सा [4]वंशीधराङ्घ्रिजा।
दत्ते महाक्रतुफलं सिस्त्रासुभ्यः पदेपदे ॥ ४ ॥
कर्मक्षेत्रं प्लावयन्ती सैव भारतमुन्नतम्।
सूते फलानि भूरीणि पूरयन्ती समीहितम् ॥ ५ ॥
इलावृते च भगवाञ्छङ्करः स्वगणैः सह।
संकर्षणमुपासीनः स्तवीतीति प्रकीर्तितम् ॥ ६ ॥

(१८) इह भद्रश्रवा नाम वर्षे भद्राश्वनामनि।
उपासीनः स्तौति परं हयग्रीववपुर्धरम् ॥ १ ॥

---

(१) उत्तरतश्च-रम्यकवर्ष-हिरण्मयवर्ष-कुरुवर्ष चेति त्रीणि वर्षाणि, नीलः-श्वेतः-शृङ्गवान् इति च त्रयो मर्यादागिरयः।

(२) द्वाभ्यामन्वयः। (३) सीता- अलकनन्दा- चक्षुः- भद्रा, इति चतस्रः उरस्रोतस्विन्या धाराः तत्र—

(४) भगवद्विष्णुचरणनिःसृता।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरिवर्षे नरहरिं प्रह्लादोऽनुचरैः सह ।
समुपास्ते जपन्मन्त्रं पठन्स्तोत्रं पवित्रधीः ॥ २ ॥
केतुमाले स्वयं लक्ष्मीर्गोविन्दं मदनाकृतिम् ।
तद्वर्षपुरुषस्त्रीभिरुपास्ते मन्त्रजापिनी ॥ ३ ॥
रम्यके स्वप्रजावर्गैः साकं वैवस्वतो मनुः ।
सर्वान्तर्यामिणं देवं सेवते मीनरूपिणम् ॥ ४ ॥
हिरण्मयाभिधे वर्षेऽप्यर्यमा पितृभिः सह ।
कूर्मरूपस्य कुरुते सेवनं परमात्मनः ॥ ५ ॥
कुरुवर्षे भगवती धरा मूर्तिमती सती ।
वराहवपुषं देवं सेवते कुरुभिः सह ॥ ६ ॥

भद्राश्वादिवर्षाणि ।

(१९) इह किंपुरुषे वर्षे सह किंपुरुषैर्मुदा ।
श्रीरामं जानकीजानिमुपास्ते पवनात्मजः ॥ १ ॥
नारदो भारते वर्षे नरनारायणात्मकम् ।
भारतीभिः प्रकृतिभिः सहोपाश्रयते हरिम् ॥ २ ॥
एतच्च भारतं वर्षं प्रार्थनीयं दिवौकसाम् ।
कर्मक्षेत्रं फलयति स्वं स्वं कर्म शरीरिणाम् ॥ ३ ॥

किंपुरुषभारतवर्षे ।

(२०) इह द्विलक्षप्रमितयोजने प्लक्षनामनि ।
द्वीपे सूर्यमुपासीन इध्मजिह्वोऽधिराजते ॥ १ ॥
द्विगुणे शाल्मलिद्वीपे सोमरूपिणमीश्वरम् ।
सेवमानो यज्ञबाहुः साधु शास्ति निजाः प्रजाः ॥ २ ॥
द्विगुणे शाल्मलिद्वीपाद् द्वीपे च कुशनामनि ।
हिरण्यरेतास्तन्नेता भजते जातवेदसम् ॥ ३ ॥
पूर्वाद् द्विगुणतां यातं द्वीपं च क्रौञ्चनामकम् ।
अर्चन्नब्रूपमीशानं घृतपृष्ठोऽधितिष्ठति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वस्माद् द्विगुणं शाकद्वीपं वायोरुपासकः ।
प्रियव्रतस्य तनयो मेघातिथिरधिष्ठितः ॥ ५ ॥
ततोपि द्विगुणायामे द्वीपे पुष्करनामनि ।
अद्वैतं ब्रह्म जानानो वीतिहोत्रो विराजते ॥ ६ ॥
द्वीपप्रमाणविस्तारा: षंडेवेक्षुरसादयः ।
समुद्राश्चावधीभूता अनुद्वीपमुदाहृताः ॥ ७ ॥

शिष्टाः षड्द्वीपाः समुद्राश्च ।

(२१) एकविंशे साम्यशैघ्र्यमान्द्यहेतो रवेर्गतेः ।
अह्नां समत्वलघुतादीर्घताः प्रतिपादिताः ॥ १ ॥
परिक्राम्यन् गिरिं मेरुं ध्वान्तक्ष्वंसधृतव्रतः ।
क्रमाद् द्योतयति द्वीपाञ्जगद्द्वीपो दिवाकरः ॥ २ ॥

रविगतिः ।

(२२) द्वाविंशे सोमशुक्रादिग्रहाणां गतिरीर्यते ।
स्थानभेदेन जगतां शुभाशुभविधायिनी ॥ १ ॥
(२३) त्रयोविंशे समस्तानां व्योमान्तरविहारिणाम् ।
बिभर्ति ज्योतिषां चक्रं सर्वोपरिगतो ध्रुवः ॥ १ ॥
शिशुमारस्वरूपेण वर्तमानमहर्निशम् ।
मण्डलं ज्योतिषामेतद्धारणीयमितीर्यते ॥ २ ॥
(२४) चतुर्विंशे रवेरर्वाग्राहुः सिद्धास्ततोऽप्यधः ।
यक्षरक्षःपिशाचादिनिवासास्तदधः स्थिताः ॥ १ ॥
ततोऽधस्ताद्धरा सेयं पूर्ववर्णितविस्तरा ।
अस्या अधस्ताद्विपुलाः सप्त लोकाः प्रतिष्ठिताः ॥ २ ॥
बलोऽतले मयोद्भूतो, वितले हाटकेश्वरः ।
बलिः सुतलमध्यास्ते, मयः पाति तलातलम् ॥ ३ ॥

---

(१) प्लक्षादिषु षट्सु द्वीपेषु क्रमेण इक्षुरसोद-सुरोद-घृतोद क्षीरोद-दधिमण्डोद-शुद्धोदाः षट् समुद्रा अवधिभूताः । क्षारोदश्च समुद्रो जम्बूद्वीपावधिरूपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महातले तक्षकाद्याः, पणयश्च रसातले, ।
पाताले वासुकिमुखा, वर्तन्त इति कीर्तितम् ।। ४ ।।

अधोलोकपरिचयः ।

(२५) पञ्चविंशे जगद्गोलतले शक्त्यैव संस्थितः ।
शेषोऽशेषजगच्छ्लाघ्यो वहतीदं चराचरम् ।। १ ।।

यत्कीर्तिगाथां मुदितो नारदर्षिः सतुम्बुरुः ।
चतुर्मुखस्य सदसि गायति स्मेति कीर्त्यते ।। २ ।।

शेषप्रशंसा ।

(२६) षड्विंशे गर्हितैर्भोग्याः कर्मभिर्विविधात्मकैः ।
यातनाभूमयः प्रोक्ता नरकाः केऽपि विश्रुताः ।। १ ।।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
भक्तेन पञ्चमः स्कन्धः समक्षेपि यथामति ।। ५ ।।

पद्यसंकलनाङ्काः १५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः ६)

(१) षष्ठे प्रसङ्गसंप्राप्तं पोषणं वर्णयन्मुनिः ।
उदाहरच्चक्रपाणेरधमोद्धारपद्धतीः ॥ १ ॥
आऽजामिलं नीचजनमामहेन्द्रं महद्गणम् ।
नामसंकीर्तनप्रीतः परिपाति श्रियः पतिः ॥ २ ॥
नाऽलङ्कर्मीणतां यान्ति यद्विहाय महामखाः ।
नामाच्युतस्य तत्प्रोक्तं प्रायश्चित्तशताधिकम् ॥ ३ ॥
इत्याचिख्यासुराचष्ट स्पष्टमेव परीक्षितम् ।
प्रथमेऽजामिलकथामुपोद्घातमयींशुकः ॥ ४ ॥
द्विजः कश्चित्कान्यकुब्जे निजकर्मपराङ्मुखः ।
आसीदजामिलो नाम दासीप्रेमपरायणः ॥ ५ ॥
भार्यां धृतगुणौदार्यां हित्वा सोऽयमपेयपः ।
तनयाञ्जनयामास दास्यां दश गतत्रपः ॥ ६ ॥
स विवेकास्पृष्टबुद्धिरविज्ञातवयःक्रमाः ।
नष्टाचारतयाऽनैषीदष्टाशीतिमिताः समाः ॥ ७ ॥
स मुमूर्षुः पाशहस्तान् पुरस्ताद्वीक्ष्य काँश्चन ।
नारायणेति सभयं व्याजहाराऽऽह्वयन्सुतम् ॥ ८ ॥
तदात्व एव संप्राप्य चत्वारो हरिपार्षदाः ।
निषिध्य तान्धर्मतत्त्वं पप्रच्छुर्जातकौतुकाः ॥ ९ ॥
यमदूताश्च ते प्रोचुः स्वाधिकारोचितं वचः ।
"श्रुतिस्मृतिभ्यां सिद्धोऽस्ति धर्मोऽधर्मश्च शाश्वतः ॥ १० ॥

(१) चतुर्भिरन्वयः ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मेऽधर्मे च सूर्याद्या वर्तन्ते किल साक्षिणः।
शुभाशुभे गती यान्ति ताभ्यामेव शरीरिणः ॥ ११ ॥
सोऽयं प्रकृतिसंसर्गाद्व्यवहारः प्रवर्तते।
अप्राकृतत्वं यातानामयं च विनिवर्तते ॥ १२ ॥
अयं जानन्नपि जडो निषिद्धं कर्म शास्त्रतः।
यदकार्षीत्ततश्चास्मै दित्सामः[1] कारणा[2]" इति ॥ १३ ॥

अजामिलकथा।

(२) द्वितीये श्रुतवन्तस्ते यमदूतैरुदीरितम्।
प्रादर्शयन्हरेर्नाम्नः सर्वधर्मातिशायिताम् ॥ १ ॥
गतेषु यमदूतेषु तेषु च प्राप्तसन्मतिः।
स ययौ सावशेषायुर्गङ्गाद्वारमजामिलः ॥ २ ॥
तत्र वर्जितदुःसङ्गो गङ्गोदकपवित्रितः।
[3]व्यतिक्रमक्षमाप्रार्थी चरितार्थो बभूव सः ॥ ३ ॥

अजामिलोद्धारः।

---

(१) दातुमिच्छामः। (२) यातनाः।

(३) व्यतिक्रमक्षमाप्रार्थनपरिपाटी तु मदीयायां हरिवरिवस्यायां द्रष्टव्या। दिङ्मात्रं तु यथा—

[१] मनोमहाराज्यसहस्रपालनव्यतीतभूयःसमयस्य जाग्रतः।
अशर्म्मणः कामकपूयकर्मणः क्षमस्व गोविन्द ! मम व्यतिक्रमम्।

[२] निरन्तरायत्वनिरन्तरज्वलद्धृदन्तरप्लोषकरोषवर्हिषः।
विलुप्तबुद्धेर्विफलेहितावलेः—क्षमस्व गोविन्द० ! ॥

[३] यथोन्नताऽऽरोहणलब्धशक्तिना कुतोऽपि लोभेन यथेच्छमूर्तिना।
निबध्य नीतस्य मुहुः कपर्दशां—क्षमस्व गोविन्द० ! ॥

[४] मुहुर्मुहुर्मोहपिशाचपीडया मुहुर्विलापान् सहसा पुनर्हसान्।
प्रकुर्वतो दुर्बलचेतसः सतः—क्षमस्व गोविन्द० ! ॥

[५] निमज्जतः पङ्कसमुच्चये चिरं स्वगौरवाऽऽधानसहर्षताजुषः।
मदात्करेणोरिव मन्दचक्षुषः—क्षमस्व गोविन्द० ! ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुचीतरमतेः सतः कृतवतः स्वतः किल्बिषं नतस्य नमुचिद्विषः सकलविप्लवध्वंसदः ।
प्रजापतिमुखैः स्तुतः क्रतुभुजां व्रजैरादरा दजामिलरुजान्तकृज्जयति मञ्जुकीर्तिर्हरिः ॥
"हातुं हरेर्नाम जन्तुः समन्तुर्जातु नार्हति" इति स्मृतः किल मिलन् ब्रूते गर्जन्नजामिलः ॥

"गुजराती" प्रिंटिंग प्रेस–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(३) तृतीये निजदूतोक्तं वृत्तमाकर्ण्य हर्षितः ।
समवर्ती माधवस्य निदध्यौ चरणद्वयम् ॥ १ ॥
"अशेषक्लेशशमनं वृजिनव्रजदारणम् ।
उच्चारणं हरेर्नाम्नामाम्नायप्रतिपादितम्- ॥ २ ॥
कुर्वाणा वः परित्याज्या गीर्वाणा इव दूरतः" ।
इति दूतानपि प्रोचे विस्मितान् स स्मिताननः ॥ ३ ॥

भगवन्नाममहिमा ।

(४) चतुर्थे वर्णितप्राया हरेरादेशकारिणः ।
उत्तीर्य सागरात्तीरे वृक्षौघान्दग्धुमुद्यताः ॥ १ ॥
द्विजराजेनानुनीता वार्क्षीं प्राप्य वराननाम् ।
दक्षमुत्पादयामासुः संहतास्ते प्रचेतसः ॥ २ ॥

---

[६] अनार्यबुद्धेः परकीयवैभवप्रभूततादग्धदृशः कदध्वना- ।
समत्सरस्य भ्रमतः समन्ततः-क्षमस्व गोविन्द० ! ॥
[७] स्ववर्त्मसंचारि-सुरूपतोल्लसद्वयःस्थनारीजनलोलचक्षुषः ।
अपुण्यतारुण्यकदर्थितात्मनः-क्षमस्व गोविन्द० ! ॥
[८] युवत्वमाद्यन्मनसः प्रसूद्विषः सहासजायाजनदासताजुषः ।
विदग्धतादग्धविशुद्धपद्धतेः-क्षमस्व गोविन्द० ! ॥
[९] जनीसहाऽऽस्यासुखविघ्नतां गतौ मुहुर्दिदृक्षू पितरौ जरान्वितौ ।
दिधक्षतः प्रज्वलितेन चक्षुषा क्षमस्व गोविन्द० ! ॥
[१०] अहर्दिवं द्वन्द्वसमाकुलां धियं निसर्गलोलामवलम्ब्य गच्छतः ।
अनच्छदृष्टेः स्खलतः पदेपदे-क्षमस्व गोविन्द० ! ॥
[११] भवोद्भवे शर्म्मणि सक्तचेतसः सदा विरक्तस्य विधेयकर्म्मणि ।
इतस्ततोभ्रष्टतया विषीदतः-क्षमस्व गोविन्द० ! ॥
[१२] प्रपन्नलोकाऽभयदानदीक्षितं पुरःस्थितं त्वामनिरीक्ष्य चक्षुषा ।
विपत्तिलुप्तप्रतिपत्ति शोचतः-क्षमस्व गोविन्द० ! ॥

(१) द्वाभ्यामन्वयः । (२) चतुर्थे स्कन्धे त्रिंशेऽध्याये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राचेतसः स दक्षोऽथ चेतसा विविधं सृजन् ।
अकृतार्थं मन्यमानः स्वमगाद्विन्ध्यपर्वतम् ॥ ३ ॥
हंसगुह्याभिधं स्तोत्रं जपँस्तत्र समाहितः ।
प्रसेदिवांसमद्राक्षीत् सुपर्णांसस्थितं हरिम् ॥ ४ ॥
हर्षोपरुद्धवचनं तं नमन्तं पदाब्जयोः ।
सप्रसादसमुल्लासं जगाद जगदर्चितः ॥ ५ ॥
प्रीतोऽस्मि तपसा वत्स ! त्वदीयेन गरीयसा ।
तपो मे हृदयं विद्धि यस्मिन् सिद्धिः प्रतिष्ठिता ॥ ६ ॥
गच्छ पाञ्चजनीं कन्यामसिक्नीं नाम लप्स्यसे ।
तया गार्हस्थ्यमासाद्य सृजेर्नानाविधाः प्रजाः ॥ ७ ॥
इत्थं कृतार्थयित्वा तं दक्षमक्षतशासनः ।
अनक्षलक्ष्यतां प्राप क्षणमात्रादधोक्षजः ॥ ८ ॥

प्राचेतसचरितम् ।

(५) पञ्चमे पाञ्चजन्यां स हर्यश्वानयुतं सुतान् ।
समुत्पाद्य तपस्तप्तुं प्राहिणोत्पश्चिमां दिशम् ॥ १ ॥
तान् पश्यन्निर्मलमतीन्मोक्षपक्षाधिकारिणः ।
नारदः सदयः प्रोचे सर्वविद्याविशारदः ॥ २ ॥
"किं भुवोऽन्तं वित्थ यूयं ? पत्तनं चैकपुरुषम् ।
अनेकरूपां रमणीं पुंश्चल्या वल्लभं नरम् ॥ ३ ॥

(१) य एकं सर्वपितरं शर्वं दिद्वेष गर्वतः ।
पितॄन् स दश जानानः सिषेवे किल सर्वतः ॥ इति निपुणाः पौराणिकाः ।

(२) कर्मक्षेत्रतां गतस्य जीवस्य निर्वाणम् । (३) अनन्येन परमात्मनाऽध्यासितं जगत् । (४) लोहितशुक्लकृष्णां (त्रिगुणां) मायाम् । (५) मायेश्वरं ब्रह्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

[1]तरङ्गिणीमुभयतो वहन्तीं तीरवर्जिताम् ।
सम्भारपञ्चविंशत्या समारब्धं [2]निकेतनम् ॥ ४ ॥
[3]हंसं निर्वचनानर्हं भ्रमच्चक्रं[4] क्षुरप्रभम् ।
अदृष्टनिर्गमपथं बिलमेकं[5] चिरन्तनम्" ॥ ५ ॥
एतद्विद्य ततः स्वैरं कर्मण्यत्र प्रसज्जत ।
एधावती भवन्मेधा बन्ध्या मा जनि पुत्रकाः ! ॥ ६ ॥
इति देवर्षिवचनं विमृशन्तः स्वया धिया ।
ते निवृत्तिपराः प्रापुः प्राप्तव्यपरमावधिम् ॥ ७ ॥
एतद्विदितवान्दक्षः शबलाश्वाभिधान् पुनः ।
पुत्रानयुतमुत्पाद्य तपस्यायां नियुक्तवान् ॥ ८ ॥
अग्रजानुगतांस्तांश्च श्रुत्वा नारदभाषितैः ।
भ्रमन् भूया इति मुनिं शशाप विहतेहितः ॥ ९ ॥

हर्यश्वशबलाश्वचरितम् ।

(६) षष्ठे प्राचेतसो दक्षो दिष्टविध्वस्तवाञ्छितः ।
सृष्टवान् स्रष्टुरादेशाद्दुहितॄः षष्टिसम्मिताः ॥ १ ॥
धर्मं दश गतास्तासु शशिनं सप्तविंशतिः ।
भूताङ्गिरःकृशाश्वाँश्च द्वे द्वे शेषाश्च कश्यपम् ॥ २ ॥
विहाय शशिनो दारान् राजयक्ष्मार्दितात्मनः ।
आसीत्प्रसूतिः सर्वासां यत आपूरितं जगत् ॥ ३ ॥
अभूवन्द्वादशाऽऽदित्या अदित्यां कश्यपादृषेः ।
तेषां च त्वष्टुरभवद्विश्वरूपोऽतिविश्रुतः ॥ ४ ॥

(१) प्रवृत्तिनिवृत्तिमतीमनन्तां मतिम् । (२) पुरुषेण, मूलप्रकृत्या, मनोबुद्ध्यहङ्कारैः, मात्राभिः पञ्चभिः, भूतैः पञ्चभिः, इन्द्रियैर्दशभिरारब्धं भोगायतनं शरीरम् । (३) अनिर्वचनीयं ब्रह्म । (४) तीक्ष्णधारं कालचक्रम् । (५) अदृष्टमुक्तिमार्गं प्रपञ्चम् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं दैत्यदौहित्रमपि त्यक्त्वा वाक्पतिना सुराः।
अनन्यगतितां याताः पौरोहित्याय वव्रिरे ॥ ५ ॥

दक्षकन्यावंशवृत्तम्।

(७) सप्तमे पुरुहूतेन स्वाराज्यमदशालिना।
अनादृतः सदःप्राप्तो निर्जगाम बृहस्पतिः ॥ १ ॥
तस्मिन्योगिनि निर्विण्णे स्वं तिरोधाय तस्थुषि।
असुरौघे शुक्रबले स्वर्गमाच्छिद्य गर्जति ॥ २ ॥
अनुतप्ता इन्द्रमुखाः सर्वे बर्हिर्मुखा विधिम्।
वृत्तं निवेदयामासुः स च तानन्वकम्पत ॥ ३ ॥
तदादेशाद्विश्वरूपं तपस्विनमुपागताः।
अनेकचाटुचतुराः स्वां दशां ते न्यवेदयन् ॥ ४ ॥
पौरोहित्ये वृतस्त्वाष्ट्रो वैष्णव्या किल विद्यया।
इन्द्रादीन् बलिनः कृत्वा स्वे पदेऽस्थापयत्पुनः ॥ ५ ॥

विश्वरूपचरितम्।

(८) अष्टमे कौतुकवता राज्ञा पृष्टः परीक्षिता।
जगाद वैष्णवीं विद्यां त्वाष्ट्रोक्तां बादरायणिः ॥ १ ॥
यद्विद्योपासकतया योगेन मरुधन्वनि–।
सद्यो मुक्तिं प्रयातस्य कौशिकस्य महात्मनः–॥ २ ॥
कलेवरोपरि चरन्व्योम्नि चित्ररथो गतः–।
सविमानोऽपतद्भूमौ छिन्नसिद्धिरवाङ्मुखः ॥ ३ ॥
प्रक्षिप्य स तदस्थीनि सरस्वत्यां सुविस्मितः।
बालखिल्योपदेशेन यथापूर्वत्वमाययौ ॥ ४ ॥

नारायणवर्मविद्योपदेशः।

(९) नवमे प्रसुवः सोऽथ विश्वरूपोऽनुरोधतः।
अदात्प्रकाशं देवेभ्यो दैत्येभ्योऽविदितं हविः ॥ १ ॥
क्रुद्धस्त्वाष्ट्रं त्रिशिरसं निजघान पुरन्दरः।
भूम्यादिषु ब्रह्महत्यां चतुर्धा व्यभजच्च सः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वष्टा च नितरां क्रुध्यन्नभिचारेण दारुणम् ।
वृत्रमुत्पादयामास पुरन्दरजिघांसया ॥ ३ ॥
स वर्धमानो देवानामाहवाय प्रधावताम् ।
जग्रसेऽस्त्राणि शस्त्राणि तत्रसुस्त्रिदशास्ततः ॥ ४ ॥
विष्टरश्रवसं ते च तुष्टुवुः कष्टनष्टये ।
तुष्टं तं प्रकटं दृष्ट्वा भूयो हृष्टाः प्रतुष्टुवुः ॥ ५ ॥
" दधीचेर्वीतरागस्य मुनेर्दीर्घतपस्विनः ।
अस्थ्ना निर्माप्य कुलिशं कारुणा विश्वकर्मणा- ।
त्वाष्ट्रतेजोमयं वृत्रं तेन काले हनिष्यथ "
इत्युक्त्वान्तर्दधे देवः क्षणादेवेति वर्ण्यते ॥ ६–७ ॥

विश्वरूपवधः वृत्रोत्पादनं च ।

(१०) दशमे स्वार्थसिद्ध्यर्थं दधीचिर्याचितः सुरैः ।
प्रददावात्मनोऽस्थीनि युक्तात्मा त्यक्तविग्रहः ॥ १ ॥
अस्थिसारेण कुलिशं निर्माय शतकोटिकम् ।
समनह्यत युद्धाय ससैन्यः पाकशासनः ॥ २ ॥
प्रवृत्ते तुमुले देवैरर्दितान्दितिनन्दनान् ।
वृत्रः प्रोत्तेजयामास वचोभिर्धैर्यवर्धनैः ॥ ३ ॥

देवासुरयुद्धम् ।

(११) एकादशे गदाघाताद्गजेन्द्रे व्याकुलीकृते ।
इन्द्रमप्रहरन्नेव वृत्रः प्रोवाच वीतभीः ॥ १ ॥
ब्रह्महन् ! मघवन् ! दिष्ट्या ! प्राप्तस्त्वं दृष्टिगोचरम् ।
स्वच्छलस्य फलं गच्छ मच्छूलच्छिन्नविग्रहः ॥ २ ॥
किं वा भिदुरभिन्नाङ्गः सोऽहमेव रणाङ्गणे ।
पादमूलं प्रयास्यामि धीराणामनिवर्तिनाम् ॥ ३ ॥
न युज्यते विलम्बोऽयं सावलम्बोऽसि विष्णुना ।
वज्रं प्रहिणु धैर्येण दारुणं वैरिणं क्षिणु ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वदीयवज्रविच्छिन्नवपुर्बन्धः पुरन्दर ! ।
अपि गोविन्दचरणद्वन्द्वं विन्देय सत्वरम् ॥ ५ ॥
आसुरं जीवितमिदं मदीयं तमसा चितम् ।
आशु रञ्जितभक्तस्त्वं रमारमण ! मोचयेः ॥ ६ ॥
अरविन्दाक्ष ! गोविन्द ! भगवन् ! मामकं मनः ।
भवेभवे भक्तिभृतं भवन्तं भजतादिति ॥ ७ ॥

इन्द्रवृत्रसंवादः ।

(१२) यद्वा ।चिराय सन्नद्धं त्रिशूलेन गरीयसा ।
हतोऽसीति वदन्वृत्रः प्राहरद्वज्रधारिणम् ॥ १ ॥
धृतधैर्यः सहस्राक्षः शूलं छित्त्वैव सत्वरः ।
शेषाहिभीषणं तस्य भुजं दम्भोलिनाऽच्छिनत् ॥ २ ॥
अथैकबाहुना तेन परिघेणार्दितो हरिः ।
न्यपातयत्कराद्वज्रं पीडाविवशविग्रहः ॥ ३ ॥
स जग्राह निजं वज्रं न लज्जानिर्जितः पुनः ।
वृत्रश्च गतवैक्लव्यस्तं हसन् प्रोदसाहयत् ॥ ४ ॥
अथात्तवज्रो बलभिद्वृत्रस्य परिघान्वितम् ।
वामं भुजं च पविना चिच्छेद शतपर्वणा ॥ ५ ॥
पृथ्वीं प्रकम्पयन् पद्भ्यां वृत्रः पत्रसमन्वितम् ।
अग्रदेशस्थितं शक्रं जग्रसे तीव्रविक्रमः ॥ ६ ॥
रक्षितः पुरुहूतश्च श्रीनारायणवर्मणा ।
अक्षतः सन्क्षणेनैव कुक्षिं निर्भिद्य निर्ययौ ॥ ७ ॥
अभिचारे रोषवशाद्विकृतोच्चारिणः सतः ।
वृत्रं जघान वज्रेण त्वष्टुः पुत्रं पुरन्दरः ॥ ८ ॥
अनन्यलभ्यया वीरजयलक्ष्म्या स्वयं वृतम् ।
एनं मुदाऽस्तुवन्देवा इति द्वादश ईरितम् ॥ ९ ॥

वृत्रवधः ।

(१) सवाहनम् (सैरावतम्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१३) अथाऽन्वधावज्जरती मुक्तकेशी दुराकृतिः ।
तिष्ठतिष्ठेति गर्जन्ती ब्रह्महत्या विडौजसम् ॥ १ ॥
अलब्धशरणः सोऽथ भ्रमन् सरसि मानसे ।
अवसत्सुचिरं योगी पद्मदण्डान्तराश्रयः ॥ २ ॥
निरिन्द्रतां गतैर्देवैरभिषिक्तस्तथोचितः ।
शशास नहुषो नाम राजर्षिर्विष्टपत्रयम् ॥ ३ ॥
पुलोमजामभिसरन्नथ मन्मथपीडितः ।
याने स्वाराज्यमत्तः सन्नययुङ्क्त मुनिसत्तमान् ॥ ४ ॥
वहतः सर्पसर्पेति स मुनीन् महतो वदन् ।
अगस्त्यशप्तः सर्पत्वं गतः कामहतोऽपतत् ॥ ५ ॥
महर्षिभिः समानीतः शक्रः कृतहयक्रतुः ।
अपास्तदुरितः स्वर्गमध्यास्त निहताहितः ॥ ६ ॥
इति त्रयोदशेऽध्याये किल्बिषावलिनाशनम् ।
धन्यं यशस्करं स्वर्ग्यं वृत्राऽऽख्यानं समापितम् ॥ ७ ॥
ब्रह्महत्यावृत्तांतः ।

(१४) तामसप्रकृतेस्तस्य वृत्रस्य परमात्मनि ।
आसीत् कुतो भक्तिरिति राज्ञा पृष्टः परीक्षिता ॥ १ ॥
शुकश्चतुर्भिरध्यायैस्तत्समाधानसिद्धये ।
उपाख्याति स्म चरितं चित्रकेतोर्महीपतेः ॥ २ ॥
आसीत् सम्राट् शौरसेनश्चित्रकेतुरिति श्रुतः ।
तस्याऽऽसन् योषितो योग्या दशप्रयुतसंमिताः ॥ ३ ॥
समृद्धिशालिनस्तस्य प्रजात्राणैककर्मणः ।
चिरं विलसतस्तासु नाऽऽसीदेकापि सन्ततिः ॥ ४ ॥
प्राप्तः कदाचिद्भगवानङ्गिराः सहनारदः ।
यथोचितं पूजितश्च शर्म पप्रच्छ सर्वतः ॥ ५ ॥
"आधिः स एष भगवन्ननपत्यत्वजो मम ।
सर्वतः प्रसृतं शर्म तिरोधत्ते बृहत्तमः" ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वाचं स आकर्ण्य चित्रकेतोर्विषीदतः ।
केवलं सन्ततेर्दुःखं लभ्यं प्राबोधयद्बहु ॥ ७ ॥
अथाऽनुकम्पाविवशस्तथाऽऽग्रहनिरीक्षणात् ।
त्वष्टारमयजत्तस्य पुत्रहेतोर्महामुनिः ॥ ८ ॥
मखान्ते याजकप्रत्तं सर्वतो ज्यायसी सती ।
बुभुजे भूभुजो भार्या चरुशेषं कृतद्युतिः ॥ ९ ॥
धृतगर्भा यथाकालमर्भकं सुषुवे च सा ।
तदाऽऽभ्युदयिकं भूरि भूपश्चक्रे महायशाः ॥ १० ॥
अङ्कस्थपुत्ररत्नेन द्योतितायां कृतद्युतौ ।
अन्यासां दिद्युतेऽमर्षो दुराधर्षत्वमाश्रयन् ॥ ११ ॥
अमर्षदूषितधियो दुर्विमर्शपराश्च ताः ।
विषं प्रदाय विवशं तं कुमारममारयन् ॥ १२ ॥
विषादविह्वलमती चित्रकेतुकृतद्युती ।
चक्रतुस्तारतारेण विलापेनाऽऽकुलाः प्रजाः ॥ १३ ॥
अपारशोकसंतप्तं कृपापात्रत्वमागतम् ।
तमभ्यगान्नारदेन समं स मुनिरङ्गिराः ॥ १४ ॥

चित्रकेतूपाख्यानम् ।

(१५) "मायिकानि समस्तानि वस्तूनि प्रचकासति ।
निसर्गनश्वरेष्वेषु न देया धीमता मतिः ॥ १ ॥
आद्यन्ताव्यक्तरूपाणां क्षणव्यक्तात्मनां सताम् ।
भूतानां निधनावस्थां नैव शोचति धीधनः ॥ २ ॥
राजन्! संसारचक्रेऽस्मिन् स्रोतसा सिकता इव ।
संयोज्यन्ते वियोज्यन्ते समयेन शरीरिणः ॥ ३ ॥
संबन्धव्यवहारोऽयमविवेकनिबन्धनः ।
विमृश स्वयमुर्वीश ! समाधाय निजं मनः" ॥ ४ ॥

---

(१) ऋत्विग्दत्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति व्यक्तविवेकाभ्यां ताभ्यामुद्बोधितो नृपः ।
उन्मृज्याऽश्रूणि पप्रच्छ कौ युवामिति मन्दगीः ॥ ५ ॥
" स एष नारदमुनिः पुत्रदः सोऽहमङ्गिराः ।
आवां बोधयितुं प्राप्तौ भवन्तं व्यसनार्दितम् ६ ॥
पुत्रनाशदिशा सर्वं नाशवद्विमृशन्नृप ! ।
शममाश्रित्य सततं विषये निर्ममो भव " ॥ ७ ॥
इति राजानमादिश्याऽङ्गिरसि त्यक्तवाक्क्रमे ।
नारदः स्निग्धया वाचाऽनुग्रहीतुं प्रचक्रमे ॥ ८ ॥
" विद्यां सांकर्षणीं दिव्यां प्रयच्छामि प्रतीच्छ ताम् ।
एनया सप्तरात्रेण पश्येः संकर्षणं पुरः" ॥ ९ ॥
इति कोमलया वाचा ताभ्यामाश्वासितो नृपः ।
अन्तर्विचारयन्नासीदिति पञ्चदशे स्थितम् ॥ १० ॥
चित्रकेतुप्रबोधः ।

(१६) षोडशे तपसः सिद्ध्या संपरेतोऽपि जीवितः ।
बन्धुप्रीत्यै नियुक्तश्च ताभ्यां शिशुरभाषत ॥ १ ॥
" संसारचक्रे भ्रमति भ्रमता भ्रमता सता ।
जीवेन किल कल्प्यन्ते मित्रोदासीनशत्रवः ॥ २ ॥
सुतः पितृत्वमायाति पिता याति सुतात्मताम् ।
पर्यायतः संसरति जीवः कः कस्य जायते ॥ ३ ॥
अजरोऽयमनन्तोऽयं कर्मणाऽनेकयोनिषु ।
जीवः पण्यस्य साम्येन भ्रमत्येवाऽनवस्थितः " ॥ ४ ॥
इत्युदीर्य विनिर्याते जीवे तस्मिन् गतभ्रमे ।
जनः सर्वोऽपि तत्रत्यः स्नेहपाशादमुच्यत ॥ ५ ॥
ततः संपन्नशौचाय चित्रकेतुमहीभृते ।
प्रादात्सांकर्षणीं विद्यामनघां नारदो मुनिः ॥ ६ ॥
करुणापूर्णमनसोस्तयोर्निर्गतयोः सतोः ।
स तोयवृत्तिरजपद्विद्यां निर्विघ्नं सर्वतः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स सप्तरात्रमात्रेण प्राप्य वैद्याधरं पदम्।
भ्रमन् संकर्षणं चक्रे लोचनद्वयगोचरम्॥ ८॥
हृष्यत्तनूरुहततिः स्रवदश्रुः कृताञ्जलिः।
निपातिताष्टावयवः स तुष्टाव तमीश्वरम्॥ ९॥
तस्मै तत्त्वोपदेशेन वितीर्य कृतकृत्यताम्।
अशेषवन्दितः शेषः शिश्रिये दृगदृश्यताम्॥ १०॥

चित्रकेतुसिद्धिः।

(१७) विद्याधरपदं प्राप्तः परविद्याविशारदः।
धाम श्रीवामदेवस्य विमानेन जगाम सः॥ १॥
भर्तुरङ्कगतां देवीं स वीक्ष्य नगनन्दिनीम्।
अधिचिक्षेप सर्वेषां शृण्वतामपि शङ्करम्॥ २॥
"अहो! धवलकूर्चानां देवर्षीणां सतां पुरः।
विगतव्रीड उत्सङ्गे बिभर्ति तरुणीं मृडः"॥ ३॥
इति प्रकटितौद्धत्यं वचः श्रुत्वैव सत्वरम्।
विस्मयामर्षसाङ्कर्यं परिषत्प्राप शाङ्करी॥ ४॥
अवाचि स्मेरवदने शङ्करे शमशालिनि।
बभूव कोपकलुषा गौरी त्रैलोक्यपालिनी॥ ५॥
"आसुरीं योनिमासीद मा सीद दिवि दुर्मते!।
उच्छृङ्खलत्वखलते तत्रैव चरितार्थय"॥ ६॥
इति शप्तः स पार्वत्या न्यपतत्तत्पदद्वये।
नाऽयाचत प्रसाद्यापि तां शापस्य प्रशान्तये॥ ७॥
दिष्टं बलिष्ठं मन्वानस्तौ पुरातनदम्पती।
प्रेम्णा प्रणम्य प्रययौ प्रीत एव महामतिः॥ ८॥
अथ प्रहस्य गिरिशः प्रेयसीं विस्मितान्तराम्।
अकुतोभयतां प्रोचे वासुदेवार्पितात्मनाम्॥ ९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स चित्रकेतुः शुद्धात्मा शापात्प्राप्तोऽपि वृत्रताम् ।
अभवद्भक्तिशालीति वृत्तं सप्तदशे स्थितम् ॥ १० ॥

चित्रकेतुशापः ।

(१८) अष्टादशे दितेः पुत्रा दैत्याः केचित्प्रकीर्तिताः ।
पुत्राश्चैकोनपञ्चाशद्देवभावमवापिताः ॥ १ ॥
देवत्वे दितिपुत्राणां कारणं राज्ञि पृच्छति ।
मरुतां मङ्गलकरं व्याजहार जनुर्मुनिः ॥ २ ॥
हतपुत्रा दितिः शक्रजिघांसाव्याकुलान्तरा ।
अतूतुषत्पतिं साध्वी परिचर्यापरायणा ॥ ३ ॥
वरं दित्सति सा पत्यावपत्यं बलजिज्जयि ।
ययाचे स च तां प्रोचे व्रतं पुंसवनं मुनिः ॥ ४ ॥
अन्तर्वत्नी व्रतवती दितिः शक्रेण योगिना ।
स्खलितं लिप्समानेन पर्यचारि मनस्विना ॥ ५ ॥
दितौ कदाचित् सुप्तायामशुचौ त्रिदशाधिपः ।
गर्भमन्तर्गतश्चक्रे विच्छिन्दन्सप्तसप्तधा ॥ ६ ॥
व्रतप्रभावादमृतानुदराद्बहिरागतान् ।
सुतान्निरीक्ष्य विपुलानपृच्छद्वज्रिणं दितिः ॥ ७ ॥
स च दौर्जन्यमात्मीयमाख्याय भयसंयुतः ।
तान्स्वेन सजुषश्चक्रे ततश्च मुमुदे दितिः ॥ ८ ॥

मरुदुपाख्यानम्

(१९) ऊनविंशे पुंसवनं दितये कश्यपोदितम् ।
शुकेन नृपपृष्टेन व्रतं विष्णोः प्रपञ्चितम् ॥ १ ॥

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
भक्तेन षष्ठः स्कन्धश्च समक्षेपि यथामति ॥ ६ ॥

षट्कर्मणां प्राप्तपोषा यन्नाम्नैव वषट्क्रिया ।
हृषीकेशः स दोषाणां मोषाय परितुष्यतु ॥ ६ ॥

॥ पद्यसंकलनाङ्काः १३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः ७)

स्वभक्तसत्यभाषित्वसाधनस्वीकृताकृतिः ।
हिंस्तान्नृसिंहः सकलानस्मद्दुष्कृतहस्तिनः ॥ ७ ॥

(१) अथोतिः सप्तमे स्कन्धे क्रमप्राप्ता प्रपञ्च्यते ।
संसारमवतीत्यूतिः प्रोच्यते कर्मवासना ॥ १ ॥
सा द्विधा सदसत्त्वेन, सती सदनुकम्पया ।
प्रह्लादादेरिव भवेद्भगवद्भक्तिशालिनः ॥ २ ॥
असती भगवद्भक्तविद्वेषादिकुकर्मणा ।
विद्वेषाधायिनी विष्णौ भवेद् द्वारपयोरिव ॥ ३ ॥
सद्वासनं क्षणाद्विष्णुः प्रह्लादमिव रक्षति ।
दुर्वासनं च सुचिराद् द्वारपाविव रक्षति ॥ ४ ॥
एतद्दशभिरध्यायैर्मुनिना प्रकटीकृतम् ।
प्रपञ्चिताः सदाचाराः पञ्चभिः सूतिहेतवः ॥ ५ ॥
आद्ये युधिष्ठिरश्चैद्यदशां वीक्ष्य सुविस्मितः ।
वेनोदर्कविषण्णः सन् हेतुं पप्रच्छ नारदम् ॥ ६ ॥
"काम-साध्वस-विद्वेष-सम्बन्ध-स्नेह-भक्तयः ।
अतिमात्रकृताः पुंसि परमे हितहेतवः ॥ ७ ॥
द्वेषैकतानमनसां समस्तजगदाश्रये ।
उचिताऽऽलोचिता चेयं चैद्यादीनां शुभा गतिः ॥ ८ ॥
अनाहितमतेः पुंसि परमे पुण्यरोधिनः ।
औचित्यमेव श्रयते वेनस्य निरये गतिः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुःसनरुषा प्राप्तदुर्गती द्वारपौ हरेः ।
हिरण्यकशिपुर्दैत्योहिरण्याक्षश्च विश्रुतौ ॥ १० ॥
हतो द्विषन् हिरण्याक्षो हरिणा क्रोडमूर्तिना ।
पुत्रं हनिष्यन्निहतो नृसिंहेन तदग्रजः ॥ ११ ॥
रावणः कुम्भकर्णश्चाऽभूतां तावेव तावपि ।
रामो दाशरथिर्भूत्वा निजघान जनार्दनः ॥ १२ ॥
चैद्यश्च दन्तवक्त्रश्च तावेतावधुनातनौ ।
द्विषन्तौ हतवान् विष्णुर्वृष्णिवंशसमुद्भवः " ॥ १३ ॥
इति देवर्षिवचनं समाकर्ण्य युधिष्ठिरः ।
पुत्रविद्वेषवृत्तान्तमपृच्छद्दितिजन्मनः ॥ १४ ॥

युधिष्ठिरनारदसंवादः ।

(२) द्वितीये क्रोडवपुषा हरिणा निहतेऽनुजे ।
धर्मध्वंसाय दितिजान् दैत्यराजः समादिशत् ॥ १ ॥
मातुर्निहतपुत्रायाः सवध्वाः शमयन् शुचः ।
विष्णुं द्विषन् दैत्यपतिर्व्याजहार हितं वचः ॥ २ ॥
" अनाशिनोऽपि जीवस्य भ्रमतः कर्मधारया ।
अशाश्वतेन वपुषा संसर्गो नैष शाश्वतः ॥ ३ ॥
आसीदुशीनरपतिः सुयज्ञ इति विश्रुतः ।
स च शत्रुभिरुद्वृत्तैः समरे विनिपातितः ॥ ४ ॥
विलपन्त्योऽथ तं पत्न्यः परिवार्यातिविह्वलाः ।
निर्हारमप्यनिच्छन्त्यो रुरुदुः करुणस्वराः ॥ ५ ॥
अथाऽनुकम्पाविवशः समवर्ती समागतः ।
उपसृत्याऽर्भकाकारः प्रावोचद्रुचिरा गिरः ! ॥ ६ ॥
अहो ! मोहस्य महिमा यच्छोचथ वयोऽधिकाः ।
अस्मान् पश्यत निर्मोहानर्भकानगतीनपि ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वयं तु हन्त ! धन्याः स्मः पितृभ्यां रहिता अपि ।
रक्षिता जगदीशेन चिन्ताऽनाक्रान्तचेतसः ॥ ८ ॥
अन्यैरुपेक्षितं तेन रक्षितं किं न वीक्षितम् ? ।
इतरै रक्षितं तेनोपेक्षितं न निरीक्षितम् ॥ ९ ॥
यं शोचथ न शोच्योऽसौ निःसङ्गो निरुपद्रवः ।
शृणोति न विलापान् वः पिण्डोऽयं पार्थिवो जडः ॥ १०॥
निहतां प्रेयसीं शोचन् कुलिङ्गः क्रूरकर्मणा ।
निहतो लुब्धकेनेति यूयं भवत निर्ममाः ॥ ११ ॥
इति बालकवाक्येन बभूवुस्ताः प्रबोधिताः ।
बुध्यध्वमेतद्यूयं च मन्युना मा स्त बाधिताः" ॥ १२ ॥
इति पुत्रस्य वचनाद्विशोका सस्नुषा दितिः ।
आत्मानुध्याननिरता बभूव शमशालिनी ॥ १३ ॥

दितिसान्त्वने उशीनरोपाख्यानम् ।

(३) तृतीये दैत्यराजस्य तपसा परितापिताः ।
देवा विषादिनः स्वीयां दशां विधिमवेदयन् ॥ १ ॥
स तदाश्रममागत्य चरन्तं दुश्चरं तपः ।
सविस्मयः सानुकम्पो वरं ब्रूहीत्यवोचत ॥ २ ॥
असिश्चच्चास्थिगप्राणं स्थाणुसाम्यमुपागतम् ।
कृमिभक्षितमांसं तं पुण्येन किल वारिणा ॥ ३ ॥
अथ संपन्नसर्वाङ्गस्तप्तहेमसमद्युतिः ।
पुरःपश्यन् विधातारं ववन्दे दितिनन्दनः ॥ ४ ॥
सृष्टिमात्रादवध्यत्वं बलात् सर्वातिशायिताम् ।
ऐकाधिपत्यं लोकानां वव्रे दितिजकुञ्जरः ॥ ५ ॥

हिरण्यकशिपुतपश्चर्या ।

(४) चतुर्थे केशवद्वेषाल्लोकेशानभिभूय सः ।
ऐन्द्रं पदमधिष्ठाय बबाधे विबुधोत्तमान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपन्नै[1]रखिलैस्तैश्च प्रपन्नैः[2] सद्भिरर्थितः ।
गिरा व्योमभुवाऽऽश्वस्तान् विदधे ताञ्जनार्दनः ॥ २ ॥

(५) पञ्चमे पञ्चवर्षोऽपि प्रह्लादः पितृयन्त्रितः ।
इष्टैकभगवद्भक्तिरध्यगीष्ट[3] सहापरैः ॥ १ ॥
यत्साधु मन्यसे वत्स ! तद्वदेति कदाचन ।
जगाद दैत्याधिपतिः सुतमुत्सङ्गवर्तिनम् ॥ २ ॥
“साधु जाने खलु वने भक्तितो भजनं हरेः ।
किं शर्म्म ? तात ! भवने कर्म्मसंघातदुस्तरे” ॥ ३ ॥
इति प्रह्लादवचनं निशम्य दितिनन्दनः ।
भेदाशङ्की शिशोः शिक्षां साधु दत्तेत्यभाषत ॥ ४ ॥
अथैनं गुरवः साम्ना बुद्धिरेषा तव स्वतः ।
परतो वेति पप्रच्छुः स्वाम्याशयवशंवदाः ॥ ५ ॥
स च स्वपरधीर्यस्य माययैव प्रजायते ।
तं नमामि हृषीकेशमित्युवाच विचक्षणः ॥ ६ ॥
अथ निर्भर्त्स्य गुरवः सावधानाः समन्ततः ।
एनमध्याप्य शास्त्राणि त्रिवर्गे व्युदपादयन्[4] ॥ ७ ॥
ज्ञातज्ञेयं विदित्वैनं ते निन्युः स्वामिनोऽन्तिकम् ।
स च किंकिमधीतं भोस्त्वयेत्यनुयुयोज[5] तम् ॥ ८ ॥
“अधीता भगवद्भक्तिर्नवलक्षणभूषिता ।
अधीतिरन्या विहिता नाभूदन्यायदूषिता” ॥ ९ ॥
इति पुत्रोक्तिमाकर्ण्य स्खलद्धीर्दैत्यपुङ्गवः ।
अमर्षदुर्दर्शमुखो जगर्हे सभयान् गुरून् ॥ १० ॥
“प्रसीद सर्वाधिपते ! नैवं शिक्षणमस्ति नः ।
नैसर्गिकी शेमुषीयं शिशोरस्य पशोरिव” ॥ ११ ॥

---

(१) आपन्नै आपदं प्राप्तैः (२) प्रपन्नैः शरणागतैः (३) अध्यगीष्ट अधीतवान् ।
(४) व्युदपादयन् व्युत्पन्नं चक्रुः (५) अनुयुयोज पप्रच्छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याचार्यवचः शृण्वन्ननार्य ! मतिरीदृशी ।
कुतस्तेऽजनि जाल्मेति सुतमूचे स विस्मितः ॥ १२ ॥
"ईशानुरागिणामेवं मनीषा तात ! जायते ।
न तु संसारसक्तानामसारजनुषां सताम्" ॥ १३ ॥
इति प्रह्लादवचसा गताह्लादः श्वसन् रुषा ।
आदिशत् स वधं तस्य स्वनिदेशातिवर्तिनः ॥ १४ ॥
शूलैर्गजैर्दन्दशूकैः प्रपातैर्वारिभिर्गरैः ।
अभिचारैरनशनैरपि नायमहन्यत ॥ १५ ॥
ततश्च वारुणैः पाशैर्निबद्धः शुद्धये धियः ।
सुरोत्तमद्विषा तेन न्यधीयत कुले गुरोः ॥ १६ ॥

प्रह्लादचरितम् ।

(६) षष्ठे वसन् गुरुकुलेऽनुगृह्णन् दैत्यबालकान् ।
जगौ भागवतान् धर्मान् कयाधुतनयः सुधीः ॥ १ ॥
" युनक्ति विषयाऽऽसक्तिः पुंसा पापसमुच्चयम् ।
भनक्ति भगवद्भक्तिः समवर्तिभवं भयम् ॥ २ ॥
तिर्यञ्चः सायमञ्चन्ति जानाना निजमाश्रयम् ।
वयं तु तमजानाना भ्रमन्तोऽधिगता भयम् ॥ ३ ॥
भवाध्वनि भ्रमन्नेको रिक्तपाणिर्विषीदति ।
भक्तिपाथेयसंपन्नः पुनर्जन्तुः प्रसीदति ॥ ४ ॥
आकीटजुष्टा का ? भुक्तिर्यया भोक्ता प्रबाध्यते ।
हरेर्भक्तिर्यत्र युक्तिः सा मुक्तिः किं न साध्यते ? ॥ ५ ॥
चारंचारं श्रमजुषां पुंसां संसारकापथे ।
वारंवारं हरेर्याति स्मरणं सारता"मिति ॥ ६ ॥

दैत्यबालकोपदेशः।

(७) सप्तमे ज्ञानसंप्राप्तेरपादानं विवित्सतः ।
दैत्यार्भकानिदं प्रोचे प्रह्लादः शीलशीतलः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरा मदीये जनके तपसे निर्गते सति ।
उपाप्लवन्त गीर्वाणाः प्राणानादातुमेव नः ॥ २ ॥
मदीयां मातरं शक्रः क्रन्दन्तीं कातरान्तराम् ।
गर्भिणीं भिन्नमर्यादश्चकर्षाऽऽमर्षदूषितः ॥ ३ ॥
नारदस्तां समभ्येत्य विलपन्तीं व्यमोचयत् ।
प्रीता सती सा तु मुनिं पर्यचारीदसाध्वसा ॥ ४ ॥
अनुगृह्णन् गर्भगतं मां च तां च महामुनिः ।
उपादिक्षन्मोक्षधर्मं भगवद्भक्तिहेतुकम् ॥ ५ ॥
ताते तपोवनं याते प्रत्यायाते मम प्रभूः ।
सर्वं तद्विस्मृतवती मम तु स्थेयसी स्मृतिः ॥ ६ ॥
वयस्याः ! सर्वतः सङ्गमुत्सृज्य वरिवस्यया ।
प्रसादयत गोविन्दं नानन्दायेतरो विधिः ॥ ७ ॥

दैत्यबालकोपदेशः ।

(८) अष्टमे दैत्यपुत्रेषु भगवद्भक्तिशालिषु ।
भयाकुलः कविसुतो राज्ञि वृत्तमसूसुचत् ॥ १ ॥
अमर्षातिशयादेष क्रूरधीः शान्तमात्मजम् ।
जिघांसुः श्रावयामास नितान्तपरुषा गिरः ॥ २ ॥
"सुतापसद ! दुर्बुद्धे ! दुर्दान्त ! कुलकज्जल ! ।
अतिगच्छसि तुच्छस्त्वं शासनं मम किंबलः" ? ॥ ३ ॥
इत्थं कदर्थ्यमानोऽपि श्रीशध्यानसुधां धयन् ।
धन्यः सधैर्यं स सुधीरभ्यधत्त हितं वचः ॥ ४ ॥
"ब्रह्मादिकवशीकर्तुर्बलिनो बलिनो यतः ।
बलं तदेव मे तात ! तदेव भवतो बलम् ॥ ५ ॥
प्राकृतत्वजिहासा चेत्प्रकृतिं स्वां निवारय ।
लोकत्रयीजिगीषा चेच्चित्तं बहुबलं जय" ॥ ६ ॥

(१) उपाप्लवन्त—उपप्लवम् (उपद्रवम्) अकुर्वन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पुत्रगिरं सोऽयं समाकर्ण्य बृहद्बलः ।
खड्गमादाय निशितमुदस्थात् कोपपाटलः ॥ ७ ॥
"क्व ते स्वामी सर्वसाक्षी जागर्ति बहुलच्छलः ।"
इति गर्जन् सभास्तम्भं मुष्टिनाऽताडयज्जडः ॥ ८ ॥
स्वस्य सर्वव्यापकतां भृत्यानां सत्यभाषिताम् ।
स्फुटीकुर्वन्नरहरिस्तम्भादुदभवत्प्रभुः ॥ ९ ॥
गदाहस्तं विस्फुरन्तमाकृष्य द्वारमध्यतः ।
वक्षो विदार्य नखरैरक्षिणोत्तमधोक्षजः ॥ १० ॥
ब्रह्मादिकाः सुमनसः सिद्धसर्वसमीहिताः ।
दुर्निरीक्ष्यतरं देवमस्तुवन् दूरतः स्थिताः ॥ ११ ॥

हिरण्यकशिपुवधः ।

(९) नवमेऽप्युग्रवपुषमुपसर्तुमनीश्वराः ।
प्रैषयन्निर्जरा लक्ष्मीं तत्प्रसादनकर्मणे ॥ १ ॥
नारसिंहं वपुर्वीक्ष्य भीषणं कमलालया ।
अदृष्टचरमैहिष्ट नोपगन्तुं ससाध्वसा ॥ २ ॥
द्रुहिणाद्यैः सुरगणैः प्रेर्यमाणः सभीतिभिः ।
प्रह्लादः प्रणतः प्राप निर्भयः सन्निधिं हरेः ॥ ३ ॥
वचनैर्भक्तिपीयूषपूरितैः स स्तुवन्नमुम् ।
प्रसादसौम्यमकरोद्वरदानसमुद्यतम् ॥ ४ ॥

नृसिंहस्तुतिः ।

(१०) दशमे भोगविमुखः प्रह्लादस्तत्त्वविन्मतः ।
श्रीनृसिंहं प्रसीदन्तं वव्रे वरमकामताम् ॥ १ ॥
तस्मै मन्वन्तरं यावदाधिराज्यमकण्टकम् ।
अकामतामबन्धं च प्रददौ भक्तवत्सलः ॥ २ ॥
मन्वानो भगवद्द्वेषाच्चिरं निरयवासिताम् ।
स च प्रीतः पितुः स्वस्य सतीं गतिमयाचत ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



विरिञ्चिवरदर्पितत्रिभुवनप्रणाशोद्यत-
द्विषद्दितिजपुङ्गवप्रमथनप्रभावोर्जितः।
कयाधुसुतसत्यताप्रथनकारणस्तम्भभू-
र्विभुर्जयति लीलया धृतनृसिंहमूर्तिर्हरिः॥

"गुजराती" प्रिंटींग प्रेस–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिःसप्तभिः सह पिता सुधिया पावितस्त्वया ।
इत्युक्त्वा नरसिंहश्च तं स्वभक्तमतूतुषत् ॥ ४ ॥
तादृग्वरप्रदानाय निषिध्य द्रुहिणं हरिः ।
संपश्यतां दिविषदामदृश्यत्वं समाश्रयत् ॥ ५ ॥
एतस्यैव पुरा साह्यं समासाद्य जगत्पतेः ।
अप्रतर्क्यं दुराधर्षं ददाह त्रिपुरं हरः ॥ ६ ॥
प्रह्लादानुग्रहः ।

(११) एकादशे सर्ववर्णसाधारण्यात् सुरर्षिणा ।
केचिद्धर्माः समाम्नाताः सविशेषाश्च केचन ॥ १ ॥
तपःशौचतितिक्षेक्षासत्यशान्तिदयादमाः ।
अहिंसात्यागसमतास्वाध्यायब्रह्मचारिताः ॥ २ ॥
नैष्कर्म्यार्जवसंतोषमहत्सङ्गविरक्तयः ।
मौनतत्त्वानुसन्धानभोग्यभागविभाजनाः ॥ ३ ॥
गुणानुवादश्रवणं कीर्तनं रूपचिन्तनम् ।
सेवनं पूजनं पादवन्दन दास्ययोजनम् ॥ ४ ॥
सख्यमात्मार्पणं विष्णौ प्रपञ्चपितरि प्रभौ ।
इत्येते नारदेनोक्ता धर्माः साधारणात्मकाः ॥ ५ ॥
तपःस्वाध्यायसंतोषशुचितेश्वरभक्तयः ।
शमो दमस्तितिक्षा च ज्ञानं च ब्रह्मणो गुणाः ॥ ६ ॥
धैर्यं शौर्यं दक्षता च तेजो दानं सरक्षणम् ।
युद्धापलायनं स्वाम्यं क्षात्रोऽयं धर्म इष्यते ॥ ७ ॥
आस्तिक्यमुद्यमो दाक्ष्यं भक्तिर्देवद्विजन्मनाम् ।
त्रिवर्गरक्षणं दानं वैश्यधर्मोऽयमिष्यते ॥ ८ ॥
अस्तेयं सत्यवचनममायास्वामिसेवनम् ।
गोब्राह्मणपरित्राणं धर्मोऽयं शूद्रशर्मदः ॥ ९ ॥
पतिसेवा सत्यमितप्रियवाक्याभिधायिता ।
संतोषो दक्षता शौचं स्त्रीणां धर्मः सनातनः ॥ १० ॥
वर्णाश्रमधर्माः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१२) द्वादशे स्वगुरोः सेवा भिक्षावृत्तिः सुशीलता ।
स्त्रीसंपर्कपरित्यागः शुचिता मितभोजिता ॥ १ ॥
गायत्रीमन्त्रपरता गुर्वग्न्यर्कसभक्तिता ।
आम्नायाध्ययनं चेति धर्मोयं ब्रह्मचारिणः ॥ २ ॥
वने गिरौ वा निवासः सर्वद्वन्द्वसहिष्णुता ।
आत्मतत्त्वानुसन्धानं नित्यकर्मविधायिता ॥ ३ ॥
अकृष्टपच्यग्रसनं संतोषः समदृष्टिता ।
वानप्रस्थस्य धर्मोऽयं योगनिष्ठासमन्वितः ॥ ४ ॥

ब्रह्मचारिवनस्थधर्माः ।

(१३) त्रयोदशे गात्रमात्रपरिग्रहवता सता ।
एकाकिनाऽनाश्रयेणाऽनैषिणा समदर्शिना–॥ १ ॥
सर्व स्वस्मिन्नवासितं सर्वस्मिन् स्वं च पश्यता ।
भवितव्यं परिव्राजेत्युपादिक्षन्महामुनिः ॥ २ ॥
किंच कंचिन्मुनिं श्रीमान् प्रह्लादः सह्यसानुनि ।
निरीक्ष्य पीवरतनुमपृच्छज्जातकौतुकः ॥ ३ ॥
व्रतमाजगरं धत्से नोद्युङ्क्षे न समृद्धयसे ।
ब्रूहि भो ! हेतुना केन ब्रह्मन् ! पीनः प्रदृश्यसे ? ॥ ४ ॥
इति दैत्येन्द्रवचनं निशम्य स मुनीश्वरः ।
मन्दं हसन्निव प्रोचे माध्वीकमधुरं वचः ॥ ५ ॥
दैत्येन्द्र ! कर्मभिर्नानाविधैरिह परिभ्रमन् ।
मनुजत्वमवाप्तः सन् कः प्रमाद्यति चेतनः ? ॥ ६ ॥
तनुरक्रियता पुंसः सुखं रूपं चिदात्मनः ।
एवं स्थिते सक्रियत्वं दुःखान्वेषणमेव नः ॥ ७ ॥
ईहाजिताः सदा हाहा कुर्वते क्लेशशोषिताः ।
अनीहानामदीनानां स्वभावादस्तिपीनता ॥ ८ ॥
यस्य यादृच्छिका भोगा न च्छिन्दन्ति निजां स्थितिम् ।
ते दुःखकूटान् भिन्दन्ति विन्दन्ति परमं पदम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति दैत्यपतिः श्रुत्वा मुनेस्तस्य वचः सुधीः ।
परहंसस्थितिं शंसन् तं प्रणम्य ततोऽगमत् ॥ १० ॥

यतिधर्माः प्रल्हाददत्तसंवादश्च ।

(१४) चतुर्दशे गृहस्थस्य निजवर्णोचिताः क्रियाः ।
ममतारहितत्वेन गृहेष्वतिथिवत् स्थितिः ॥ १ ॥

नातिप्रसक्तिर्वित्तेषु स्वकुटुम्बानुमोदनम् ।
नित्यनैमित्तिकश्राद्धदेवपूजनसक्तता ॥ २ ॥

शास्त्रे श्रद्धा हरौ भक्तिर्विषयेषु वितृष्णता ।
इति धर्मा यथायोगं नारदेन प्रकीर्तिताः ॥ ३ ॥

गृहस्थधर्माः ।

(१५) इह पञ्चदशेऽध्याये साधारण्यात्पुनर्मुनिः ।
अपीडनं प्राणभाजां मनसा कर्मणा गिरा ॥ १ ॥

अनुष्ठानं कर्मणां च नित्यनैमित्तिकात्मनाम् ।
षड्वर्गदूरीकरणं संतोषेण प्रवर्तनम् ॥ २ ॥

निजचित्तस्य दमनं परतत्त्वानुचिन्तनम् ।
सदा सर्वत्र सर्वेषां हितहतुमवोचत ॥ ३ ॥

किं' चोपबर्हणाख्यस्य गन्धर्वस्य सतः पुरा ।
मदोद्धतस्य शप्तस्य ब्राह्मणैः सत्रवर्तिभिः ॥ ४ ॥

दासीपुत्रत्वमाप्तस्य, द्वितीये जन्मनि द्विजैः ।
अनुगृहीतस्य हरौ मम भक्तिरजायत ॥ ५ ॥

पुनर्विधातुरुत्सङ्गाज्जातः, कल्पान्तरे हरेः ।
भृत्यत्वेन कृतार्थोऽस्मि, त्वं च राजन् ! युधिष्ठिर ! ॥ ६ ॥

मातुलेयत्वमापन्ने परमात्मनि माधवे ।
धारयन्नचलां भक्तिं धन्योऽसीत्यवदन्मुनिः ॥ ७ ॥

साधारणधर्माः ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
भक्तेन सप्तमः स्कन्धः समक्षेपि यथामति ॥७॥

॥ पद्यसङ्कलनाङ्काः ॥ ११८ ॥

(१) चतुर्भिरन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी।

(स्कन्धः ८)

स्पष्टीकृतद्वयष्टवर्षाकृतिस्त्रैणवपुर्हरिः।
अष्टमूर्तिमनोऽभीष्टं घटयन्नोऽस्तु तुष्टये ॥ ८॥

(१) निरूप्यतेऽष्टमस्कन्धे मन्वन्तरपरिस्थितिः।
मनुतत्पुत्रदेवेन्द्रर्ष्यवतारप्रपञ्चनैः ॥ १ ॥
आद्यः स्वायम्भुवस्तस्य प्रियव्रतमुखौ सुतौ।
यामा देवा हरेरंशो यज्ञः शक्रत्वमाश्रितः ॥ २ ॥
मरीच्याद्याश्च ऋषयो मन्वन्तरसमाश्रयाः।
स्वारोचिषो द्वितीयस्तु तत्पुत्रा द्युमदादयः ॥ ३ ॥
इन्द्रश्च रोचनो नाम निर्जरास्तुषितादयः।
ऊर्जस्तम्भादयः सप्त मुनयो विभुरीश्वरः ॥ ४ ॥
तृतीय उत्तमो नाम तत्सुताः पवनादयः।
सत्याद्या दिविषद्वर्गाः प्रमदाद्या महर्षयः ॥ ५ ॥
इन्द्रश्च सत्यजिन्नामा सत्यसेनाभिधो हरिः।
चतुर्थस्तामसो नाम पृथ्वाद्यास्तत्सुता दश ॥ ६ ॥
सत्यकप्रमुखा देवाः शक्रस्त्रिशिखनामकः।
ज्योतिर्धामादयो विप्रा देवा वैधृतयः पुनः ॥ ७ ॥
हरिण्यां जनिमासाद्य विप्रर्षेर्हरिमेधसः।
हरिनामाऽभवच्छ्रीशो गजो येन व्यमुच्यत ॥ ८ ॥

मन्वन्तरवर्णने चत्वारो मनवः।

(२) द्वितीये तु गजेन्द्रस्य त्रिकूटगिरिचारिणः।
करेणुभिर्विहरतः सतः सरसि कुत्राचित्–॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाग्राहगृहीतस्य सुचिरश्रमधारिणः ।
दैवात् स्मृतिर्भगवतो हरेरजनि दुःखिनः ॥ २ ॥
गजेन्द्रोपाख्यानम् ।

(३) तृतीये गजराजेन भक्तिभाजा स्तुतो हरिः ।
आविर्बभूव सर्वात्मा सदयस्तार्क्ष्यवाहनः ॥ १ ॥
प्रणमन्तं कृताक्रन्दं कराग्रोत्क्षिप्तपुष्करम् ।
तमुद्धरन् स चक्रेण चक्रे नक्रं विदारितम् ॥ २ ॥
गजेन्द्रोद्धारः ।

(४) चतुर्थे ग्राहतां त्यक्त्वा हूहूर्देवलशापजाम् ।
प्रणम्य संपरिक्रम्य हरिं गायन्नगाद्दिवम् ॥ १ ॥
अगस्त्यशापसंजातां विमुच्य गजराजताम् ।
इन्द्रद्युम्नश्च राजर्षिर्हरेरजनि पार्षदः ॥ २ ॥
हरिश्च वृत्तमेतद्यः स्मरन् मां स्तौति संयतः ।
सती गतिस्तस्य भूयादित्युक्त्वान्तरधीयत ॥ ३ ॥
गजग्राहयोर्वृत्तम् ।

(५) पञ्चमे पञ्चमो जातो मनू रैवतनामकः ।
अर्जुनाद्याः सुतास्तस्य विभुनामा सुरेश्वरः ॥ १ ॥
ऊर्ध्वबाह्वादयो विप्रा देवा भूतरयादयः ।
विकुण्ठागर्भसंभूतो वैकुण्ठः परमेश्वरः ॥ २ ॥
षष्ठो मनुश्चाक्षुषोऽभूत्पूरुमुख्यास्तदात्मजाः ।
इन्द्रो मन्त्रद्रुमो, देवा आप्याद्याः, परमर्षयः ॥ ३ ॥
हविष्मत्प्रमुखास्तत्र श्रीशः संभृतिगर्भतः ।
प्राप्तो वैराजपुत्रत्वमजनिष्टाऽजिताभिधः ॥ ४ ॥
यं च दुर्वाससा शप्ता हृतराज्या दिवौकसः ।
ब्रह्माणमग्रतः कृत्वा शक्रमुख्याः प्रपेदिरे ॥ ५ ॥
समाहितमतिर्भूत्वा भक्तिमाधाय चेतसि ।
विधिश्च देवानुद्धर्तुमस्तौदजितमीश्वरम् ॥ ६ ॥
पञ्चमषष्ठौ (रैवतचाक्षुषौ) मनू ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(६) षष्ठे स्तुतिप्रसन्नः सान्नाविर्भूतोऽजितः सुरैः ।
पुनरस्तूयत प्रीतैर्भक्तिगद्गदभाषितैः ॥ १ ॥
दितिजैः सह सन्धाय पयोधिमथनाय सः ।
देवानादिश्य भगवान् शिश्रिये दृगदृश्यताम् ॥ २ ॥
सदैतेया यथाऽऽदेशं देवा उन्मूल्य मन्दरम् ।
नयन्तो जलधिं श्रान्ता अशक्ताः पथि तत्यजुः ॥ ३ ॥
हतोत्साहान् समालोक्य देवानजित एव सः ।
एत्य तार्क्ष्येण बलवाननैषीद्गिरिमम्बुधिम् ॥ ४ ॥

समुद्रमथनोपक्रमः।

(७) सप्तमे दीर्घभोगस्य नेत्रीभूतस्य वासुकेः ।
दैत्यादितेया जगृहुः सहर्षा मौलिपुच्छयोः ॥ १ ॥
अथाधिवारिधि क्षिप्तं निमग्नं मन्दरं धरम् ।
कूर्मरूपेण भगवानुज्जहार जनार्दनः ॥ २ ॥
अन्योन्यमित्रतां प्राप्ताः स्वसमीहितसिद्धये ।
ममन्थुः पृथुलोद्योगाः सरिन्नाथं सुरासुराः ॥ ३ ॥
वर्धयँश्च तदुत्साहं स्वयमेवाजितो हरिः ।
सहैव तैः प्रमुदितैरमथ्नाद्विहतव्यथः ॥ ४ ॥
अथ सिन्धोर्मथ्यमानादभूद्धालाहलं विषम् ।
वितस्तरे व्यस्तलोकं यस्य तेजश्चतुर्दिशम् ॥ ५ ॥
प्रजापतीन् पुरस्कृत्य विषादविवशीकृताः ।
सुपर्वाणः शर्महेतोरष्टमूर्तिं प्रतुष्टुवुः ॥ ६ ॥
अपारकरुणासिन्धुस्तदपर्णानुमोदितः ।
पपौ परहितप्रार्थी चराचरमहेश्वरः ॥ ७ ॥
प्राणिवर्गोपकाराय सोत्कण्ठः क्ष्वेडपानकृत् ।
चिराय भगवान् भर्गो नीलकण्ठत्वमाययौ ॥ ८ ॥

समुद्रात् हालाहलोत्पत्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८) अष्टमे निर्गतां सिन्धोः कामधेनुं मुनीश्वराः ।
जगृहुर्भगवन्नुन्ना हविःसाधनतां गताम् ॥ १ ॥
उच्चैःश्रवसमुद्भूतमाददे दैत्यराड् बलिः ।
ऐरावतं चतुर्दन्तं जग्राह त्रिदशाधिपः ॥ २ ॥
कौस्तुभाख्यं महद्रत्नमनुरूपं हरिर्दधे ।
पारिजातं तरुवरं स्वीचक्रुरमरव्रजाः ॥ ३ ॥
विनिर्गता अप्सरसः पुण्यातिशयशालिनाम् ।
प्रमोदाय ससौन्दर्याः साधारणतया स्थिताः ॥ ४ ॥
असीमरूपलावण्या समुद्भूय ततो रमा ।
देवान् समालोचमाना वव्रे नारायणं वरम् ॥ ५ ॥
जातां च वारुणीं देवीं प्रान्तपाटलचक्षुषम् ।
अहंपूर्विकया प्रीता जगृहुर्दितिनन्दनाः ॥ ६ ॥
दर्शनीयतराकारः सुधाकुम्भोल्लसत्करः ।
आयुर्वेदमहाचार्यो धन्वन्तरिरजायत ॥ ७ ॥
हृतवत्सु च दैत्येषु कलशं बलशालिषु ।
अगच्छन् शरणं श्रीशं विहताशा दिवौकसः ॥ ८ ॥
विषण्णमनसो देवानवेक्ष्य मधुसूदनः ।
बभूव मोहिनी नाम कापि नारीमतल्लिका ॥ ९ ॥
सा सहावा लसद्भावा हेलालालित्यशालिनी ।
उद्बबन्ध मनः क्षिप्रं सर्वेषामेव विभ्रमैः ॥ १० ॥

मोहिनीप्रादुर्भावः ।

(९) नवमे दैत्यवर्गेण मोहिनी प्रार्थिता सती ।
विभजन्ती सुधां चक्रे पङ्क्ती द्वे देवदैत्ययोः ॥ १ ॥
विभ्रमैर्मोहितान् दैत्यान् वञ्चयन्ती द्युसद्गणम् ।
पीयूषं पाययामास यथाभिलषितं च सा ॥ २ ॥
देवपङ्क्तिसमाविष्टः स्वर्भानुरमृतं पिबन् ।
चन्द्रार्कसूचितः कण्ठे चिच्छिदे चक्रपाणिना ॥ ३ ॥

अमृतपानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१०) दशमे वञ्चिताः सन्तः कृतभूरिपरिश्रमाः ।
असुराः शौर्यसंपन्ना योद्धुमारेभिरे सुरैः ॥ १ ॥
बलिना दैत्यराजेन मायाशतविदा सता ।
पराभूता दिविषदो विषादं समुपागताः ॥ २ ॥
स्मृतमात्रस्तदा देवैर्भेजद्वृजिनभञ्जनः ।
अष्टबाहुः खगारूढः प्रादुरासीज्जनार्दनः ॥ ३ ॥
महामायापतिः सोऽयं मायामसुरनिर्मिताम् ।
व्यधमत्प्रधनारम्भे विबुधत्रासकारिणीम् ॥ ४ ॥

देवासुरयुद्धम् ।

(११) एकादशे लब्धबलाः पलायनपरा अपि ।
बर्हिर्मुखाः परावृत्य दैत्यमुख्यानखेदयन् ॥ १ ॥
विरिञ्चिना नियुक्तश्च नारदो वाग्विशारदः ।
समराद्वारयामास शमशंसी सुरासुरान् ॥ २ ॥
जग्मुर्दयापात्रगात्रा गतप्राणाश्च सङ्गरे ।
सञ्जीवनीविदः शुक्रादसुराः प्राप्तजीवताम् ॥ ३ ॥

युद्धोपरमः ।

(१२) द्वादशे मोहिनीरूपदिदृक्षाकुलितान्तरः ।
अस्तावीत् सगणः प्राप्य विष्वक्सेनं महेश्वरः ॥ १ ॥
अदर्शयत् पूरयन् सन् मन्मथारेर्मनोरथम् ।
सर्वातिशायिसौन्दर्यं वपुः स्त्रैणं जगत्पतिः ॥ २ ॥
विस्मृतात्मा गेहिनीं स्वामपश्यन्नेव मोहिनीम् ।
अन्वधावत धावन्तीं निर्व्रीडत्वं गतो मृडः ॥ ३ ॥
कृशानुरेता भगवान् संस्पृशन्नेव मोहिनीम् ।
स्कन्नरेतस्त्वमासाद्य स्वं प्राबुध्यत मोहितम् ॥ ४ ॥
दधता पौरुषं रूपं माधवेन प्रशंसितः ।
तं प्रणम्य परिक्रम्य गिरिशः सगणो गतः ॥ ५ ॥

शङ्करमोहनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१३) त्रयोदशे वर्तमानो मनुर्वैवस्वताभिधः।
इक्ष्वाकुनभगाद्याश्च मनोस्तस्य दशात्मजाः ॥ १ ॥
आदित्यविश्वप्रमुखास्तत्रदेवगणाः स्मृताः।
नाम्ना पुरन्दरः शक्रः कश्यपाद्या महर्षयः ॥ २ ॥
सूनुः कश्यपनामर्षेः पुरन्दरहितावहः।
वामनो नाम भगवानभूददितिगर्भतः ॥ ३ ॥
भविष्यत्यष्टमः काले मनुः सावर्णिनामकः।
निर्मोकाद्यास्तस्य सुता देवाः सुतपसः स्मृताः ॥ ४ ॥
विरोचनस्य तनयो बलिरिन्द्रो भविष्यति।
गालवाद्या द्विजाः श्रीशः सार्वभौमो भविष्यति ॥ ५ ॥
नवमो दक्षसावर्णिर्भूतकेत्वादयः सुताः।
देवाः पारादिकाः शक्रोऽद्भुतसंज्ञो महर्षयः ॥ ६ ॥
द्युतिमत्प्रमुखाः श्रीश आयुष्मत्पुत्रतां गतः।
ऋषभाख्योऽम्बुधारायामवतारं ग्रहीष्यति ॥ ७ ॥
दशमो ब्रह्मसावर्णिर्भूरिषेणादयः सुताः।
देवाः सुवासनमुखाः शम्भुनामा सुरेश्वरः ॥ ८ ॥
हविष्मदादयो विप्रा विषूच्यां विश्वसृट्सुतः।
आविर्भूतो विश्वपतिर्विष्वक्सेनो भविष्यति ॥ ९ ॥
ततश्च धर्मसावर्णिर्धर्मसत्यादयः सुताः।
देवा विहङ्गमप्रमुखा वैधृतस्त्रिदशाधिपः ॥ १० ॥
अरुणाद्या द्विजाः श्रीशो वैधृतागर्भसंभवः।
आर्यकस्यात्मजो नाम्ना धर्मसेतुर्भविष्यति ॥ ११ ॥
द्वादशो रुद्रसावर्णिः पुत्रा देववदादयः।
हरिताद्याः सुरगणा ऋतधामा सुरेश्वरः ॥ १२ ॥
तपोमूर्तिमुखा विप्राः सूनृतागर्भसंभवः।
श्रीशः सत्यसहःपुत्रः स्वधामाख्यो भविष्यति ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रयोदशो मनुर्देवसावर्णिस्तस्य चात्मजाः ।
चित्रसेनमुखाः, देवाः सुकर्माद्याः प्रकीर्तिताः ॥ १४ ॥
दिवस्पतिः सुराधीशो निर्मोकाद्या द्विजा, हरिः ।
उपहर्ता देवहोत्राद् बृहत्यां संभविष्यति ॥ १५ ॥
अन्तिमश्चेन्द्रसावर्णिरुरुमुख्यास्तदात्मजाः ।
देवाः पवित्रप्रमुखाः शुचिरिन्द्रो महर्षयः ॥ १६ ॥
अग्न्यादयो वितानायां सत्रायणसमुद्भवः ।
प्रभुर्बृहद्भानुनामा त्रिलोकीं भावयिष्यति ॥ १७ ॥

सप्तमाद्या अष्टौ मनवः ।

(१४) चतुर्दशे मनुमुखाः प्रतिमन्वन्तरं हरेः ।
आदेशमनुरुन्धानाः प्रवर्तन्त इतीरितम् ॥ १ ॥

(१५) ततः पञ्चदशेऽमर्षी सुरवर्गैः पराजितः ।
बलिर्गुरूनाराध विजिगीषानियोजितः ॥ १ ॥
प्रसन्नास्ते महात्मानो भृगवः शिष्यवत्सलाः ।
अयाजयन् विश्वजिता महता सप्ततन्तुना ॥ २ ॥
रथं हयान् ध्वजं वर्म कार्मुकं सशरेषुधि ।
बलिर्हुताद्भुतभुजः प्राप्तवानद्भुतं सुधीः ॥ ३ ॥
तत्तादृशोपकरणो रणोत्साहधरो बली ।
बलिः स्वसेनया साकं साकम्पानकरोत्सुरान् ॥ ४ ॥
तमजेयं मन्यमाना भृग्वनुग्रहशालिनम् ।
धिषणानुमताः सर्वे सुपर्वाणो निलिल्यिरे ॥ ५ ॥
स च निष्कण्टकं प्राप्य स्वाराज्यमसुरोत्तमः ।
शतेन वाजिमेधानामीजे प्राज्यपराक्रमः ॥ ६ ॥

बलिविजयः ।

(१६) षोडशे विहतश्रीकान् शोचन्ती स्वसुतान् सुरान् ।
अदितिः प्रार्थयामास कश्यपं सुतवत्सला ॥ १ ॥
प्रसन्नः कश्यपस्तस्यै समीहितसमर्पकम् ।
उपादिशद्धृषीकेशप्रीतिदायि पयोव्रतम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या मनोरुचिरुदेति तां जनः
केवलं बलिषु लाघवं श्रयन्- ।
साधयेदिति कृतेः प्रबोधयन्
वामनो विजयते जनार्दनः ।

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१७) ततः सप्तदशे तेन व्रतेन परितोषितः ।
पुरोबभूव भगवानदितेर्भक्तवत्सलः ॥ १ ॥
तया स्तुतश्च भगवान् पुत्राभ्युदयकामया ।
प्रतिशुश्राव पुत्रत्वं स्वाराज्यं च जगत्पतिः ॥ २ ॥
कालेनाल्पीयसा सोऽयं काश्यपं तेज आश्रितः ।
प्रविष्टश्चादितेर्गर्भं ब्रह्मणा च परिष्टुतः ॥ ३ ॥

वामनावतारोपक्रमः ।

(१८) अष्टादशेऽदितेर्गर्भादर्भकाकृतिरीश्वरः ।
प्रादुर्बभूव शमयन् विषादममृताशिनाम् ॥ १ ॥
जातमात्रः स च बटुर्वामनः पटुधीः सुरैः ।
उपनिन्ये भास्वदाद्यैरितरैश्च समादृतः ॥ २ ॥
छत्री कमण्डलुधरो दण्डपाणिर्महाद्युतिः ।
मायामाणवकः प्राप स बलेर्मखमण्डपम् ॥ ३ ॥
तं च सत्कृत्य स बलिर्दानवीरशिरोमणिः ।
ऊचे यच्छामि भवते यथेच्छं प्रार्थ्यतामिति ॥ ४ ॥

वामनचरितम् ।

(१९) एकोनविंशे भगवान् प्रशंसन् बलिपूर्वजान् ।
तं ययाचे पदतलत्रितयप्रमितां महीम् ॥ १ ॥
बलिं महीं प्रदित्सन्तमुशना दिव्यदर्शनः ।
निषिषेध हितैषी सन् भाषितैर्नीतिसंगतैः ॥ २ ॥

वामनभिक्षणम् ।

(२०) विंशे निजगुरोर्वाक्यमभिनन्दन्नुदारधीः ।
पदत्रयमितां भूमिमदत्त दितिनन्दनः ॥ १ ॥
प्रपञ्चबीजतां स्वस्य व्यञ्जयन्नेव सत्वरम् ।
संकल्पोदकलाभेन मायावटुरवर्धत ॥ २ ॥
त्रिपादूर्ध्व उदैत्पद्भ्यां द्यावाभूमी निरुध्य सः ।
अत्यरिच्यत पादेन वैराजं वपुराश्रितः ॥ ३ ॥

त्रिविक्रमाविर्भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२१) एकविंशेऽमर्षवशाद्दितिजातानभिद्रुतान् ।
अवारयन् पारिषदाः श्रीहरेरुद्यतायुधाः ॥ १ ॥
संकल्पिताऽपूर्तिहेतोः प्रेरितः प्रभविष्णुना ।
अबध्नाद्दारुणैः पाशैर्बलिं पतगपुङ्गवः ॥ २ ॥
प्रतिश्रुततृतीयांशमप्रयच्छन् प्रयाचते ।
निरयं तुच्छ ! गच्छेति तं दुरूचे जनार्दनः ॥ ३ ॥

बलिबन्धनम् ।

(२२) द्वाविंशे दितिजाधीशस्तृतीयस्मै पदाय सः ।
उपाजहार मूर्धानं स्वीयं धीरधुरन्धरः ॥ १ ॥
प्रसादातिशयं प्राप्तः प्रह्लादाद्यैः परिष्टुतः ।
अनन्तरेन्द्रतां तस्य प्रतिशुश्राव माधवः ॥ २ ॥
अध्यास्स्व सुतलं तावत्त्वत्प्रतीहारपालकः ।
अहं च संनिधास्यामीत्येनं सदकरोच्च सः ॥ ३ ॥

बलेरनुग्रहः ।

(२३) त्रयोविंशे स्तुतः श्रीशः प्रह्लादेन पुनर्बलेः ।
सप्ततन्तोः साङ्गतायै भृगुनन्दनमादिशत् ॥ १ ॥
शुक्रोपवर्णितगुणः परिपूर्णमनोरथम् ।
प्रातिष्ठिपद्दैत्यपतिं सुतलं सपितामहम् ॥ २ ॥
इति त्रिलोकीं शक्राय प्रदाय परहस्तगाम् ।
तेन प्रसीदता साकं ययौ नाकं त्रिविक्रमः ॥ ३ ॥
गोविन्दगुणकर्माणि गायन्तः सस्मिताननाः ।
अदितेर्नन्दनाश्चान्ये स्वानि धामानि भेजिरे ॥ ४ ॥

शक्रस्य स्वाराज्यलाभः ।

(२४) चतुर्विंशे श्राद्धदेवः सेवमानश्चतुर्भुजम् ।
कृतमालापयःपायी शिश्रिये जलशायिनम् ॥ १ ॥
देवाँस्तर्पयता तेन कदाचित् प्रसृतेऽञ्जलौ ।
ददृशे मीनशिशुकस्तत्यजे च कृतत्वरम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादोभ्यो बिभ्यता तेन प्रार्थितः कलशोदरे ।
तं निधाय स राजर्षिर्नैषीन्निजमाश्रमम् ॥ ३ ॥
प्रत्यहं वर्धमानं च प्रार्थयन्तं च तं नृपः ।
उत्तरोत्तरविस्तारं निन्ये तोयाशयान्तरम् ॥ ४ ॥
अथोदधिं स नीतोऽपि यादोभ्योऽभिनयन् भयम् ।
पर्यचायि हरित्वेन द्रविडानां विडौजसा ॥ ५ ॥
स्तुवन्तं तं तरीं लब्धामारोहेः सर्षिसप्तकः ।
सप्तमेऽह्नि लयो भावीत्यूचे मीनवपुर्हरिः ॥ ६ ॥
लीने मीने तत्र दर्भेष्वास्तीर्णेषु निषद्य सः ।
भगवत्पदपाथोजद्वन्द्वं दध्यौ समाहितः ॥ ७ ॥
सप्तमेऽहनि वर्षत्सु मेघेपूल्लङ्घितावधिः ।
प्लावयन् सकलाँल्लोकानवर्धत महोदधिः ॥ ८ ॥
अथैकशृङ्गः सौवर्णः परिपूर्णान्महार्णवात् ।
प्रादुरासीत्प्रमाणेन मत्स्यो नियुतयोजनः ॥ ९ ॥
विषाणबद्धतरणिस्तदादेशवशंवदः ।
अस्तावीच्छ्राद्धदेवस्तं देवदेवमुदारधीः ॥ १० ॥
भ्रमयन्नेव तां नावं मीनमूर्तिधरो हरिः ।
उपादिक्षन्मोक्षदात्रीं सयोगां साङ्ख्यसंहिताम् ॥ ११ ॥

मीनावतारः ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
अष्टमोऽप्यसकौ स्कन्धः समक्षेपि यथामति ॥ ८ ॥

॥ पद्यसंकलनाङ्काः ११७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः ९)

निसर्गकरुणापूर्णं नमन्निरयनाशनम् ।
नमनीयं निर्जरौघैर्नित्यं नारायणं नुमः ॥ ९ ॥

(१) अध्यायैर्विंशतिमितैश्चतुर्भिराधिकैः शुकः ।
वैवस्वतमनोर्वंशं नवमे समदर्शयत् ॥ १ ॥
आद्ये मनौ श्राद्धदेवे पुत्रेष्ट्या यष्टुमुद्यते ।
श्रद्धाऽऽर्थयत होतारं तत्पत्नी सव्रता सुताम् ॥ २ ॥
कन्यकायां प्रजातायामिलायां खिन्नमानसः ।
संकल्पफलवैषम्येऽपृच्छद्धेतुं गुरुं मनुः ॥ ३ ॥
वसिष्ठः प्रोक्तवृत्तान्तः स्तुत्वाऽऽदिपुरुषोत्तमम् ।
इलां पुंस्त्वेन संयोज्य सुद्युम्नमकरोत्सुतम् ॥ ४ ॥
सुद्युम्नो मृगयार्थी सञ्छिवशापसमन्वितम् ।
मेरूपान्तं गतः प्राप स्त्रीभावं सानुग' पुनः ॥ ५ ॥
बुधप्रसङ्गान्महिला स इला सन् वनान्तरे ।
सुरूपं जनयामास पुरूरवसमात्मजम् ॥ ६ ॥
गुरुप्रसादितशिवप्रसादात्पुनरप्ययम् ।
स्त्री मासं पुरुषो मासमासीद्विस्मापिताऽखिलः ॥ ७ ॥
नातिप्रियः स प्रजानां पुरूरवसमात्मजम् ।
राज्ये निधाय निर्विण्णः शिश्रिये तपसे वनम् ॥ ८ ॥

इलोपाख्यानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) द्वितीये श्राद्धदेवस्य मनोः पुत्राः प्रजज्ञिरे ।
इक्ष्वाकुनृगशर्यातिदिष्टधृष्टादिका दश ॥ १ ॥

तेष्वष्टमः पृषध्राख्यो गुरुशापात्सुदारुणात् ।
वार्षल्यं व्याघ्रविभ्रान्तिकृतधेनुवधो ययौ ॥ २ ॥

स चैकतानतां प्राप्तः श्रीशाङ्घ्रिद्वितये सुधीः ।
आससाद ब्रह्मभूयं दवदग्धकलेवरः ॥ ३ ॥

मनुपुत्रः कनीयाँश्च कविर्नाम महामनाः ।
शैशवे सर्वमुत्सृज्य न्यमज्जत्कैशवे पदे ॥ ४ ॥

मनुपुत्रस्य धृष्टस्य कुलं धार्ष्टाभिधानकम् ।
ब्राह्मण्यमगमत्सर्वमनुरूपेण कर्मणा ॥ ५ ॥

मनुपुत्रस्य षष्ठस्य करूषस्य सुताः पुनः ।
उत्तरापथपृथ्वीशा आसन्धर्मपरायणाः ॥ ६ ॥

नैरिष्यन्तस्य[२] दिष्टस्य[३] नृगस्या[४]ऽप्यन्वयोद्भवाः ।
विश्वविश्रुतनामानो महात्मानोऽभवञ्जनाः ॥ ७ ॥

मनुपुत्रवृत्तम् ।

(३) तृतीये ब्रह्मनिष्ठोऽपि विहरिष्यन्मनोः सुतः ।
सावरोधजनः प्राप शर्य्यातिश्च्यवनाश्रमम् ॥ १ ॥

(१) आदिशब्देन–करूषक–नरिष्यन्त–पृषध्र–नभग–कवयो ग्राह्याः । (२) नरिष्यन्तान्वयभवाः–नरिष्यन्तः । चित्रसेनः। दक्षः । मीढ्वान्। कूर्चः । इन्द्रसेनः। वीतिहोत्रः। सत्यश्रवाः । उरुश्रवाः। देवदत्तः । अग्निवेश्यः। अत आरभ्यैतत्क्षत्रकुलं कर्मणा ब्राह्मण्यमवाप । (३) दिष्टान्वयाः–दिष्टः । नाभागः (अयं कर्मणा वैश्यः)। भलन्दनः । वत्सप्रीतिः । प्रांशुः। प्रमतिः । खनित्रः। विविंशतिः । रम्भ (दम्भः)। खनिनेत्रः । करन्धमः । अवीक्षितः। मरुत्तः (अयं महायज्वा)। दमः। राज्यवर्धनः। सुधृतिः। नरः। केवलः । बिन्दुमान् । वेगवान् । बिन्दुः । तृणबिन्दुः । विशालः । हेमचन्द्रः । धूम्राक्षः । संयमः । कृशाश्वः (भृशाश्वः)। सोमदत्तः । सुमतिः । जनमेजयः । (४) नृगान्वयाः—नृगः । सुमतिः । भूतज्योतिः । वसुः । प्रतीकः । ओघवान् । ओघवान् । इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रीडन्ती कन्यका तस्य सुकन्या ससखीजना ।
वल्मीकरन्ध्रयोर्दैवाज्ज्योतिर्द्वयमवैक्षत ॥ २ ॥
विव्याध कण्टकाग्रेण तच्च सा जातकौतुका ।
ततस्तां भीषयद्भूरि च्छिद्रादसृगसुस्रुवत् ॥ ३ ॥
मलमूत्रनिरोधेन क्लिश्यमानेऽखिले जने ।
सुकन्या पितरं प्रोचे स्वकीयं कर्म बिभ्यती ॥ ४ ॥
अतितिक्षुं ध्वंसिताक्षं च्यवनं विवृताशयम् ।
प्रसादयामास निजां प्रदाय तनयां नृपः ॥ ५ ॥
परिचर्यापरा सा च जराजीर्णमचक्षुषम् ।
सुकन्या तोषयामास तमृषिं प्रोल्लसद्वपुषम् ॥ ६ ॥
दस्रयोर्दयया प्राप्य मुनिर्दिव्यतरं वपुः ।
निराकरोन्निरवधिं शर्यातेराधिमुद्धतम् ॥ ७ ॥
मिषतामेव देवानां भिषजौ सोमपायिनौ ।
शर्यातेरध्वरे चक्रे मुनिः प्रत्युपकृत्य सः ॥ ८ ॥
आनर्तनाम्नः शर्यातेस्तनयाद्रेवतोऽजनि ।
ककुद्मिप्रमुखा यस्य प्राजायन्त शतं सुताः ॥ ९ ॥
ककुद्मी रेवतीं कन्यामादाय द्रुहिणं गतः ।
क्षणोपलब्धावसरः पप्रच्छ वरमुत्सुकः ॥ १० ॥
तत्तावतैव कालेन विधिरूचे महीतले ।
चतुर्युगमतिक्रान्तं सप्तविंशतिसंमितम् ॥ ११ ॥
विरिञ्चेराज्ञया पुत्रीं नृपः शेषांशजन्मने ।
वितीर्य बलभद्राय तपसे बदरीं ययौ ॥ १२ ॥

सौकन्यं रैवतं चोपाख्यानम् ।

(४) चतुर्थे तु समावृत्तो विभक्तानग्रजान्निजान् ।
स्वदायं याचमानोऽपि नावाप नभगः सुधीः ॥ १ ॥

(१) उत्तानबर्हिः, आनर्तः, भूरिषेणः, इति त्रयः शर्यातेः पुत्राः । तत्र—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पित्रा नियुक्तोऽसौ सत्रमङ्गिरसां गतः।
कृतकर्मा सत्रशेषं वित्तमादातुमैहत ॥ २ ॥
इदं ममेति पुरुषं निषेधन्तं पितुर्गिरा।
अवेत्य रुद्रं तं स्तुत्वा ततो लभ्यमलब्ध सः ॥ ३ ॥
बभूव तनयस्तस्याऽम्बरीष इति विश्रुतः।
अवदाता यस्य कीर्तिः स्थाता कल्पान्तरेष्वपि ॥ ४ ॥
कृतार्थितार्थिनिवहे यस्मिन् राजनि शासति।
राजन्वती बभूवेयं सप्तद्वीपवती क्षितिः ॥ ५ ॥
प्रतिसद्म प्रजा यस्य पद्मनाभपदाश्रया।
देववृन्दैर्दीयमानं प्रत्याचष्ट त्रिपिष्टम् ॥ ६ ॥
कृतोपवासो द्वादश्यां पारणार्थे समुद्यतः।
स दुर्वाससमायान्तं ददर्श मुनिसत्तमम् ॥ ७ ॥
निमन्त्रितं तं तदैव नद्यां स्नातुं विनिर्गतम्।
कालातिपातशङ्की स प्रत्यैक्षत तपोधनम् ॥ ८ ॥
शिष्टाऽनुशिष्टो नृपतिश्चरमे द्वादशीक्षणे।
वारिणा पारणां कृत्वा प्रत्यैक्षिष्ट मुनीश्वरम् ॥ ९ ॥
अथ प्रत्यागतो ज्ञातवृत्तोऽमर्षात्स रोषणः।
जटाकेशं समुत्पाट्य कृत्यामुग्रामजीघटत् ॥ १० ॥
आपतन्तीं तु तां दग्ध्वा सद्यश्चक्रं सुदर्शनम्।
द्विजं दुर्वाससं क्रुद्धमद्रावयदनुद्रुतम् ॥ ११ ॥
विधिना शङ्करेणाऽपि प्रत्याख्यातः स खिन्नधीः।
उपासर्पद्भ्रष्टदर्पः श्रीनाथं जातवेपथुः ॥ १२ ॥
स्वभक्तवात्सल्यवता सता भगवताऽपि सः।
नियच्छ कोपं तं गच्छ ब्रह्मन्निति निराकृतः ॥ १३ ॥

अम्बरीषचरितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५) पञ्चमेऽलब्धशरणः सर्वकल्याणकाङ्क्षिणम् ।
जातमन्तुर्मुनिः क्षन्तुमम्बरीषमयाचत ॥ १ ॥
अथ चक्रं भगवतः स्तुत्वा श्रद्धासमृद्धधीः ।
गतमानं द्विजन्मानं सानन्दमकरोन्नृपः ॥ २ ॥
प्रशंसन्तं च तं शान्तं सन्तर्प्य स जलव्रतः ।
कृताहारः समादृत्य कृत्यवेत्ता व्यसर्जयत् ॥ ३ ॥

दुर्वासोऽनुग्रहः ।

(६) षष्ठे मनोः क्षुताज्जात इक्ष्वाकुः क्षितिपालकः ।
विकुक्षिनिमिदण्डादीनाससाद शतं सुतान् ॥ १ ॥
विकुक्षिः प्रेषितः पित्रा क्षुधितः श्राद्धकर्मणे ।
जग्धशेषमुपाहार्षीच्छशस्य पिशितं वनात् ॥ २ ॥
गुरुणा सूचितः क्ष्माप इक्ष्वाकुस्तनयं रुषा ।
शशाद ! देशान्निर्गच्छेत्यशादक्षतशासनः ॥ ३ ॥
इक्ष्वाकौ स्वर्गतेऽभ्येत्य विकुक्षिः क्षीणकल्मषः ।
रक्षन्धर्मेण धरणीं प्राप पुत्रं पुरञ्जयम् ॥ ४ ॥
स च शत्रूञ्जिगीषन्तं शक्रं साहाय्यकाङ्क्षिणम् ।
वृषरूपं समारूढो बबाधे विबुधद्विषः ॥ ५ ॥
इन्द्रवाहः ककुत्स्थश्च कर्मणा तेन सोऽभवत् ।
षोडशः पुरुषस्तस्माद्युवनाश्वो व्यजायत ॥ ६ ॥
अनपत्यतया तस्य सहदारैर्वने सतः ।
ऋषयः सदयास्तेनुरिष्टिमैन्द्रीं प्रजार्थिनः ॥ ७ ॥
ऋषिभिर्मन्त्रितं भूपः पिपासाव्याकुलो निशि ।
पत्न्या पेयं प्रमादेन पपौ पुंसवनं पयः ॥ ८ ॥

(१) पुरुषगणना तु यथा—पुरञ्जयः (इन्द्रवाहः ककुत्स्थोवा) । पृथुः । विश्वरन्धिः । चन्द्रः । युवनाश्वः । शावस्तः । बृहदश्वः । कुवलयाश्वः । दृढाश्वः । हर्यश्वः । निकुम्भः । बर्हणाश्वः । कृशाश्वः । सेनजित् । युवनाश्वः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृपकुक्षिं विनिर्भिद्य निरगच्छदुदङ्छिशुः।
सोऽभून्नाम्नैव मान्धाता मां धातेतीन्द्रधापितः ॥ ९ ॥
तत्पिता युवनाश्वश्च भिन्नकुक्षिरपि द्विजैः।
देवैश्च धर्मप्रवणधिषणः पर्यरक्ष्यत ॥ १० ॥
दशग्रीवादिकान्दस्यूँस्त्रासयन्पप्रथे पृथून्।
त्रसद्दस्युरिति श्रीमान्मान्धाता पृथिवीपतिः ॥ ११ ॥
पुरुकुत्सादयंस्तस्य जज्ञिरे तनयास्त्रयः।
कन्यका अपि पञ्चाशदासन्निःसीमसौभगाः ॥ १२ ॥
सानन्दमीनदाम्पत्यदर्शनोद्भूतमन्मथः।
सौभरिर्दारिकामेकां मान्धातारमयाचत ॥ १३ ॥
स्वयंवृतो गृहाणेति जराजीर्णकलेवरम्।
निराचिकीर्षुः प्रत्यूचे सौभरिं तमसौ नृपः ॥ १४ ॥
सिद्धिप्रभावसंभूतस्पृहणीयतराकृतिः।
अहंपूर्विकया वव्रे सर्वाभिरपि सौभरिः ॥ १५ ॥
तपःसंभृतसंभारः संसारातीतवैभवः।
चिरं ताभिरुदाराभिर्विजहार महामुनिः ॥ १६ ॥
भोगनिःसारतां जानन् स दारानुगतः सुधीः।
अगाद्विपिनवर्ती सन् प्राप्तनिर्वाणतां मुनिः ॥ १७ ॥

विकुक्षि–पुरञ्जय–युवनाश्व–मान्धातृचरितम्।

(७) सप्तमे तु हरिश्चन्द्रो मान्धातुर्नवमः पुमान्।
अनपत्यत्वसंतापादुपायाचत पाशिनम् ॥ १ ॥
तत्प्रसादात्समुत्पन्ने तनये रोहिते नृपः।
यज्ञेऽप्रवृत्तः सस्नेहो जज्ञे वितथभाषितः ॥ २ ॥

---

(१) पुरुकुत्सः, अम्बरीषः, मुचुकुन्दः, इति त्रयः। (२) अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियामित्यमरः।

(३) पुरुषगणना तु यथा—मान्धाता। पुरुकुत्सः। त्रसद्दस्युः। अनरण्यः। हर्यश्वः। अरुणः। त्रिबन्धनः। सत्यव्रतः (त्रिशंकुः)। हरिश्चन्द्रः ९। (४) उपायाचत उपयाचितवान्। समीहितसिद्धौ देवतायाः पूजनादेः संकल्प उपयाचनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजन्तं पुत्रपशुना याचमानं प्रचेतसम् ।
प्रतार्य बहुशः प्राप हरिश्चन्द्रो जलोदरम् ॥ ३ ॥
अनन्यप्रतिकारेण व्याधिना व्याकुले नृपे ।
यक्ष्यमाणे सति त्रासाद्रोहितोऽभूत्तिरोहितः ॥ ४ ॥
क्रीतपुत्रेण पशुना शुनःशेपेन पार्थिवः ।
यजमानो नीरुगासीत्सोऽपि मृत्योरमुच्यत ॥ ५ ॥

हरिश्चन्द्रचरितम् ।

(८) अष्टमे रोहितादासीन्नवमः[३] सगराभिधः ।
आसन्पुत्रा यस्य राज्ञः सुमत्यामयुतानि षट् ॥ १ ॥
यक्ष्यमाणोऽश्वमेधेन सगरः श्रद्धयान्वितः ।
धृतदीक्षोऽश्वमुत्सृज्य प्राहिणोद्रक्षणे सुतान् ॥ २ ॥
अपहृत्य स्वैरचरं तमश्वं त्रिदशाधिपः ।
ववन्ध सन्निधिं नीत्वा कपिलस्य महामुनेः ॥ ३ ॥
गवेषयन्तः सर्वे ते राजपुत्रा रसातले ।
अश्वं ददृशुरभ्याशे कपिलस्य महात्मनः ॥ ४ ॥
हयहर्ता दाम्भिकोऽयं हन्यतामिति तेऽखिलाः ।
मुनिं कदर्थयामासुर्ध्यानमीलितचक्षुषम् ॥ ५ ॥
उन्मिषत्येव कपिले रोषलेशविवर्जिते ।
सदोषा निरदह्यन्त ते तच्चाक्षुषतेजसा ॥ ६ ॥
सगरस्याऽपरश्चासीत्केशिनीगर्भजः सुतः ।
योऽभून्नाम्ना कर्मणाऽपि सङ्कभीतोऽसमञ्जसः ॥ ७ ॥
तस्य पुत्रोंऽशुमान्नाम प्रसाद्य कपिलं मुनिम् ।
अश्वमानीय विदधे सिद्धयज्ञं पितामहम् ॥ ८ ॥

सगरचरितम् ।

(३) पुरुषगणना तु यथा—रोहितः । हरितः । चम्पः । सुदेवः । विजयः । भरुकः । वृकः । बाहुकः । सगरः ९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(९) नवमे दुर्मृतान्स्वीयान्पितॄनुद्धर्तुमंशुमान् ।
चिरं प्रसादयन् गङ्गामसुभिः स्वैर्व्ययुज्यत ॥ १ ॥
दिलीपोऽथ सुतस्तस्य भजन्विष्णुपदीं नदीम् ।
असिद्धार्थः प्राप्तकालः कलेवरममुञ्चत ॥ २ ॥
भगीरथस्तत्तनयस्तपसाऽतिगरीयसा ।
निजनेत्रपथं निन्ये देवीं त्रिपथगामिनीम् ॥ ३ ॥
पूर्वजानुद्दिधीर्षन्तं सन्तं दीर्घे तपःश्रमे ।
तं भूपमनुजग्राह ग्रांहवाहा वरार्पणात् ॥ ४ ॥
चक्रे तयाऽनुगतया कृतभूरिप्रसादया ।
सगरात्मजसंकीर्णं गीर्वाणनगरं नृपः ॥ ५ ॥

भगीरथचरितम् ।

नवमः पुरुषस्तस्मात्सौदासाख्योऽजनिष्ट, यः ।
उपैक्षताऽऽखेटगतो राक्षसं निहताग्रजम् ॥ ६ ॥
स च प्रत्यपकारार्थी प्रयातस्तस्य सूदताम् ।
नरामिषं वसिष्ठाय यच्छति स्म जिघत्सवे ॥ ७ ॥
आमिषं तन्निरीक्ष्यैव परुषस्तीव्रया रुषा ।
रक्षो भवेति सौदासं शपति स्म महामुनिः ॥ ८ ॥
गुरुं प्रतिशपन्तं च महिषी विदुषी सती ।
अर्णःपूर्णाञ्जलिमिमं मदयन्ती न्यवारयत् ॥ ९ ॥
अनुरुन्धन्वचस्तस्याः पश्यञ्जीवमयं जगत् ।
संहारकारि तद्वारि जहौ स्वपदयोर्नृपः ॥ १० ॥
तेनैव मित्रसहतां तथा कल्माषपादताम् ।
अजातपातकः प्राप क्ष्मापः शापनिशाचरः ॥ ११ ॥

---

(१) ग्राहवाहा गङ्गा । (२) पुरुषगणना यथा—भगीरथः । श्रुतः । नाभः । सिन्धुद्वीपः । अयुतायुः । ऋतुपर्णः । सर्वकामः । सुदासः । सौदासः ॥ ९ ॥

(३) अर्णसा जलेन पूर्णः अञ्जलिर्यस्य । अम्भोऽर्णस्तोयपानीयमित्याद्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसिष्ठशापविवशो ऽमन्द्वादश वत्सरान् ।
रतासक्तब्रह्मबधात् स लेभे रतमृत्युताम् ॥ १२ ॥
निषिद्धो द्वादशाब्दान्ते रिरंसुः प्रिययैव सः ।
नियुक्तात्स्वगुरोर्लेभे क्षेत्रजं पुत्रमश्मकम् ॥ १३ ॥

सौदासचरितम्।

अश्मकात्पुरुषः षष्ठः खट्वाङ्गः प्रबभूव यः ।
वज्रिणा प्रार्थितोऽजैषीदजय्यान्निर्जरद्विषः ॥ १४ ॥
मुहूर्तशेषायुरसौ प्रत्यावृत्य पुरं प्रति ।
संपाद्य चित्तवैमल्यं कैवल्यं प्राप धीरधीः ॥ १५ ॥

खट्वाङ्गचरितम्।

(१०) दशमे दशदिग्जेता खट्वाङ्गात्पञ्चमः[२] पुमान् ।
आसीद्दशरथो नाम पुण्यकीर्तिर्नराधिपः ॥ १ ॥
श्रुतिगीतगुणग्रामः श्रीरामः पुत्रतां गतः ।
जगन्मङ्गलकृच्चक्रे यदुत्सङ्गं विभूषितम् ॥ २ ॥
विश्वामित्राऽध्वरध्वंसिखलसंहारकारकः ।
दुर्धरोग्रधनुर्भङ्गसीताचित्तापहारकः ॥ ३ ॥
क्षत्रक्षयकरक्षुभ्यन्मुनिगर्वनिवारकः ।
लोकातीतगुणग्रामप्रजाप्रेमप्रसारकः ॥ ४ ॥
प्राज्यवैभवविभ्राजिसाम्राज्यपरिहारकः ।
मुनिवेषोररीकारपितृभक्तिप्रचारकः ॥ ५ ॥
हरिणायितमारीचमायामुषितदारकः ।
मित्रसुग्रीवविग्राहिबालिवीरेन्द्रमारकः ॥ ६ ॥
वानरव्यूहरचितसेतुसंप्राप्तपारकः ।
सेनानिनादसातङ्कलङ्काप्रान्तविहारकः ॥ ७ ॥

दशरथः।

---

(१) पुरुषगणना यथा–अश्मकः। मूलकः। दशरथः। ऐडविडः। विश्वसहः। खट्वाङ्गः ॥ ६ ॥ (२) पुरुषगणना यथा–खट्वाङ्गः। दीर्घबाहुः। रघुः। अजः। दशरथः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



दशाननकदर्थित-त्रिदशनाथ-निर्विण्णता-
तमिस्रतति-हारक-प्रबल-दोःप्रतापानलः ।
फणोन्नमनमोदितोरगपति-प्रणीतस्तुति-
र्भजद्वृजिनभञ्जनो जयति जानकीशो हरिः ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गर्जत्कर्बुरवीराग्र्यदीर्घदोर्दर्पदारकः ।
दुर्धर्षतरसामर्षरावणप्राणहारकः ॥ ८ ॥
सीतासंप्राप्तिसानन्दकीशवृन्दोपकारकः ।
राज्याङ्गीकारमुदितसमस्तपरिवारकः ॥ ९ ॥
विष्टपत्रितयश्लाघापात्रसौभ्रात्रधारकः ।
वैदेहीं रञ्जयन् रेमे रामः संसारतारकः ॥ १० ॥

श्रीरामपूर्वचरितम् ।

(११) एकादशे महायज्ञे संपदो विनियोजनम् ।
लोकापवादसंत्रासात्स्वदारपरिवर्जनम् ॥ १ ॥
असह्यविरहक्लेशसहनव्रतधारणम् ।
कर्मणाऽभ्यर्हणीयेन प्रजावर्गानुरञ्जनम् ॥ २ ॥
पौरैः सह भ्रातृभिश्च निजलोकाधिरोहणम् ।
वर्णितं रामचन्द्रस्य चरितं पुण्यवर्धनम् ॥ ३ ॥

श्रीरामोत्तरचरितम् ।

(१२) द्वादशे रामपुत्रस्य कुशस्याऽन्वयसंभवाः ।
अंतीताऽनागता नाम्ना राजानः परिकीर्तिताः ॥ १ ॥
(१३) त्रयोदशे यक्ष्यमाणो निमिरैक्ष्वाकवो नृपः ।
पुरुहूताऽऽमन्त्रितेन वसिष्ठेन न्यवार्यत ॥ १ ॥

---

(१) कुशः । अतिथिः । निषधः । नभः । पुण्डरीकः । क्षेमधन्वा । देवानीकः । अनीहः । पारियात्रः । बलस्थलः । वज्रनाभः । अर्कसंभवः । खगणः । विधृतिः । हिरण्यनाभः । पुष्यः । ध्रुवसन्धिः । सुदर्शनः । अग्निवर्णः । शीघ्रः । मरुः । प्रसुश्रुतः । सन्धिः । अमर्षणः । महस्वान् । विश्वसाह्वः । प्रसेनजित् । तक्षकः । बृहद्बलः ॥२९॥ एते परीक्षित्कालात्प्राक्तनाः । बृहद्रणः । उरुक्रियः । वत्सवृद्धः । प्रतिव्योमः । भानुः । दिवाकः । वाहिनीपतिः । सहदेवः । बृहदश्वः । भानुमान् । प्रतीकाश्वः । सुप्रतीकः । मरुदेवः । सुनक्षत्रः । पुष्करः । अन्तरिक्षः । सुतपाः । अमित्रजित् । बृहद्राजः । बर्हिः । कृतञ्जयः । रणञ्जयः । संजयः । शाक्यः । शुद्धोदः । लाङ्गलः । प्रसेनजित् । क्षुद्रकः । रणकः । सुरथः । सुमित्रः ॥ ३१ ॥ एतेऽर्वाञ्चः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वक्षणिकताभीतो द्विजैरन्यैः कृतक्रतुः ।
प्रत्यागतगुरोः शापात् सोऽभूत्पतितविग्रहः ॥ २ ॥

एतस्य प्रतिशापाच्च वसिष्ठस्त्यक्तविग्रहः ।
मित्रावरुणयोर्जज्ञे रेतसा कुम्भगामिना ॥ ३ ॥

देववृन्दैर्दीयमानमगृह्णन्नश्वरं वपुः ।
निमिर्निमेषरूपेण प्राणिपक्ष्मस्ववर्तत ॥ ४ ॥

तद्देहान्मथिताज्जज्ञे मिथिलो नाम पार्थिवः ।
विश्रुता येन नगरी मिथिला निरमीयत ॥५ ॥

नाम्ना सीरध्वजस्तस्मादेकविंशः पुमानभूत् ।
यद्यज्ञभूमिभूः सीता श्रीरामसहधर्मिणी ॥ ६ ॥

निमिकथा ।

(१४) चतुर्दशे गुरोः पत्नीं तारां तारुण्यदीपिताम् ।
हृत्वाऽनुयाच्यमानोऽपि न प्रायच्छन्निशापतिः ॥ १ ॥

अन्वियाय गुरुं शम्भुर्देवैरिन्द्रादिभिर्वृतः ।
स्वशिष्यवर्गसहितः शुक्रः शशिनमन्वगात् ॥ २ ॥

निष्पन्नक्रोधसन्नद्धसुरासुरगणक्षयः ।
चिररात्राय ववृते समरस्तारकामयः ॥ ३ ॥

चराचरैकगुरुणा सर्वसंहारभीरुणा ।
ब्रह्मणा भर्त्सितस्तारां प्रायच्छद्गुरवे शशी ॥ ४ ॥

परित्याजितगर्भायास्तारायाः शोभने सुते ।
स्पृहावतोः समभवत्कलहः पुनरेतयोः ॥ ५ ॥

---

(१) पुरुषगणना यथा—मिथिलः । उदावसुः । नन्दिवर्धनः । सुकेतुः । देवरातः । बृहद्रथः । महावीर्यः । सुधृतिः । धृष्टकेतुः । हर्यश्वः । मरुः । प्रतीकः । कृतिरथः । देवमीढः । विसृतः । महाधृतिः । कृतिरातः । महारोमा । स्वर्णरोमा । ह्रस्वरोमा । सीरध्वजः २१ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रहःपृष्टा सती तारा सोमस्येत्यवदत्सुतम्।
जग्राह सोमः प्रीतस्तं पप्रथे स बुधाख्यया ॥ ६ ॥

ताराचरितम्।

तस्मादिलायामभवत्पूर्वोक्तायां पुरूरवाः।
स चन्द्रवंशराजन्यमूलपूरुषतां ययौ ॥ ७ ॥
स चोर्वश्यां समासक्तो विहरन्वत्सरान् बहून्।
तस्यां स्वः प्रतियातायां कामाद्विक्षिप्ततां ययौ ॥ ८ ॥
परिभ्रमन् कुरुक्षेत्रे पश्यँस्तां विलपन्बहु।
तदुक्तकर्मणा प्राप लोकमाप्सरसं नृपः ॥ ९ ॥
आयुः श्रुतायुः सत्यायू रयो विजयको जयः।
उर्वश्यामिति षट् पुत्रा आसँस्तस्य महीपतेः ॥ १० ॥

पुरूरवश्चरितम्।

(१५) इहैलपुत्राद्विजयाज्जन्हुर्ना[1] पंञ्चमोऽभवत्।
पपे विष्णुपदी येन भगीरथरथानुगा ॥ १ ॥
गाधिश्च जन्हुराजर्षेः सप्तमः[2] पुरुषोऽजनि।
विश्वामित्रो यस्य पुत्रस्तपसा विप्रतां ययौ ॥ २ ॥
गाधिपुत्र्यां सत्यवत्यामृचीकाख्यात्तपोधनात्।
जमदग्निरिति ख्यातः शमशीलोऽभवन्मुनिः ॥ ३ ॥
चत्वारस्तनयास्तस्य रेणुकायां महात्मनः।
जज्ञिरे चरमस्तेषां रामः परशुधारकः ॥ ४ ॥
कामदोग्ध्रीं मुनेस्तस्य धेनुं भुजमदोद्धतः।
हृतवान् हैहयाधीशो रामेण सरुषा हतः ॥ ५ ॥

जामदग्न्यकथा।

(१६) षोडशे तीर्थयात्रार्थी राजहत्यापनुत्तये।
गतोऽब्दान्ते जामदग्न्यः प्रत्यागच्छत्स्वमाश्रमम् ॥ १ ॥

---

(१) पुरुषगणना यथा—विजय (क): । भीमः। काञ्चनः । होत्रकः। जन्हुः। ५। (२) जन्हुः। पूरुः। बलाकः। अजकः। कुशः। कुशाम्बुः। गाधिः।७।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचिद्रेणुका तोयमानेष्यन्ती नदीं गता ।
क्षणं विहारं गान्धर्वं वीक्षमाणा व्यलम्बत ॥ २ ॥
जातापराधां तां हन्तुमादिष्टा जमदग्निना ।
ज्यायांसो नान्वमोदन्त जननीकण्ठकर्तनम् ॥ ३ ॥
एतान् समातृकान् भ्रातॄञ्जहीति जनकोदितः ।
रामः प्रभावं जानानस्ताञ्जघान कृतत्वरः ॥ ४ ॥
ततः प्रसन्नतां याते वरं ताते प्रदित्सति ।
वव्रे संजीवनं तेषां हननाऽस्मरणं च सः ॥ ५ ॥
उज्जीवितेषु सर्वेषु शममात्रपरायणः ।
तस्थौ सुखेन स्थविरो जमदग्निर्महातपाः ॥ ६ ॥
वनगे साग्रजे रामे ध्यानमीलितचक्षुषः ।
जमदग्नेः शिरश्छित्त्वा निर्ययिरे कार्तवीर्यजाः ॥ ७ ॥
दृष्टाकर्णितवृत्तान्तः कृतान्त इव भार्गवः ।
त्रिःसप्तकृत्वः क्षत्राणां प्रतिजज्ञे परिक्षयम् ॥ ८ ॥
अन्तं विधाय क्षत्राणां तदीयरुधिरैर्नव ।
स्यमन्तपञ्चके चक्रे ह्रदान्भार्गवपुङ्गवः ॥ ९ ॥
मखानाहृत्य धरणीं ब्राह्मणेभ्यो विभज्य सः ।
अपास्तदुरितोऽध्यास्त महेन्द्रधरणीधरम् ॥ १० ॥

जामदग्न्यावदानम् ।

(१७) आयोः पञ्चसु पुत्रेषु ख्यातेषु नहुषादिषु ।
क्षत्रवृद्धो रजी रम्भोऽनेनाश्चात्र प्रकीर्तितः ॥ १ ॥
क्षत्रवृद्धान्वयोद्भूताच्चतुर्थाच्छुनकात्परम् ।
शौनकाद्यं विप्रतया पृथिव्यां पप्रथे कुलम् ॥ २ ॥

(१) पुरूरवःपुत्रस्यायोः—नहुष—क्षत्रवृद्ध—रजि—रम्भा—ऽनेनसः पञ्च पुत्राः । तत्र—
(२) पुरुषगणना यथा—क्षत्रवृद्धः । सुहोत्रः । गृत्समदः । शुनकः ४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षत्रवृद्धादेव तस्मात्संभ्रमः पुरुषोऽभवत् ।
धन्वन्तरिः काशिपतिर्वैद्यविद्याविदग्रणीः ॥ ३ ॥
धुर्यः सतां दिवोदासस्तुर्यस्तस्मादजायत ।
अर्कोपमस्तृतीयोऽस्मादलर्कोऽभून्नरेश्वरः ॥ ४ ॥
कदर्थितान्दैत्यवीरैर्दयार्हान्निर्जरान् रजिः ।
पुत्रीकृत्य त्रायते स्म प्राणत्राणप्रियंवदान् ॥ ५ ॥
सहस्रार्धमिताः [५००] पुत्रा रजेस्तस्य महात्मनः ।
आच्छिन्दन्तो बलात्स्वर्गं पुरुहूतेन घातिताः ॥ ६ ॥
कुलं तु रम्भराजर्षेस्तृतीयादक्रियात्परम् ।
तपःशान्त्यादिरूपेण ब्राह्मण्यं कर्मणा ययौ ॥ ७ ॥
अनेनसस्तु पुरुषः षष्ठः शान्तरयोऽभवत् ।
अजातापत्य एवायं प्राप्तनिर्वाणतां ययौ ॥ ८ ॥

क्षत्रवृद्धादिकथा ।

(१८) अष्टादशे तु नहुषादैलपुत्रात् षडात्मजाः ।
यतिप्रभृतयोऽभूवन्ययातिस्तत्र विश्रुतः ॥ १ ॥
ययातिर्यावतस्तेने धर्मान्दानाऽध्वरादिकान् ।
न याति क्षमतां जन्तुः संख्यातुमपि तावतः ॥ २ ॥
स भार्गवीं देवयानीं कूपान्तःपातितां सतीम् ।
कचशप्तामुदवहद्दास्या शर्मिष्ठाऽन्वितताम् ॥ ३ ॥
देवयानी प्रसुषुवे तनयौ यदुतुर्वसू ।
द्रुह्युं चाऽनुं च पूरुं च शर्मिष्ठाऽसूत बिभ्यती ॥ ४ ॥

---

(१) पुरुषगणना यथा—क्षत्रवृद्धः । सुहोत्रः । काश्यः । काशिः । राष्ट्रः । दीर्घतमाः । धन्वन्तरिः ७ ॥ (२) पुरुषगणना यथा—धन्वन्तरिः । केतुमान् । भीमरथः । दिवोदासः ४ ॥ (३) पुरुषगणना यथा—दिवोदासः । द्युमान् । अलर्कः ३ ॥(४) पुरुषगणना यथा—रम्भः । रभसः । अक्रियः ३ ।(५) पुरुषगणना यथा—अनेनाः । शुद्धः । शुचिः । त्रिककुद् । धर्मसारथिः । शान्तरयः ६ । (६) यतिः, ययातिः, संयातिः, आयतिः, वियतिः, कृतिः । इति नाहुषाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शर्मिष्ठाप्रसवक्रुद्धदेवयानीप्रकोपितः ।
कविर्जामातरं चक्रे सद्यः शापाज्जरातुरम् ॥ ५ ॥
ययातिनाऽनुनीतः स वयोविनिमयं वरम् ।
वितीर्णवान् यथाकामं कथातीततपोबलः ॥ ६ ॥
अनाश्रवेष्वग्रजेषु पूरुः पूरुषकेसरी ।
साकं पितृप्रसादेन कनीयानग्रहीज्जराम् ॥ ७ ॥
ययातिः प्राप्ततारुण्यः पालयन् धर्मतो धराम् ।
यथामनीषितं प्राप्तान् विषयाञ्जुजुषेतराम् ॥ ८ ॥

ययातिचरितम् ।

(१९) ऊनविंशे तु निर्विण्णो ययातिः कविकन्यकाम् ।
अजामिव ब्रुवन्प्राप्तनिर्वेदामतनोन्नृपः ॥ १ ॥
अहो ! प्रतिक्षणप्राज्यं कामाग्निं देवि ! दुर्मतिः ।
वर्षन् विषयवर्गाज्यं शमं जन्तुर्निनीषति ॥ २ ॥
चरेदिति समुत्सृष्टा देवि ! वत्सतरीव नः ।
अप्राप्तमेव वाञ्छन्ती मतिर्नैवाऽवतिष्ठते ॥ ३ ॥
महिषि ! स्वहितं लब्धुं सर्वदैव समुत्सुकाः ।
ननु ! नीरागतां गङ्गां श्रद्दधानाः श्रयेमहि ॥ ४ ॥
वाचयन्तीमवाच्यानि पातयन्तीं तनूभृतः ।
कारयन्तीं कुकर्माणि धिगाशां मदिरामिव ॥ ५ ॥
अचेतनं सेवमानैः शोचद्भिर्जन्तुभिर्वृताम् ।
दीपिताशामिमामाशां धिक् श्मशानमहीमिव ॥ ६ ॥
वन्ध्या दुर्दमवेगेयं तृष्णावारविलासिनी ।
अहो ! दण्डेन चरतो जरतोऽपि न मुञ्चति ॥ ७ ॥
वैषम्यदूषिताधियां तापं दत्ते यथा दवः ।
अनुष्णाशीततां धत्ते तृष्णात्यागवतां भवः ॥ ८ ॥

(१) वचने स्थित आश्रव इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपातमात्रमधुरा हन्त ! कामाङ्कुरा इमे ।
रुन्धन्ति प्रसरन्तीं नश्चिद्वल्लीं चित्तगोचराः ॥ ९ ॥
प्रबोधरत्नकीटाय विपुलाऽपायकारिणे ।
अविरामाय कामाय कुर्वीमहि मुहुर्नमः ॥ १० ॥
न नाम विषयग्रामः कल्पते कामपूर्तये ।
याम द्वन्द्वजतापार्ताः श्रयाम शिशिरं वनम् ॥ ११ ॥
इत्याद्युद्दीर्य शान्तात्मा प्रत्यादाय निजं वयः ।
ददौ ययातिः साम्राज्यं पूरवेऽपि कनीयसे ॥ १२ ॥
दिक्प्रान्तपालकान् कृत्वा स पुत्रानितरानपि ।
गृहाद्वनं वनाद्बोधं बोधात् केवलतां ययौ ॥ १३ ॥

ययातिनिर्वेदः ।

(२०) विंशे ययातेस्तनयात्पूर्ववर्णितसद्गुणात् ।
अभवत्पूरुराजर्षे रन्तिभारस्त्रयोदशः[1] ॥ १ ॥
रन्तिभारस्य नृपतेस्तनयाच्च कनीयसः ।
नाम्नाऽप्रतिरथादासीत्कण्वनामा महामुनिः ॥ २ ॥
रन्तिभारस्य तनयाज्ज्यायसः सुमतेरपि ।
दुष्यन्तनामा पुरुषस्तृतीयो[2]ऽभून्नराधिपः ॥ ३ ॥
गाधिसूनोर्मेनकायामुत्पन्ना कण्वपालिता ।
गान्धर्वविधिना तेन परिणिन्ये शकुन्तला ॥ ४ ॥
विश्वविश्रुतवृत्तायां श्रुतशौर्यादिशालिनः ।
तस्याममुष्मात्प्रख्यातो राजर्षिर्भरतोऽजनि ॥ ५ ॥
स त्रयस्त्रिंशदधिकं वाजिमेधशतं व्यधात् ।
[3]बद्वं बद्वं यत्र गवां सहस्रं भेजिरे द्विजाः ॥ ६ ॥

---

(१) पुरुषगणना यथा—पूरुः । जन्मेजयः । प्रचिन्वान् । प्रवीरः । नमस्युः । चारुपदः । सुद्युः । बहुगवः । संयातिः । अहंयातिः । रौद्राश्वः। ऋतेयुः । रन्तिभारः१३॥

(२) पुरुषगणना यथा—सुमतिः । रैभ्यः । दुष्यन्तः ॥ ३ ॥

(३) बद्वसंख्या तु—" चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः । बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश " इत्युक्ता १३०८४ भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुण्ये कर्मणि निष्णातो म[1]ण्णारे भरतो नृपः ।
विततार गजेन्द्राणां नियुतानि चतुर्दश ॥ ७ ॥
न म[2]नोजवसा एत इति तेन समीरिते ।
महिष्यस्तनयान्स्वीयाञ्जघ्नुः स्वत्यागकातराः ॥ ८ ॥
मरुत्स्तोमेन मरुतस्तुष्टास्तस्मै महीभृते ।
अ[3]पविद्धं सुतं नाम्ना भरद्वाजं ददुर्द्विजम् ॥ ९ ॥
अन्वये वितथे पा[4]रस्त्रैणेयस्तनयो गुरोः ।
दत्तः सोऽयं भरद्वाजः पप्रथे वितथाभिधः ॥ १० ॥

शाकुन्तलेयचरितम् ।

(२१) एकविंशेऽभवत्तस्माद्वितथात्प[5]ञ्चमः पुमान् ।
रन्तिदेव इति ख्यातो दानशौण्डशिरोमणिः ॥ १ ॥
सम्राडुन्मुक्तहस्तः सन्परदैन्यं निवारयन् ।
अकिञ्चनत्वमापन्नः सुकृतं चिनुते स्म सः ॥ २ ॥
एतस्य सकुटुम्बस्य निरन्नस्य निरम्भसः ।
व्यतीयुः क्षीणकायस्य गजवेद[४८]मिताः क्षपाः ॥ ३ ॥
घृतपायससंयावं सवार्युपनतं स्वतः ।
परेऽह्नि भोक्ष्यमाणेऽस्मिन्नुपतस्थे द्विजोऽतिथिः ॥ ४ ॥
तस्मिन्नुत्तिष्ठति प्रीते भूभुजा भोजिते द्विजे ।
अभ्याजगाम वृषलः क्षुधाक्षामः समक्षतः ॥ ५ ॥
तं भोजयित्वा भूपाले भोक्तुकामे बुभुक्षितः ।
श्वभिः सार्धं कृशतनुर्वृषलोऽन्यः समाययौ ॥ ६ ॥
अवशिष्टं भोज्यमस्मै प्रदाय सगणाय सः ।
पानीयं पातुमारेभे यथाभागमुदारधीः ॥ ७ ॥

---

(१) मण्णारनामनि वैधे कर्मणि. केचित्तीर्थविशेषे इत्याहुः । (२) मनोजवसः पितृसन्निभ इत्यमरः । (३) मातापितृभ्यां संत्यक्तमपविद्धं सुतं विदुः । (४) पारस्त्रैणेयः परस्त्रीजातः पुत्रः । पारस्त्रैणेयस्तु परस्त्रिया इत्यमरः । (५) पुरुषगणना यथा- वितथः । मन्युः । नरः । संकृतिः । रन्तिदेवः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तावदेवागतः प्राह पुल्कसः श्रमकम्पितः ।
पितः ! प्रयच्छ मे तोयं गच्छतो रुन्ध्यसूनिति ॥ ८ ॥
कण्ठप्रान्तलुठत्प्राणस्तस्योत्कण्ठां प्रपूरयन् ।
ददौ तोयं मुदा सोऽयं दयामृतमयाशयः ॥ ९ ॥
ब्रह्मादयस्त्रयो देवास्ततस्तत्सत्त्वविस्मिताः ।
इष्टं याचेत्यवोचन्त स नायाचिष्ट किंचन ॥ १० ॥
चिरेण करुणाप्राणः प्राणन् प्राप्य स मुक्तताम् ।
पृथ्वीं सनाथयाश्चक्रे चक्रवर्तिसमर्चितः ॥ ११ ॥
यशोमयेन वपुषा शाश्वतेन नरेश्वरः ।
रन्तिदेवः प्रेमवन्ति जगन्ति व्याप्य जीवति ! ॥ १२ ॥

रन्तिदेवचरितम् ।

(२२) द्वाविंशे तु दिवोदासाद[1]ष्टमो द्रुपदः पुमान् ।
धृष्टद्युम्नो द्रौपदी च यस्याऽऽसीद्विश्वविश्रुतिः ॥ १ ॥
हस्ती च वितथादासीच्च[2]तुर्थो लोकसंमतः ।
येन राजर्षिणा ख्यातं निर्ममे हास्तिनं पुरम् ॥ २ ॥
अजमीढात्तस्य पुत्राच्च[3]तुर्थोऽभून्नृपः कुरुः ।
अभवत्कुरुराजर्षेः पुमान् [4]षष्ठो बृहद्रथः ॥ ३ ॥
बृहद्रथाज्जरासन्धः कुशाग्राद्याश्च जज्ञिरे ।
कुरुपुत्राज्जन्हुनृपाद्देवापिर्द्वा[5]दशोऽभवत् ॥ ४ ॥
यस्यानुजः शन्तनुश्च बाह्लीकश्चोदपद्यत ।

---

(१) पुरुषगणना यथा—दिवोदासः । मित्रायुः । च्यवनः । सुदासः । सहदेवः । सोमकः । पृषतः । द्रुपदः ८ ॥ (२) पुरुषगणना यथा—वितथः । मन्युः ॥ बृहत्क्षत्रः । हस्ती ४ ॥ (३) हस्ती । अजमीढः । ऋक्षः । संवरणः । कुरुः ४ ॥ (४) कुरुः । सुधन्वा । च्यवनः । कृती । वसुः (उपरिचरः) । बृहद्रथः ६ । (५) कुरुः । जन्हुः । विदूरथः । सार्वभौमः । जयसेनः । राधिकः । अयुतः । क्रोधनः । देवातिथिः । ऋष्यः । दिलीपः । प्रतीपः । देवापिः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शन्तनोर्नृपतेर्भीष्मो गङ्गायामुदपद्यत ॥ ५ ॥
विचित्रवीर्यश्च ततः सत्यवत्यामजायत ।
प्रतिश्रुतब्रह्मचर्यो भीष्म आसीदसन्ततिः ॥ ६ ॥
विचित्रवीर्यो नृपतिः परिणिन्ये बलाऽऽहृताम् ।
अम्बालिकामम्बिकां च सह काशीपतेः सुताम् ॥ ७ ॥
विपन्ने यक्ष्मणा तस्मिँस्तत्क्षेत्रे जननीगिरा ।
धृतराष्ट्रं च पाण्डुं चाऽजनयज्जनको मम ॥ ८ ॥
धृतराष्ट्रस्य तनयाः शतं दुर्योधनादिकाः ।
युधिष्ठिराद्याः पञ्चाऽऽसन् पुत्राः पाण्डुमहीपतेः ॥ ९ ॥
राजन् ! परर्द्धिलुब्धेषु कुरुषु त्यक्तवर्त्मसु ।
वीराः साहंसाहमन्ते चुकुपुः पाण्डुनन्दनाः ॥ १० ॥
आसीत् प्रचण्डदोर्दण्डक्षत्रियक्षयकारकः ।
पाण्डूनां च कुरूणां च रणः क्ष्माभारहारकः ॥ ११ ॥
महासमरविच्छिन्ने कुलेऽस्मिन्विश्वविश्रुते ।
भवानेव हरित्रातः प्रयातः कुलतन्तुताम् ॥ १२ ॥
इति सोमान्वयभवान्काँश्चित्प्रथितपौरुषान् ।
भूपतीन् वर्णयामास व्यासस्नुर्महामुनिः ॥ १३ ॥

सोमवंशवृत्तम् ।

(२३) त्रयोविंशे तनूजस्य ययातेरुक्तकर्म्मणः ।
द्रुह्योरनोस्तुर्वसोश्च वंशः समनुवर्णितः ॥ १ ॥
द्रुह्योः प्रचेता नवमः पुमानासीद्यदात्मजाः ।
औदीच्यम्लेच्छजातीनां नायकत्वं प्रपेदिरे ॥ २ ॥

(१) वारंवारं सोढ्वा ।

(२) पुरुषगणना यथा–द्रुह्युः । बभ्रुः । सेतुः । आरब्धः । गान्धारः । धर्मः । घृतः । दुर्मदः । प्रचेताः ९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनोस्त्रयोदंशा आसन्नङ्गवङ्गमुखाश्च षट् ।
तत्तद्देशाधिपतयो राजानः ख्यातविक्रमाः ॥ ३ ॥
अङ्गतः पञ्चमो जज्ञे रोमपादो महीपतिः ।
लोमपादादधिरथो बभूवैकादशः पुमान् ॥ ४ ॥
पोष्यपुत्रस्तस्य चाऽभूत्कुन्त्याः कानीन आत्मजः ।
दान-युद्ध-महावीरः कर्णः प्रथितपौरुषः ॥ ५ ॥
तुर्वसोः सप्तमो जज्ञे मरुतो नाम पार्थिवः ।
योऽनपत्यतया चक्रे दुष्यन्तं पौरवं सुतम् ॥ ६ ॥
ययातिपुत्राच्च यदोर्हैहयोऽभूच्चतुर्थकः ।
तस्मादेकादशो जज्ञे कार्तवीर्यो नरेश्वरः ॥ ७ ॥
तस्मान्मधुस्ततो वृष्णिर्वंशविख्यातनामकः ।
यद्वंश्या किल कथ्यन्ते माधवा वृष्णयस्तथा ॥ ८ ॥
द्वितीयस्माद्यदोः पुत्रात् क्रोष्टुः स्त्रीविजितान्तरः ।
एकादंशो ज्यामघोऽभूद् विदर्भस्तस्य चात्मजः ॥ ९ ॥

द्रुह्युप्रभृतिवंशवृत्तम् ।

---

(१) अनुः । सभानरः । कालनरः । संजयः । जनमेजयः । महाशीलः । महामनाः । तितिक्षुः । रुशद्रथः । हेमः । सतपाः । बलिः । अङ्ग-वङ्ग-कलिङ्ग-सुह्म-पुण्ड्र-आन्ध्राः १३ । (२) अङ्गः । खनपानः । दिविरथः । धर्मरथः । चित्ररथः । (अयमेव लोमपादः रोमपादश्च ६)। (३) लोमपादः । चतुरङ्गः । पृथुलाक्षः । बृहद्रथः । बृहन्मनाः । जयद्रथः । विजयः । धृतिः । धृतव्रतः । सत्यकर्मा । रथः । (अयमेव अधिरथश्च, कर्मणा सारथिश्च ११)।

(४) पुरुषगणना यथा—तुर्वसुः । वह्निः । भर्गः । भानुमान् । त्रिभानुः । करन्धमः । मरुतः ७ । (५) यदुः । सहस्रजित् । शतजित् । हैहयः ४ । (६) हैहयः । धर्म । नेत्रः । कुन्तिः । सोहञ्जिः । महिष्मान् । भद्रसेनकः । दुर्मदः । धनकः । कृतवीर्यः । कार्तवीर्यः ११ । (७) क्रोष्टुः (यदुपुत्रः) । वृजिनवान् । स्वाहिः । रुशेकुः । चित्ररथः । शशबिन्दुः । पृथुश्रवाः । धर्मः । उशनाः । रुचकः । ज्यामघः ११ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२४) विदर्भजाश्चतुर्विंशे रोमपादक्रथादयः ।
सान्वयाः परिकीर्त्यन्ते विश्वविश्रुतकीर्तयः ॥ १ ॥
रोमपादात्पंश्चमोऽभूच्चेदिश्चैद्यस्तदात्मजः ।
क्रथाद्विंशेः सात्वतोऽभूत्पुमान्पौरुषविश्रुतः ॥ २ ॥
देवावृधः सात्वताच्च, तस्माद्बभ्रुरजायत ।
सात्वतस्यैव पुत्राच्च वृष्णिनाम्नः सुविश्रुतात्–॥ ३ ॥
जज्ञे युधाजिन्नृपतिस्तत्पौत्रः शिनिरुच्यते ।
तत्पौत्रः सात्यकिर्नाम वीरवर्गशिरोमणिः ॥ ४ ॥
शिनिपुत्राद्वृष्णिनाम्नः श्वफल्कोऽपि व्यजायत ।
तस्मादक्रूर उदभूद्भगवद्भक्तिसंभृतः ॥ ५ ॥
युधाजितोऽपरात्पुत्रादनमित्राच्च विश्रुतः ।
निघ्ननामाऽभवद्भूपस्तस्मात्सत्राजितोऽभवत् ॥ ६ ॥
अन्धकात्सात्वतसुतादन्यस्मात्कुकुरोऽजनि ।
कुकुरादुग्रसेनश्च बभूवैकादशः पुमान् ॥ ७ ॥
यस्य पुत्रेषु कंसोऽभूत्कुलपांसनतां गतः ।
उग्रसेनाग्रजस्याऽऽसन्देवकीप्रमुखाः सुताः ॥ ८ ॥
वृष्णेः सुताच्चित्ररथात् श्वफल्कस्यानुजादपि ।
विदूरथोऽभूत्तस्माच्च देवमीढो व्यजायत ॥ ९ ॥
देवमीढाच्छूर आसीद्वसुदेवस्तदात्मजः ।
भ्रातरो वसुदेवस्य देवभागादयो नव ॥ १० ॥

---

(१) पुरुषगणना यथा—रोमपादः । बभ्रुः । कृतिः । उशिकः । चेदिः ॥ ५ ॥
(२) क्रथः । कुन्तिः । घृष्टिः । निर्वृतिः । दशार्हः । व्योमः । जीमूतः । विकृतिः । भीमरथः । नवरथः । दशरथः । शकुनिः । करम्भिः । देवरातः । देवक्षत्रः । कुरुवशः । अद्रुः । पुरुहोत्रः । आयुः । सात्वतः ॥ २० ॥
(३) कुकुरः । वह्निः । विलोमा । कपोतरोमा । अद्रुः । अन्धकः । दुन्दुभिः । अरिद्योतः । पुनर्वसुः । आहुकः । उग्रसेनः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहस्रशाखतां प्राप्ते कुलेऽस्मिन्विश्वविश्रुते ।
संकर्षणो हि रोहिण्यां वसुदेवादजायत ॥ ११ ॥
संकर्षणानुजा राजन् ! धनञ्जयकुटुम्बिनी ।
उदपद्यत रोहिण्यां सुभद्रा त्वत्पितामही ॥ १२ ॥
भूमेर्भारं निराकर्तुं समुद्धर्तुं सतो जनान् ।
आविर्बभूव देवक्यां देवैरभ्यर्थितो हरिः ॥ १३ ॥

यदुवंशसंक्षेपः ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
सभक्ति नवमः स्कन्धः समक्षेपि यथामति ॥ ९ ॥

॥ पद्यसंकलनाङ्काः २१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः १० पूर्वार्धः)

दुर्वृत्तवृन्ददमनं वृन्दावनविहारिणम् ।
देवकीदारकाकारं देवं हृदि दधीमहि ॥ १० ॥

अथातो दशमः स्कन्धः पार्थमित्रकथामयः ।
कंसादिकोदग्रबलखलनिग्रहसंश्रयः ॥ १ ॥
(१) आद्ये स्वमरणं गर्भाद्देवक्या अष्टमाद्विदन् ।
व्योमवाक्प्रत्ययात्कंसस्तां हन्तुं खड्गमाददे ॥ २ ॥
अपि प्रबोध्यमानं तं दुराग्रहपरायणम् ।
प्रतिपुत्रार्पणपणाद्वसुदेवो न्यवारयत् ॥ ३ ॥
अर्पितं वसुदेवेन वीक्ष्य प्रथमजं सुतम् ।
उत्ससर्ज स दुष्टोऽपि सत्यतुष्टः सजीवितम् ॥ ४ ॥
महर्षेर्नारदाज्ज्ञात्वा वसुदेवात्मजं हरिम् ।
यदून् देवानौग्रसेनिरुग्रभावं बभार सः ॥ ५ ॥
जातं जातं भागिनेयं निघ्नँस्तातं समातरम् ।
सभर्तृकां च भगिनीं निजग्राह दुराग्रहः ॥ ६ ॥

कृष्णावतारोपक्रमः ।

(२) द्वितीये दुर्जयैर्दुष्टैर्निसृष्टैरौग्रसेनिना ।
उपद्रुतेषु यदुषु विद्रुतेषु दिशो दश—॥ १ ॥
देवक्याः सप्तमं गर्भं योगमाया तिरोहिता ।
भगवत्प्रेरिता चक्रे रोहिण्युदरवर्तिनम् ॥ २ ॥
अष्टमे च धृते गर्भे देवक्या भगवन्मये ।
न्यमज्जद्दुर्जनः कंसश्चीयमाने महाभये ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



नीयसे जातमात्रोऽपि वारिदे वर्षति व्रजम् ।
वर्धस्व भगवन् ! कृष्ण ! भक्तकल्पद्रुम ! प्रभो ! ॥

"गुजराती" प्रिंटींग प्रेस - मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतारयन्ती दुर्वृत्ताँस्तारयन्ती सतो जनान् ।
सेयमष्टभुजाऽस्माकं कष्टनाशाय चेष्टताम् ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यप्रतिश्रुतं देवं देवकीगर्भवर्तिनम् ।
तुष्टाः प्रतुष्टुवुर्देवा ब्रह्माद्याः प्राप्य मेदिनीम् ॥ ४ ॥

गर्भगतस्य भगवतः स्तुतिः ।

(३) तृतीये देवकीगर्भाच्चतुर्भुजवपुर्धरः ।
आविरासीद्यथाकालं निशीथे परमेश्वरः ॥ १ ॥
अजं सन्तं स्वतो जातं भगवन्तं कृताञ्जलिः ।
वसुदेवो देवकी च स्तौति स्म विलसन्मतिः ॥ २ ॥
वसुदेवो यथाऽऽदेशं तं मेघाच्छन्नखत्विषि ।
गोकुलस्थयशोदाङ्कशायिनं विदधे निशि ॥ ३ ॥
यशोदाया विमुग्धाया द्रुतमादाय दारिकाम् ।
कारागारोदरगतोऽवतस्थे स यथास्थितम् ॥ ४ ॥

कृष्णजन्म ।

(४) चतुर्थे प्रसवं श्रुत्वा देवक्या भयविह्वलः ।
सूतिकासदनं प्राप कंसः पापचिकीर्षया ॥ १ ॥
प्रार्थयन्तीं स्वानुजातामनादृत्यैव, दारिकाम् ।
बलात्पोथयितुं क्रूरः शिलायामुपचक्रमे ॥ २ ॥
तत्कराग्रात्समुत्प्लुत्य साऽन्तरिक्षं समाश्रिता ।
सायुधाष्टभुजा देवी ददृशे देवसेविता ॥ ३ ॥
" जातः क्वचिद्घातकस्ते जाल्म ! किं मां जिघांससि " ।
इत्युक्त्वा तस्य सविधे योगमाया तिरोदधे ॥ ४ ॥
अथानुतापव्यथितस्तथाजातप्रतारणः ।
उन्मुच्य सान्त्वयामास भामं च भगिनीं च सः ॥ ५ ॥
दुर्मन्त्र्य मन्त्रिभिः सार्धमन्येद्युर्दितिजाधमान् ।
द्वारकद्विजदेवादिप्रधनाय जिघाय सः ॥ ६ ॥

कंसभीतिः ।

(५) पञ्चमे नन्दनं पश्यन् नन्दः सानन्दतां गतः ।
विधिवत्साधु विदधे जातकर्ममहोत्सवम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करं सांवत्सरं राज्ञे निर्यातयितुमागतम् ।
श्रुत्वा नन्दं समागच्छद्वसुदेवः समुत्सुकः ॥ २ ॥
सुहृदं तं च शोचन्तं पुत्रप्रेमपरायणम् ।
तदात्वोचितया वाचा नन्दश्चक्रे मुदान्वितम् ॥ ३ ॥
निसृष्टो वसुदेवेन विविधोत्पातशंसिना ।
परावर्तिष्ट नन्दश्च त्वरावान् प्रति गोकुलम् ॥ ४ ॥

वसुदेवनन्दसङ्गमः ।

(६) षष्ठे कंससमादिष्टा शिशुप्राणापहारिणी ।
पूतना गोकुलं प्राप धृतनूतनविग्रहा ॥ १ ॥
प्रागल्भ्यमवलम्ब्येयं दर्शयन्तीव सौहृदम् ।
उत्सङ्गवर्तिनं चक्रे मायाशिशुकमीश्वरम् ॥ २ ॥
मात्रोः पुरः प्रपश्यन्त्योर्मुग्धयोर्भगवन्मुखे ।
सा विदग्धेव निदधे क्ष्वेडदिग्धं स्वचूचुकम् ॥ ३ ॥
करद्वितयसन्दंशनिष्पीडितपृथुस्तनः ।
प्राणैः सह पयस्तस्याः प्रपपौ नन्दनन्दनः ॥ ४ ॥
क्रन्दन्ती मुञ्च मुञ्चेति स्विन्ना सा व्यस्तलोचना ।
बृहत्तनुर्व्यात्तमुखी पपात गतचेतना ॥ ५ ॥
क्रीडन्तं वीक्ष्य गोप्यश्च तद्वक्षःस्थलगं शिशुम् ।
कृतत्वराः समभ्येत्य निन्युः संजातविस्मयाः ॥ ६ ॥
तत्तदङ्गेषु भगवद्बीजविन्यासपूर्वकम् ।
शिशुरक्षां यथाऽऽचारं विदधुर्धर्मकोविदाः ॥ ७ ॥
नन्दः समागतः श्रुत्वा वृत्तं, तत्पूतनावपुः ।
पश्यन् विस्मित्य तनयं मूर्ध्न्युपाजिघ्रदादृतः ॥ ८ ॥

पूतनाप्राणपयःपानम् ।

(१) चूचुकं तु कुचाग्रं स्यादित्यमरः । (२) सन्दंशः सणसीति प्रसिद्धो दृढग्रहणसाधनं यन्त्रविशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) सप्तमे देवकीसूनुरौत्थानिकमहोत्सवे ।
अधःशयानः शकटं पद्भ्यां पूर्णं व्यवर्तयत् ॥ १ ॥
अन्यदा स तृणावर्तं वात्यारूपं दितेः सुतम् ।
स्वं हरन्तं गले गृह्णन् पातयामास मारितम् ॥ २ ॥
कदाचित् पीतदुग्धोऽयं मात्रे मुग्धतराननः ।
जृम्भमाणो मुखे स्वीये जगत्सर्वमदर्शयत् ॥ ३ ॥

शकटभञ्जनं तृणावर्तदलनं विश्वरूपदर्शनं च ।

(८) अष्टमे वसुदेवेन निभृतं प्रहितोऽकरोत् ।
गर्गस्तयोर्नामकर्म सुतयोर्नन्दनोदितः ॥ १ ॥
गर्गगीतगुणं कृष्णं कुर्वन्नुत्सङ्गवर्तिनम् ।
नन्दः सानन्दमात्मानं मेने सर्वातिशायिनम् ॥ २ ॥
सरामकृष्णाः क्रीडन्तो जातु मातुर्न्यवेदयन् ।
कृष्णस्ते मृत्तिकामत्ति सतृष्ण इति बालकाः ॥ ३ ॥
धूलिव्याकीर्णवपुषं यशोदा तनयं निजम् ।
करे गृहीत्वा पप्रच्छ भयविभ्रान्तचक्षुषम् ॥ ४ ॥
अदान्त ! तरल ! ब्रूहि जग्धा मृत्स्ना कुतस्त्वया ? ।
कृत्स्ना एव वयस्यास्ते वदन्तीति श्रुतं मया ॥ ५ ॥
इति स्नेहसुधाधौतं जननीजल्पितं धयन् ।
ऊचे मुग्धमुखः कृष्णः सर्वं मिथ्येति तथ्यगीः ॥ ६ ॥
"यद्येवं तर्हि पश्यामि मुखं व्यादेहि संवृतम्" ।
इत्युच्यमानः प्रसुवा व्यादत्त मुखमच्युतः ॥ ७ ॥
सा तदीयमुखस्यान्तर्निरीक्ष्य सकलं जगत् ।
चकिता भक्तिभरिता ज्ञाततत्त्वाऽप्यजायत ॥ ८ ॥
पुत्रस्नेहमयीं मायां प्रसार्य भगवानथ ।
यथापूर्वमिमां चक्रे मातृभावसमावृताम् ॥ ९ ॥

मृद्भक्षणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(९) नवमे निजदासीषु गृहीतेतरकर्मसु ।
निष्णाता स्वयमारेभे कृष्णाम्बा मथितुं दधि ॥ १ ॥
गायन्ती कृष्णकर्माणि प्रस्विन्ना लोलकुण्डला ।
ममन्थ दधि मुग्धाङ्गी यशोदा प्रस्रवत्कुचा ॥ २ ॥
तदा कृष्णः समासीदन्नासेचनकतां गतः ।
स्तन्याभिलाषी मन्थानमवालम्बत सस्मितः ॥ ३ ॥
अङ्कमारोप्य तं माता पाययन्ती निजं पयः ।
उत्सिच्यमानं प्रचुरं व्यलोकत गवां पयः ॥ ४ ॥
ससम्भ्रमं समुत्तार्य भूम्यामसुहितं सुतम् ।
उपचुल्लि द्रुतपदं प्रपेदे नन्दगेहिनी ॥ ५ ॥
चलदोष्ठपुटः साश्रुर्निर्गतायां स्वमातरि ।
बिभेद मन्थनीं कृष्णः पेषण्या दृषदा रुषा ॥ ६ ॥
नवनीतं समानीतमुलूखलमधिष्ठितः ।
विभजन् वानरेभ्योऽपि बुभुजे नन्दनन्दनः ॥ ७ ॥
प्रत्यावृत्ता यशोदा च भाण्डभङ्गविलोकिनी ।
तदवस्थमुपासीददात्तयष्टिः शनैः सुतम् ॥ ८ ॥
कृतापराधः कृष्णश्च तरलाक्षः समीक्ष्य ताम् ।
पलायत यथावेगमनुदुद्राव साप्यमुम् ॥ ९ ॥
यशोदया कृतधिया श्रान्तयाऽप्यनुयातया ।
भक्तानुक्रोशविधृतविग्रहो जगृहे हरिः ॥ १० ॥
तनयं सभयं वीक्ष्य सा समुत्सृष्टयष्टिका ।
विधातुं तस्य सन्दानं नाम दाम समाददे ॥ ११ ॥

(१) तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् इत्यमरः । (२) उत्सिच्यमानं तापाधिक्येन उत्प्रवर्तमानम् ।

(३) असुहितमतृप्तम् । असुभ्यो हितमिति तात्त्विकोऽर्थः । (४) कर्मणि लिट् यशोदाया अस्वातन्त्र्यं व्यञ्जयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्व्यङ्गुलन्यूनतां तस्य निराकर्तुं यथोत्तरम् ।
संयोजितानि दामानि तदवस्थानि जज्ञिरे ॥ १२ ॥
विलक्षतां प्रपन्नायां श्रान्तायां मातरि प्रभुः ।
बध्यते स्म जनद्वन्धविध्वंसिगुणकीर्तनः ॥ १३ ॥
दामान्तेन पुनर्बध्वा तमुलूखलमध्यतः ।
विहाय गेहकृत्याय प्रययौ गोपगेहिनी ॥ १४ ॥

दाम्ना बन्धनम् ।

(१०) दशमे मध्यतः कृष्णो गच्छन्नर्जुनवृक्षयोः ।
आकृष्टोलूखलाघातात्पातयामास तौ प्रभुः ॥ १ ॥
मदान्धतादोषवशाज्जातां नारदशापतः ।
त्यक्त्वा तौ वृक्षतां स्वीयां प्राप्तौ धनदपुत्रताम् ॥ २ ॥
सामोदौ संस्तुवन्तौ तौ भक्त्या दामोदरः प्रभुः ।
अनुगृह्य निदेशेन स्वदेशाय व्यसर्जयत् ॥ ३ ॥

नलकूबरमणिग्रीवोद्धारः ।

(११) एकादशे बहुतरानुत्पातान् वीक्ष्य गोकुलम् ।
हित्वा वृन्दावनं जग्मुर्नन्दाद्याः सपरिच्छदाः ॥ १ ॥
समित्रश्चारयन् वत्साँस्तत्र वत्सवपुर्धरम् ।
जघान दितिजं कृष्णः प्रबलं घाततत्परम् ॥ २ ॥
यमुनावासिनं चक्रे महान्तमसुरं हरिः ।
स्वं ग्रसन्तं छद्मबकं यमसद्मनिवासिनम् ॥ ३ ॥

वत्सबकासुरयोर्वधः ।

(१२) द्वादशे गोपशिशुकैः सह गोवत्सचारकैः ।
प्रातः सभोज्यः प्रययौ यशोदायाः कुमारकः ॥ १ ॥
चरत्सु वत्सवृन्देषु मुकुन्दः सखिभिर्वृतः ।
उपकालिन्दि विपिने विजहार यथासुखम् ॥ २ ॥
कृष्णादिगोपविध्वंसविधानाय दुरासदः ।
अघासुरस्तदा प्राप कंसादेशवशंवदः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीत्वाऽऽजगरं रूपं, मुखं गिरिदरीसमम्।
व्यादाय, मार्गमावृत्य, सोऽवतस्थे, स्थिराकृतिः ॥ ४ ॥
अदृष्टचरतत्त्वात्तन्महाबिलविलोकिनः।
सवत्साः प्राविशन् गोपाः कृतोत्प्रेक्षाः प्रहर्षिताः ॥ ५ ॥
अनुप्रविष्टः कृष्णस्तं विपक्षं लक्षणैर्विदन्।
गलदेशे वपुर्वृद्ध्या जघान बलशालिनम् ॥ ६ ॥
तद्दैत्यदेहजातेन ज्योतिषा च समाश्रिते।
वृन्दारका नन्दसूनौ ववृषुः कुसुमोत्करम् ॥ ७ ॥
कौमारजं कर्म हरेरघासुरवधात्मकम्।
जगुर्वृन्दावनं प्राप्य पौगण्डे गोपबालकाः ॥ ८ ॥

अघासुरवधः।

(१३) त्रयोदशे तथा व्रातैः संग्धि वल्लवबालकैः।
आरेभे यमुनाकूले कृष्णः शाद्वलमञ्जुले ॥ १ ॥
सम्प्रहर्षेषु गोपेषु भुञ्जानेषु यथारुचि।
चरन्तस्तृणलोभेन वत्साः प्रापुर्वनान्तरम् ॥ २ ॥
वत्सपालान् समाश्वास्य सपाणिकवलो हरिः।
विचिन्वन् विपिने वत्सानेको द्रुतपदं ययौ ॥ ३ ॥
अघासुरवधात्कृष्णमहिमालोकनोत्सुकः।
तानन्तर्धापयामास वत्सान् दूरगतान् विधिः ॥ ४ ॥
वत्सानदृष्ट्वा पुलिनं प्रत्यायातश्च नैक्षत।
विधिमायातिरोभूतान् हरिर्गोपशिशूनपि ॥ ५ ॥
विचारज्ञातवृत्तान्तो यावन्तोऽन्तर्हिता हरिः।
वत्सानां वत्सपानां च तावतां रूपमग्रहीत् ॥ ६ ॥
सवत्सवत्सपवपुर्यथाकालं यथागृहम्।
यथापूर्वं निववृते स कथातीतवैभवः ॥ ७ ॥
अब्दाऽन्ते विधिरालोक्य सवत्सान् वत्सपालकान्।
न विवेद पृथक्त्वेन तत्कृतान् स्वहृतानपि ॥ ८ ॥

(१) सग्धिः स्त्री सहभोजनमित्यमरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोदाऽमृतार्णव-तरङ्ग-तरद्यशोदा-
ऽनुज्ञायमानगमनाय हसन्मुखाय ।
नित्यं नतिर्भगवते जगदीश्वराय
गोवत्सचारणपराय कृतत्वराय ॥

"गुजराती" प्रिंटींग प्रेस–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



"ब्रह्मास्तवे परब्रह्मस्वामी"

तत्तावदाकृतिक-वत्सप-वत्स-रूप-
स्वीकारसौख्यसफलीकृतवत्सराय ।
व्रीडावनम्र-चतुरानन-वन्दिताय
क्रीडाकिशोरवपुषे नम ईश्वराय ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्भुजान् वत्सपालान् सर्वान् दृष्ट्वा क्षणान्तरे ।
सपाणिकवलं कृष्णं यथापूर्वं ददर्श सः ॥ ९ ॥
हर्षप्रकर्षाज्जाताश्रुः प्रणमन् पदयोर्मुहुः ।
विहिताञ्जलिरारेभे स्तोतुं गद्गदगीर्विधिः ॥ १० ॥

विधिविमोहनम् ।

(१४) चतुर्दशे यथाभक्ति यथामति कृतस्तुतिः ।
कृष्णेन समनुज्ञातः स्रष्टा धाम स्वकं ययौ ॥ १ ॥

---

(१) एतत्स्तुतिदिक्प्रदर्शनं तु यथा—

[१] इत्थं रजःप्रसरधूसरविग्रहाय
ज्ञाताय कैरपि परोरजसे स्थिताय ।
तुभ्यं नमोऽस्तु भगवन्नखिलेश्वराय
गोपालबालसखितासुखितान्तराय ॥

[२] मौलिस्थबर्हमुकुटाय नवीनगुञ्जा-
पुञ्जावतंसरुचिराय हसन्मुखाय ।
नारायणाय भवते नतिरस्तु नित्यं
गोपार्भकप्रणयकेलिपरायणाय ॥

[३] प्रावृट्पयोदवपुषे तपनीयपत्र-
पीताम्बराय विलसन्मुरलीधराय ।
अभ्यर्णवर्तिविविधाकृतितर्णकाय
तुभ्यं नमोऽस्तु भगवन् ! प्रकृतीश्वराय ॥

[४] एतज्जगत्त्रयमयप्रहिदर्दुरस्य
क्षान्त्यर्थिनः क्षतमतेर्मम जातमन्तोः ।
मुग्धाय बल्लववधूवटवे भवन्तु
ब्रह्माण्डकोटिघटनापटवे प्रणामाः ॥

[५] रजोरसस्वीकृतिपङ्कसंकुलं
कृतानुतापं प्रणतं पदाब्जयोः ।
समुद्दिशन्त्यो जगदीश ! हन्त ! मां
पतन्तु सान्द्रास्तव दृष्टिवृष्टयः ॥ इत्यादि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोहितानां वत्सपानां कालः संवत्सरात्मकः ।
क्षणार्धतां प्राप तेन भुञ्जाना एव ते स्थिताः ॥ २ ॥
कृष्णश्च प्रहसन्नेतैः सह भुक्त्वा दिनात्यये ।
सवत्सवृन्दः सानन्दो न्यवर्तत गृहान्प्रति ॥ ३ ॥
कृताऽसद्ग्रासमद्यैकं बृहत्तरकलेवरम् ।
सर्पं हत्वा वयं त्राता इत्याऽऽचख्युर्व्रजेऽर्भकाः ॥ ४ ॥

कृष्णस्तुतिः विधेरनुग्रहश्च ।

(१५) ततः पञ्चदशे कृष्णः प्राप्य पौगण्डकं वयः ।
साग्रजन्मा गोपसुतैः सह चारयति स्म गाः ॥ १ ॥
उपकालिन्दि विपिने कूजद्विविधपक्षिणि ।
ग्राम्यैश्चिक्रीड सानन्दः श्रुतीडितगुणः प्रभुः ॥ २ ॥
गोपालाः क्रीडनश्रान्ता पक्वतालफलार्थिनः ।
धेनुकादसुराद्भीता नन्दसूनुं न्यवेदयन् ॥ ३ ॥
सरसैः कोमलतरैः परिपूर्णान्तरं तृणैः ।
सरामस्तान् सहादाय ययौ तालवनं प्रभुः ॥ ४ ॥

गोचारणम् ।

बलिना बलभद्रेण बलात् कम्पयता तरून् ।
पातिता च्छादयामास महीं तालफलावलिः ॥ ५ ॥
दुर्नदन् धेनुको नाम खररूपधरोऽसुरः ।
चरणाभ्यां पश्चिमाभ्यां प्रहरन्नुदपद्यत ॥ ६ ॥
गृहीत्वा तं प्रपदयोरुच्चिक्षेप बलो बली ।
भूरिभ्रमणनिष्प्राणं तुङ्गतालद्रुमोपरि ॥ ७ ॥
रामः कृष्णश्च नदतः क्रोधादापततोऽपरान् ।
असुरान् रासभाकारान्यथापूर्वं निजघ्नतुः ॥ ८ ॥
ततः प्रभृति सानन्दाः कालिन्दीकूलगामिनः ।
फलानां सुहिता आसन्मनुजा वीतभीतयः ॥ ९ ॥

(१) फलानां सुहिताः—फलैस्तृप्ताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जग्धतालफलैर्गोपैः स्तूयमानगुणो ययौ ।
पुरस्कृत्य गवां वृन्दं मन्दिरं नन्दनन्दनः ॥ १० ॥
अन्यदा विषसंपृक्तयमुनातोयपायिनीः ।
निश्चेष्टा जीवयामास गाः सगोपा दृशा प्रभुः ॥ ११ ॥

धेनुकासुरवधः ।

(१६) षोडशे निर्विषां कर्तुं कालिन्दीं कालियह्रदे ।
कृष्णः कदम्बमारुह्य पपाताऽगाधपाथसि ॥ १ ॥
नियुध्यमानो बलिना कृष्णः कालियभोगिना ।
दशता बध्नता चाऽभूदिच्छयैव कदर्थितः ॥ २ ॥
ह्रदप्रविष्टं सुचिराज्ज्ञात्वा कृष्णमनिर्गतम् ।
नन्दाद्या व्याकुलस्वान्ताः सन्तः कूलेऽवतस्थिरे ॥ ३ ॥
हरिर्मुहूर्तमात्रेण बन्धनान्मुक्तविग्रहः ।
ननर्त वर्तमानः सन्नहेस्तस्य फणातटे ॥ ४ ॥
पार्ष्णिप्रहारव्यथिते तस्मिन् प्राणान् मुमुक्षति ।
स्तुवन्त्यः प्रणमन्त्यश्च नागपत्न्यः प्रपेदिरे ॥ ५ ॥
पतिप्राणाकाङ्क्षिणीनां श्रद्धाशोधितचेतसाम् ।
वचांसि तासामाकर्ण्य दयाञ्चक्रे जगत्पतिः ॥ ६ ॥
समुच्छ्वसन्तं पदयोः प्रणमन्तं कृताञ्जलिम् ।
अनुजग्राह तं कृष्णः स्वस्वभाववशंवदम् ॥ ७ ॥
दत्ताभयो मूर्धमध्ये कालियः पदलाञ्छितः ।
द्वीपं रमणकं नाम जगाम सपरिग्रहः ॥ ८ ॥

कालियनिग्रहः ।

(१७) कृष्णः कण्ठगतासूनां बान्धवानां विषीदताम् ।
उत्कण्ठां विरतां कुर्वन्निरगच्छह्रदाद्बहिः ॥ १ ॥
नन्दादयः समासाद्य कृष्णमागतजीविताः ।
हर्षप्रकर्षविवशाः परिष्वङ्गादि चक्रिरे ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेन व्यतिकरेणैव भास्करेऽस्तमुपागते ।
तमः क्रमसमायातं तस्तरे सकला दिशः ॥ ३ ॥
क्षुधा व्याकुलिताः श्रान्ता वृन्दावननिवासिनः ।
चक्रुर्निवासं तत्रैव विपिने ग्रीष्मशोषिते ॥ ४ ॥
तेषां तत्र प्रसुप्तानां निशीथे मिलिताऽनिलः ।
प्रादुर्बभूव परितः परिवार्य दवानलः ॥ ५ ॥
दन्दह्यमानवपुषः सम्भ्रमेण समुत्थिताः ।
त्रायस्व भगवन् ! कृष्णेत्याचक्रन्दुर्व्रजौकसः ॥ ६ ॥
विह्वलान् पदयोः प्रह्वान् स्वजनान् वीक्ष्य माधवः ।
पपौ दावानलं तीव्रं वचनातीतपौरुषः ॥ ७ ॥
ज्ञातशक्तीन् कालियाहेर्निग्रहाच्छरणं गतान् ।
एवं ररक्ष गोविन्दो गोपानित्यत्र वर्णितम् ॥ ८ ॥

दावाग्निपानम् ।

(१८) अष्टादशे रामकृष्णौ वसन्तसदृशे शुचौ ।
गाश्चारयन्तौ ययतुः सवयस्यौ स्फुरद्रुचौ ॥ १ ॥
क्रीडत्सु कृष्णमुख्येषु गोपेषु बहुधा वने ।
गोपस्य रूपमालम्ब्य प्रलम्बः समुपस्थितः ॥ २ ॥
प्रवृत्ते क्रीडने तेषां वाह्यवाहकलक्षणे ।
ऊहुः पराजिता जेतॄन् गोपा गोपान् कृतावधि ॥ ३ ॥
पराजितः प्रलम्बस्तु रामं स्कन्धास्थितं वहन् ।
अगादवधिमुल्लङ्घ्य जिघांसुर्विजनं वनम् ॥ ४ ॥
स आसुरं वपुर्घोरं स्वकीयं समुपाश्रितः ।
ईषद्वित्रासयामास बलभद्रमभद्रधीः ॥ ५ ॥
क्षणेन धृतिमालम्ब्य तं खलं मुष्टिभिर्बलः ।
विशीर्णमस्तकं चक्रे गतप्राणं महाबलः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तक्र-प्रकार-विनिगीर्ण-दवानलाय
प्रादुष्कृताऽखिल-खल-ग्रसनस्पृहाय ।
भीत्याकुलान्प्रणमतः सहसैव गोपान्
गोपायते नम उपात्तकृपारसाय ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोपाः कृष्णमुखाः प्रेक्ष्य प्रलम्बं भुवि पातितम् ।
बलं कृतपरिष्वङ्गाः प्राशंसन् प्रेमविह्वलाः ॥ ७ ॥

प्रलम्बवधः ।

(१९) एकोनविंशे निहते प्रलम्बे मुदितान्तराः ।
अभूवन् किल गोपालाः स्वैरक्रीडैकतत्पराः ॥ १ ॥
वनाद्वनान्तरं याताश्चरन्त्यस्तृणसस्पृहाः ।
मुञ्जाटवीं प्राप्य गावश्चक्रन्दुर्दावदुःखिताः ॥ २ ॥
अन्वेषमाणः संप्राप्य गोपवर्गो गवां गणम् ।
श्रान्तं पिपासाकुलितं न्यवर्तयत हर्षितम् ॥ ३ ॥
निर्यच्चटच्चटच्छब्दो निर्दहन् बृहतस्तरून् ।
दवानलः परीयाय मरुता सच्चरीकृतः ॥ ४ ॥
अनन्तशक्ते ! भगवन् ! कृष्ण ! नः शरणागतान् ।
त्रायस्व त्वरयेत्युच्चैश्चक्रन्दुर्गोपनन्दनाः ॥ ५ ॥
"अहो ! सखायश्चक्षूंषि निमीलयत निर्भयाः" ।
इति ते हरिणा प्रोक्तास्तथा चक्रुः कृतत्वराः ॥ ६ ॥
निपीय भगवान् कृष्णस्तं दवानलमुद्धतम् ।
निजान् निमेषमात्रेण त्रायते स्म तथार्दितान् ॥ ७ ॥

दावाग्निपानम् ।

(२०) विंशे भविष्यच्छ्रीकृष्णलीलोद्दीपकतां गताम् ।
क्रमेण वर्षाशरदोः श्रियं मुनिरवर्णयत् ॥ १ ॥
वर्षर्तौ चारयन्धेनूर्बुभुजे प्रस्तरस्थितम् ।
गोपमध्योपविष्टः सन् मुदा दध्योदनं प्रभुः ॥ २ ॥
समशीतोष्णतां याते शरत्काले च हर्षितैः ।
पुष्पिते कानने गोपैर्विजहार जगत्पतिः ॥ ३ ॥

वर्षाशरच्चर्चा ।

(२१) एकविंशे नन्दसूनुः शरदं पूजयन्निव ।
मुरलीं कूजयन् रेमे ससखः शोभने वने ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेणुस्वनं समाकर्ण्य मिथः संगत्य गोपिकाः ।
साभिलाषं सप्रहर्षं वर्णयामासुरादृताः ॥ २ ॥

वेणुवर्णनम्।

(२२) द्वाविंशे कृष्णसंप्राप्तिमभिसन्धाय गोपिकाः ।
हविष्यभोजनाश्चेरुः कात्यायन्यर्चनव्रतम् ॥ १ ॥
ताः समुत्थाय मिलिता उषसि स्नातुमादृताः ।
कृष्णकर्माणि गायन्त्यः प्रत्यहं यमुनां ययुः ॥ २ ॥
" नन्दगोपसुतं देवि ! पतिं मे कुरु ते नमः " ।
इति कात्यायनीमेताः स्नाताः सत्यो ववन्दिरे ॥ ३ ॥
ताश्च स्नान्तीर्विवसना जातु कृष्णः कदर्थयन् ।
कदम्बवृक्षमारुक्षद् गृहीतवसनोच्चयः ॥ ४ ॥
" श्याम ! साकाङ्क्षमासीना दासीभूता नियुङ्क्ष्व नः ।
आः ! शीतं बाधते साधो ! वसनानि प्रदेहि नः" ॥ ५ ॥

(१) वेणुवर्णनदिग्यथा—

[१] आलयः ! पततु सर्वममीषामम्बरीषदहनोपरि कर्म ।
आश्रयेम तरलीकृतचित्ता नन्दसूनुमुरलीस्वनशर्म ॥
[२] ऊर्ध्वकर्णयुगलः किल दूरात् पीतवेणुनिनदाऽमृतपूरः ।
देवि ! धेनुगण उज्झितचारः पश्य पीवरतनुः स्थिरसारः ॥
[३] कानि कानि सुकृतानि विविक्ते चर्करीति मुरलीति न विद्मः ।
आलि ! मञ्जुलतमेऽधरदेशे चुम्ब्यते बत ! यया वनमाली ॥
[४] नन्दनन्दनमुखेन्दुमयूखद्योतमाननयनोत्पल एषः ।
देवि ! पश्य हरिणीगण आराद्भासते विहितपुण्यविशेषः ॥
[५] वेणुवाद्यजनिताद्भुतमोदा नर्तनं विदधती गतभीतिः ।
कर्हि ? किं ? सुकृतमातनुतेयं बर्हिणी वनरता प्रियमूर्तिः ॥
इत्यादि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति गोपीवचः शृण्वन्द्रुतमुत्तीर्य तीरगाः ।
गृह्णीत स्वानि वासांसीत्यूचे शीतार्दिता हरिः ॥ ६ ॥
असह्यशीतसंत्रस्तः पाणिद्वयमयाम्बरः ।
गोपीजनः प्रोत्ततार वेपमानारुणाधरः ॥ ७ ॥
मुग्धं गोपीजनं पश्यन्नादिदेश जगत्पतिः ।
प्रायश्चित्तं नग्नतायाः शिरस्यञ्जलिबन्धनम् ॥ ८ ॥
तथा कृत्वा लब्धवस्त्रास्तास्त्रपालोलचक्षुषः ।
निशाकल्पितसंकेताः प्रतिजग्मुर्निकेतनम् ॥ ९ ॥
तथा गोपालतनया अनुगृह्याऽनुरागिणीः ।
वृक्षान् प्रशंसन् निरगाद्वाश्चारयितुमच्युतः ॥ १० ॥

चैलचौर्यम् ।

(२३) त्रयोविंशे प्रार्थयतो भक्ष्यजातं बुभुक्षितान् ।
गोपानाङ्गिरसं सत्रं प्रजिघाय जनार्दनः ॥ १ ॥
श्रावयन्तो रामकृष्णौ संप्राप्तौ क्षुधिताविति ।
कर्मैकव्यापृतैर्विप्रैर्गोपा आसन्नुपेक्षिताः ॥ २ ॥
प्रत्यावृत्तांश्च तानेव प्रजिघाय पुनर्हरिः ।
पुनर्गच्छत याचध्वं द्विजपत्नीः सतीरिति ॥ ३ ॥
तथेति याचिता गोपैरन्नं स्वादु चतुर्विधम् ।
आदाय निर्ययुः पत्न्यो निषेधत्सु पतिष्वपि ॥ ४ ॥
समादृता विप्रपत्न्यः श्रीकृष्णेन प्रसीदता ।
निवर्तितुमनिच्छन्त्यो बोधयित्वा विसर्जिताः ॥ ५ ॥
स्वस्त्रीणां तादृशीं भक्तिं स्वस्य चालोक्य मूढताम् ।
अनुतप्य द्विजन्मानश्चक्रुः श्रीहरये नमः ॥ ६ ॥

विप्रपत्न्युद्यमः ।

(२४) चतुर्विंशे शक्रमखे कृतोद्योगान् निवारयन् ।
गोवर्धनार्चनं प्रोचे सर्वश्रेयस्करं हरिः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाग्मिना वासुदेवेन बोधिता व्रजवासिनः ।
गोवर्धनस्य पूजायै संभारान् समयोजयन् ॥ २ ॥
समारम्भेण महता गिरिं गोवर्धनं गताः ।
अर्चनं चक्रिरे तस्य गोपालाः सपरिग्रहाः ॥ ३ ॥
आविर्भूतो मूर्ध्नि गिरेरन्यरूपधरो हरिः ।
हसन् न्यधत्त वदने प्रीतोऽस्मीति वदन् बलिम् ॥ ४ ॥
गोपाश्च जातविश्रम्भास्तं प्रणम्य मुहुर्मुहुः ।
प्रत्यावर्तन्त मुदिताः सकृष्णाः सपरिच्छदाः ॥ ५ ॥

इन्द्रमखभङ्गः ।

(२५) पञ्चविंशे तु मघवा समाहूय व्यसर्जयत् ।
मखविघ्नप्रकुपितो व्रजनाशाय वारिदान् ॥ १ ॥
विद्युदुद्द्योतिताः सन्तो ववृषुस्ते च मेचकाः ।
व्रजे करिकराकारा वारिधारा घनाघनाः ॥ २ ॥
कुपितेन्द्रकृतं ज्ञात्वा नन्दाद्यास्तमुपद्रवम् ।
प्रपन्नान् कृष्ण ! पाहीति चक्रन्दुः कातरस्वराः ॥ ३ ॥
वारिणाऽऽप्लाव्यमानानां सर्वनाशाभिशङ्किनाम् ।
तेषामुद्धरणोपायं समचिन्तयदच्युतः ॥ ४ ॥
परिच्छदेन युक्तानां वासाय व्रजवासिनाम् ।
गोवर्धनं प्रोदधरच्छिलीन्ध्रमिव केशवः ॥ ५ ॥
गर्तान्तर्गामिनः कृत्वा सर्वान् व्रजनिवासिनः ।
करेण सप्त दिवसान् दध्रे गोवर्धनं प्रभुः ॥ ६ ॥
शक्रो निवारयामास वारिदान् वितथेहितः ।
कृष्णो निर्गमयामास गोपान् सिद्धसमीहितः ॥ ७ ॥

गोवर्धनोद्धरणम् ।

(२६) षड्विंशे कर्मणा तेन विस्मिता व्रजवासिनः ।
अजीगणन्नमेयानि कर्माण्यन्यानि शङ्किताः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सवितर्काश्च तान् गोपाञ् श्रावयन् गर्गभाषितम् ।
नारायणसमं मेने नन्दो गोपः स्वनन्दनम् ॥ २ ॥

भगवद्‌दवदानगानम् ।

(२७) सप्तविंशे भग्नदर्पः सुरभ्या सह लज्जितः ।
विविक्तवर्तिनं कृष्णमाजगाम शतक्रतुः ॥ १ ॥
भालदेशमिलच्चूलि नतमौलि कृताञ्जलि ।
नन्दसूनोः पदद्वन्द्वं स ववन्दे ससम्भ्रमः ॥ २ ॥
दर्पान्धकारविध्वंसादथ प्रोज्ज्वलदर्शनः ।
गृणाति स्म गुणागारं मनुजाकारमीश्वरम् ॥ ३ ॥
यथाऽधिकारं वर्तस्व मघवन् ! मामनुस्मरन् ।
प्रीतोऽस्मि भद्र ! गच्छेति तं प्रत्यूचे जगत्पतिः ॥ ४ ॥
अथोपसृत्य सुरभिः स्तुवन्ती स्निग्धया गिरा ।
आत्मनः पयसा कृष्णं स्नपयामास भूयसा ॥ ५ ॥
सुरमातृभिरादिष्टः ससुरर्षिः सुरेश्वरः ।
कृष्णं मन्दाकिनीतोयैरानीतैरभ्यषिञ्चत ॥ ६ ॥
तुष्टुवुर्मुनयस्तुष्टाः संभूय कृतवादनाः ।
जगुर्गन्धर्वपतयो ननृतुर्देवयोषितः ॥ ७ ॥
गवेन्द्र ! कृष्ण ! गोविन्द ! जयेत्युच्चतरा गिरः ।
उच्चारयन्तो निर्जग्मुः सुनासीरादयः सुराः ॥ ८ ॥

इन्द्रानुग्रहः, कृष्णाभिषेकश्च ।

(२८) अष्टाविंशे स्नानहेतोः प्रविष्टमुदकं निशि ।
जहार विहिताक्रन्दं नन्दं वरुणकिङ्करः ॥ १ ॥
क्रोशत्सु गोपवर्गेषु सानुक्रोशः कृतत्वरः ।
जगाम वारुणं धाम तातमानेतुमच्युतः ॥ २ ॥
प्रसीदता बिभ्यता च स्तुवताऽर्चयता सता ।
प्रार्थितोऽभूद्भक्तिमता कृष्णः पाशभृता प्रभुः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुगृह्य ततः कृष्णः पाशिनं वशवर्तिनम् ।
प्रत्याजगाम सानन्दो नन्दमादाय विस्मितम् ॥ ४ ॥
नन्दश्च दृष्टतत्तादृक्प्रभावातिशयः स्वयम् ।
शृण्वत्सु गोपवर्गेषु वैभवं समवर्णयत् ॥ ५ ॥
वैष्णवं धाम सर्वेषां गोपानां द्रष्टुमिच्छताम् ।
प्रभुः प्रदर्शयामास श्रुतिगीतगुणोदयः ॥ ६ ॥
दुर्दर्शं योगिभिर्दृष्ट्वा वैष्णवं धाम विस्मिताः ।
सर्वे नन्दोपनन्दाद्या ननन्दुर्व्रजवासिनः ॥ ७ ॥

नन्दानयनं वैकुण्ठदर्शनं च ।

(२९) ऊनत्रिंशे जगौ कृष्णः कानने चन्द्रिकोज्ज्वले ।
उदञ्चयन् पञ्चबाणप्राणदं वेणुपञ्चमम् ॥ १ ॥
श्रवांसि गात्ररोमाणि मनांसि च मृगीदृशाम् ।
तद्गीतं हर्षयामास युगपद्व्रजयोषिताम् ॥ २ ॥

वेणुवादनम् ।

ताः स्वं कर्म परित्यज्य समारब्धं समुत्सुकाः ।
निवार्यमाणाः स्वजनैरभिसस्रुः स्मरार्दिताः ॥ ३ ॥
ताः प्रस्विन्नकपोलान्ताः श्रान्तपाटलचक्षुषः ।
अपक्कलकुचाकारकुचाः प्रावोचदच्युतः ॥ ४ ॥
भोः ! सख्यः ! स्वागतं किं ? वः कुर्यां ब्रूत समीहितम् ।
मच्चित्तानां कच्चिदस्ति ? बान्धवानां व्रजे हितम् ॥ ५ ॥
अपि ? मत्प्रणयेनेमां यूयं भूमिमवापिताः ।
सर्वात्मनाऽवदातानामुपपन्नमिदं च वः ॥ ६ ॥
प्रदर्शनप्रदानेन प्रीणितो वः प्रसादये !
प्रतिगन्तुं स्वगेहानि हानिदा स्वैरचारिता ॥ ७ ॥
स्वं पतिं साधु सेवध्वमवेक्षध्वं निजान् गृहान् ।
यात, व्रतं पात, पाति पातिव्रत्यं हि योषितः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्वेषमाण-निगमाऽनवलोकिताय
गोपाङ्गना-भुजयुगान्तर-निःसृताय ।
अन्तर्हिताय नतिरस्तु निरञ्जनाय
सानन्दनन्ददयिताऽञ्जितलोचनाय ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति गोविन्दगदितमाकर्ण्य व्रजसुभ्रुवः ।
छिन्नाशा भिन्नमर्माणः प्रत्यूचुः स्रवदश्रवः ॥ ९ ॥
इति वाचः सखे ! धार्ष्ट्यमुखे मा खेदकारिणीः ।
अव कन्दर्पदहनाद्भक्तभाग्भव माधव ! ॥ १० ॥
श्रीकान्त ! तापितस्वान्ताः सद्म गन्तुं न शक्नुमः ।
आदेहि देहि वा कृष्ण ! प्राणाँस्त्वदवलम्बनान् ॥ ११ ॥

गोपीवृन्दगोविन्दसंलापः ।

इत्यर्पितात्मनां तासां मुदे धृतमनोभवः ।
प्रगायन् गीयमानश्च रेमे रागीव केशवः ॥ १२ ॥
तासां सौभगमत्तानां मानपूर्णान्तरात्मनाम् ।
अनुग्रहाय विहरन् हरिरन्तरधीयत ॥ १३ ॥

रमणमन्तर्धानं च ।

(३०) त्रिंशे मुकुन्दविश्लेषव्याकुलीकृतमानसाः ।
बभ्रमुर्व्रजसुन्दर्यो वनाद्वनमतन्द्रिताः ॥ १ ॥
प्रतिवृक्षं प्रतिलतं प्रतिगुल्मं प्रतिक्षुपम् ।
प्रत्येणीनिवहं चैताः पप्रच्छुः प्रेयसो गतिम् ॥ २ ॥
पूतनाहननादीनि चरितानि यथारुचि ।
चेरुः समनुकुर्वाणाः कृष्णप्राणा व्रजस्त्रियः ॥ ३ ॥
किं च कृष्णेन रहसि नीता काचिद् व्रजाङ्गना ।
वह मामिति जल्पन्ती वञ्चिता व्यलपत्तराम् ॥ ४ ॥
ज्योत्स्नाऽपयानसमये सा च ताश्च सविस्मयाः ।
कालिन्दीकूलमाजग्मुः कृष्णदर्शनकाङ्क्षया ॥ ५ ॥

भगवतोऽन्वेषणम्

(३१) एकत्रिंशे त्यक्तनिजनिकेता मीनकेतुना ।
भ्रमिता दीनतां प्राप्ताः समवेता व्रजस्त्रियः ॥ १ ॥
आध्यानयोगजनितसन्निधानं जगत्पतिम् ।
शोचनीयां निजदशां दर्शयन्त्यो गतत्रपाः ॥ २ ॥

(१) त्रिभिरन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साभिलाषं सानुनयं समन्मथकदर्थनम् ।
सकोपं साभ्यसूयं च जगुः कोकिलनिःस्वनाः ॥ ३ ॥

गोपीगीतम् ।

(३२) द्वात्रिंशे रुदतीर्गोपीस्त्यक्तस्वजनबान्धवाः ।
सान्त्वयामास भगवानाविर्भूय दयामयः ॥ १ ॥

---

(१) गीतपरिपाटीदिग्यथा––

[१] स्निग्धमुग्धचलचूर्णकुन्तलं
पूर्णशारदसुधांशुनिर्मलम् ।
स्वं मुखं स्मितसुखप्रदं सखे !
श्याम ! सुन्दर ! कुरुष्व संमुखम् ॥

[२] पीततादृशदवोऽपि सांप्रतं
नन्दनन्दन ! कुतोऽसि निर्दयः ।
लुप्तनीति परिवर्जितास्त्वया
दन्दहीति वत ! शीतदीधितिः ॥

[३] तोषितोऽसि जहतीः प्रियान् गृहान्
वीक्ष्य नश्चरणरेणुरागिणीः ।
रोषितोऽसि कथमाकुलानसून्
मुञ्चतीर्दयित ! नाद्य पश्यसि ॥

[४] पर्णरुद्धकिरणा वनस्थली
द्यौः शरत्समयचारुचन्द्रिरा ।
त्वां न चित्तचयचोर ! चक्ष्महे
क ? प्रयाम वत ! मुक्तमन्दिराः ॥

[५] आः ! क्षितिर्भ्रमति हृद्विदीर्यते
प्रादुरस्ति तम एव केवलम् ।
अङ्घ्रिणा प्रिय ! कुचाग्रचारिणा
सच्छलं दलय हृच्छयं खलम् ॥

इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतान्तज-त्रास-निरासदीक्षित-प्रशान्त-मन्दास्मित-मुग्धमूर्तये ।
तमोऽन्तकृत्पद्रजसे दिनेदिने नमोनमो रासविलासशालिने ।।

"गुजराती" प्रिंटींग प्रेस–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथामनोरथं ताश्च प्रियं प्रेक्ष्य समुत्थिताः ।
सप्राणतां प्रयातानां तनूनां समतां ययुः ॥ २ ॥
निजैरश्रुभिरार्द्राणि चक्षूंषीव प्रियाय ताः ।
आसनार्थेऽर्पयामासुरुत्तरीयाणि हर्षिताः ॥ ३ ॥
भजन्तीनां परित्यागे पृच्छन्तीर्हेतुमच्युतः ।
मुदा विधित्सितं प्रोचे प्रणयस्यानुवर्तनम् ॥ ४ ॥

भगवत्प्राप्तिः ।

(३३) त्रयस्त्रिंशे तु गोविन्दः कन्दर्पेण कदर्थिताः ।
कृतार्थयितुमारेभे विलासं रासनामकम् ॥ १ ॥
कान्तांकान्तामन्तराऽभूद्भ्रमन्नेको जगत्पतिः ।
कान्तंकान्तं वधूरेकाऽप्यन्तराऽभूत्स्फुरद्गतिः ॥ २ ॥
इति मण्डलमाबध्य विहिताऽनेकविग्रहः ।
रमयन् रमणी रागी जगौ योगविदां गतिः ॥ ३ ॥
ताश्च शिञ्जानमञ्जीरं विलोलकुचकुण्डलम् ।
स्विद्यन्मुखं नमन्मध्यं ननृतुः कृतगायनम् ॥ ४ ॥
सन्ततेन विलासेन तादृशेन व्रजाबलाः ।
मनसा प्रबला आसन् वपुषा दुर्बला अपि ॥ ५ ॥
उपेक्ष्य विश्लथान् केशान् दुकूलं स्थानतश्च्युतम् ।
यथामनोरथं सर्वाः प्रियं निर्विविशुः प्रियाः ॥ ६ ॥
श्रमखिन्नाः स्विन्नमुखीः सुखयन् यूथपो यथा ।
प्रवेश्य यामुने तोये रमयामास ताः प्रभुः ॥ ७ ॥
तत उत्तीर्य सुचिरात्कालिन्दीकूलकानने ।
विजहार हरिस्ताभिः सामोदशिशिरानिले ॥ ८ ॥
निशायां सावशेषायामलसाः प्राहिणोत् स ताः ।
व्रज सीमन्तिनीर्गेहान्यनिच्छन्तीरलक्षिताः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वपार्श्ववर्तिनीरेव मन्यमाना व्रजौकसः ।
चिरेणाऽपि समायाताः किंचिदप्यूचिरे न ताः ॥ १० ॥
इतीच्छामात्ररचितप्रपञ्चोऽपि जगत्पतिः ।
लीलया रासरसिको जायते स्म सतां गतिः ॥ ११ ॥

रासविलासः ।

(३४) चतुस्त्रिंशे देवयात्रानिर्याता व्रजवासिनः ।
तस्थुः सरस्वतीतीरे कृतसाम्बशिवार्चनाः ॥ १ ॥
सर्वैः सह शयानं च नन्दमेव बुभुक्षितः ।
जग्रसे पन्नगः कोऽपि बृहत्तरकलेवरः ॥ २ ॥
पाहि मां कृष्ण ! कृष्णेति स चुक्रोश भयार्दितः ।
सर्पोऽपि नापचक्राम स विद्धोऽप्युल्मुकादिभिः ॥ ३ ॥
मुकुन्देनोपयातेन पदा स्पृष्टो भुजङ्गमः ।
निजं रूपं च नन्दं च हित्वा विद्याधरोऽभवत् ॥ ४ ॥
आत्मानमङ्गिरःशापात्तदवस्थं निवेदयन् ।
प्रणम्य पदयोः प्रीतः प्रतस्थे स निजं पदम् ॥ ५ ॥
अन्यदा व्रजयोषिद्भिर्गायन्तीभिः समन्वितौ ।
निशायां विपिनं यातौ रामकृष्णौ विजह्रतुः ॥ ६ ॥
तदात्व एव क्रोशन्तीः शङ्खचूड इति श्रुतः ।
अबलाः कालयामास प्रबलो गुह्यकाधमः ॥ ७ ॥
द्रुमपाणी समायान्तौ रामकृष्णौ निरीक्ष्य सः ।
अदुद्रुवद्यथावेगं विहाय व्रजसुन्दरीः ॥ ८ ॥
अनुद्रुतश्च भगवाँस्तं निहत्य शिरःस्थितम् ।
मणिं ददेऽग्रजाताय भासुरं योषितां पुरः ॥ ९ ॥

नन्दमोचनं शङ्खचूडवधश्च ।

(३५) पञ्चत्रिंशे वनं याते गाश्चारयितुमच्युते ।
अकिञ्चित्करतां प्रापुर्गोप्यस्तद्ध्यानतत्पराः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सधेनुगण उल्लसद्विरलवेणुरन्ध्रावली-
क्रमप्रचलदङ्गुलीकलितमञ्जुमञ्जुस्वनः ।
अनन्तरितबल्लवीजनदृगन्तदत्तेक्षणः
प्रकार उपकारकृद्भवतु नः परब्रह्मणः ॥

"गुजराती" प्रिंटींग प्रेस मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिथः समेत्य गायन्त्यः प्रत्येकं पद्ययोर्युगम् ।
प्रियसंकीर्तनपरा वासरानत्यवाहयन् ॥ २ ॥

गोपीयुगलगीतम् ।

(३६) षट्त्रिंशे वृषभाकारं दारयन्तं पदा महीम् ।
तीक्ष्णदीर्घबृहच्छृङ्गं गोगोपत्रासकारकम् ॥ १ ॥
गर्जन्तं पर्वतोत्तुङ्गमरिष्टं गोष्ठमागतम् ।
निगृह्य शृङ्गयोः कृष्णो जघान दितिजाधमम् ॥ २ ॥
नारदः कंसमाचख्यौ श्रीकृष्णं देवकीसुतम् ।
कन्यां यशोदातनयां रोहिणीनन्दनं बलम् ॥ ३ ॥
कपटे प्रकटीभूते वसुदेववधोद्यतः ।
निवारितो नारदेन सदारं तं बबन्ध सः ॥ ४ ॥
निर्याते नारदे कंसः कृष्णादिवधहेतवे ।
दितिजं केशिनामानं निदिदेश वशंवदम् ॥ ५ ॥

---

(१) द्वयोर्द्वयोः पद्ययोः सारमादाय संकलितानि कियन्तिचन पद्यानि यथा—

[१] हन्त ! वेणुमधरार्पितमारान्मञ्जु कूजयति नन्दकुमारः ।
मार्गणैर्गगनगान् सुरदारान् दूरतोऽपि सखि ! विध्यति मारः ॥

[२] हन्त ! वादयति सादरमेतामाननेन मुरलीं सखि ! कृष्णः ।
गोमृगादिगण उन्नतकर्णः पश्य तोयतृणपर्णवितृष्णः ॥

[३] हन्त ! नन्दतनयं क्वचिदुच्चैराह्वायन्तमखिलाः सखि ! धेनूः ।
चञ्चलोर्मिरगतिः सरिदेषा किं ? दिवापि परिरिप्सुरिवाऽऽस्ते ॥

[४] हन्त ! पीतहरिगीतरसोऽयं सर्वतोऽपि सरसस्तरुवर्गः ।
तानि तानि रुचिराणि फलानि प्राणदानि जगतां सखि ! सूते ॥

[५] हन्त ! वर्षति सुधां सखि ! वेणोर्यर्हि हर्षदवपुर्वनमाली ।
तर्हि संकुचितचक्षुरुपास्ते पक्षिणामपि गणः सुखशाली ॥

इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुष्टिकादीन् समाहूय प्राप्तयो रामकृष्णयोः ।
आदिदेश वधं कर्तुं धनुर्यागोत्सवं च सः ॥ ६ ॥
रामकृष्णौ सभानेतुं वर्धमानमहाभयः ।
अक्रूरं प्रेषयामास कंसः क्रूरतराशयः ॥ ७ ॥

अरिष्टवधः कंसव्याकुलता च।

(३७) सप्तत्रिंशे रामकृष्णौ हनिष्यन् क्षोदितक्षितिः ।
तुरङ्गरूपवान् प्राप केशी तुङ्गतराकृतिः ॥ १ ॥
उदगूर्णयोश्चरणयोः समालम्ब्य धनुःशतम् ।
भ्रमयन् सन्नपोचाह वाहरूपं तमच्युतः ॥ २ ॥
व्यादाय वदनं प्राप्तं पुनरेनं जनार्दनः ।
निजघान सुखेनैव मुखे बाहुं प्रवेशयन् ॥ ३ ॥
अथ प्रसूनं वर्षद्भिर्दिविषद्भिः समर्चितम् ।
उपगम्य विविक्तस्थं कृष्णं स्तौति स्म नारदः ॥ ४ ॥
करिष्यमाणैर्विविधैः कर्मभिः परदुष्करैः ।
स्तुत्वा भगवदादिष्टः स यथेष्टमगान्मुनिः ॥ ५ ॥
निर्गते नारदे धेनूश्चारयन् विपिनं गतः ।
चिक्रीड गोपैरूर्णायुपालचोरायितैर्हरिः ॥ ६ ॥
गोपालरूपमालम्ब्य गोपालान् दानवाधमः ।
मेषायितानपाहार्षीद्व्योमश्चोरायितोऽसकृत् ॥ ७ ॥
गिरिदर्यां स निदधे गोपान् मेषायितान् हृतान् ।
द्वारं तस्याश्च पिदधे पाषाणेन गरीयसा ॥ ८ ॥
चतुःपञ्चावशेषेषु गोपेषु विदितच्छलः ।
तं जग्राह निनीषन्तं हरिर्वृकमिव प्रभुः ॥ ९ ॥
तं निजं रूपमाश्रित्य युयुत्सुमतिदारुणम् ।
निपात्य दोर्भ्यां भूपृष्ठे निजघान जनार्दनः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



प्रभुः प्रेमवतीर्हित्वा प्रस्थितो मथुरां प्रति ।
अक्रूर इति दीनं मां रक्षेदेव दयानिधिः ॥

“गुजराती” प्रिंटींग प्रेस–मुंबई

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः पिधानपाषाणं निःसार्य सदनं निजम्।
दरीगतैर्गोपसुतैः सहेयाय प्रमोदितैः॥ ११॥

केशिवधः नारदागमः व्योमासुरवधश्च।

(३८) अष्टत्रिंशे नन्दसूनुसन्दर्शनसमुत्सुकः।
अक्रूरः स्यन्दनारूढो निर्ययौ मथुरापुरः॥ १॥
सायं समागतः सोऽयं यथासंकल्पमादृतः।
यथोचितं सत्कृतश्च मुमुदे नन्दसूनुना॥ २॥

अक्रूरागमनम्।

(३९) नवत्रिंशे तु कंसस्य तादृशं तं दुराशयम्।
परिज्ञाय (१)व्यवससौ गन्तुं स भ्रातृको हरिः॥ १॥
श्वोभूते निर्जिगमिषुं प्रेयांसं नन्दनन्दनम्।
ज्ञात्वाऽक्रूरं गर्हयन्त्यो व्यलपन् व्रजयोषितः॥ २॥
उदिते भास्वति हरिरक्रूरपरिकल्पितम्।
गोपीः समाश्वास्य ययौ साग्रजो रथमाश्रितः॥ ३॥

उपायनं समादाय विविधं सह गोरसैः।
गोपाश्च शकटारूढाः श्रीकृष्णमनु निर्ययुः॥ ४॥
मग्नो माध्याह्निकं कर्तुमक्रूरो यमुनाजले।
सहोपविष्टौ प्रैक्षिष्ट रामकृष्णौ सिताननौ॥ ५॥
साशङ्कः पुनरुन्मज्य तौ निरीक्ष्य रथस्थितौ।
पुनर्निमग्नः सोऽपश्यच्चक्षुषा शेषशायिनम्॥ ६॥
बद्धाञ्जलिपुटः सोऽथ तं यथाश्रुतलक्षणम्।
प्रणतः स्तोतुमारेभे भक्तिगद्गदभाषितः॥ ७॥

अक्रूरस्य जले भगवद्दर्शनम्।

(१) व्यवसायं (उद्योगं) चकार।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४०) चत्वारिंशे गुणैर्योगाद्विविधाकारधारिणम् ।
स्तौति स शुद्धं नैर्गुण्यादक्रूरः सर्वसाक्षिणम् ॥ १ ॥

भगवत्स्तुतिः ।

(४१) एकचत्वारिंशके तु मुदिताक्रूरसंयुतः ।
मथुरोपवनं प्राप हरिः संप्राप्तगोपकम् ॥ १ ॥
विससर्ज ततोऽक्रूरमनिच्छन्तमपि प्रभुः ।
हताहितः समेष्यामि त्वद्गृहानिति भाषितैः ॥ २ ॥
अथ पौरैः प्रमुदितैः प्रशंसद्भिः प्रसादितः ।
पुरीं गोपैः परिवृतः सबलः प्राविशत् प्रभुः ॥ ३ ॥
धौतवस्त्रोच्चयधरं प्रार्थ्यमानमपि स्वयम् ।
कद्वदं रजकं कृष्णः प्रजिघाय यमालयम् ॥ ४ ॥
यथाऽभिरुचितं वासः सगोपः साग्रजो हरिः ।
पर्यधान्मण्डितश्चाभूद्वायकेन प्रसीदता ॥ ५ ॥
सुदाम्नो मालिनः सद्म प्राप्य तेन समादृतः ।
अलङ्कृतश्च निरगाद्दत्तभक्तिवरो हरिः ॥ ६ ॥

रजकवधः सुदाम्नोऽनुग्रहश्च ।

---

(१) स्तुतिपरिपाटी च यथा—

[१] आनन्दामृतसिन्धुं, चिद्वीचीभिः समीचीनम् ।
निगमान्तमात्रसेतुं, हेतुं विश्वस्य शाश्वतं वन्दे ॥

[२] अपरिच्छिन्नमरूपं, चिदेकरूपं गुणातीतम् ।
करणव्याप्टतिकारण,मकारणं कंचिदेकमवलम्बे ॥

[३] शैवी शाक्ती सौरी, हैरम्बी वैष्णवी सरणिः ।
सरिदावलीव सिन्धुं, भवन्तमेवोपतिष्ठते भगवन् ! ॥

[४] झषकच्छपादिरूपैर्मलिनेऽब्धौ खेलतैव सता ।
श्याम ! स्वच्छतरं स्वं, धाम परे निन्यिरे भवता ॥

इत्यादिका । [हरिवरिवस्या, स्तुति०]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४२) द्विचत्वारिंशके दासीं कुब्जां दत्तविलेपनाम् ।
ऋजुतां प्रापयामास हरिः सकमनीयताम् ॥ १ ॥
आकर्षन्तीमुत्तरीयं निनीषन्तीं निजं गृहम् ।
साधितार्थः समेष्यामीत्येनां व्यसृजदच्युतः ॥ २ ॥
पृच्छन् पौरान् प्रभुः प्राप्तः पुरतो दुर्धरं धनुः ।
गुप्तं ददर्श बहुभिर्दुर्धर्षैराजपूरुषैः ॥ ३ ॥
हरिः प्रबलदोर्दण्डः कुण्डलीकृत्य सत्वरः ।
इक्षुदण्डं द्विप इव खण्डयामास तद्धनुः ॥ ४ ॥
क्रुद्धानापततः क्रूरान् सायुधाँश्चापरक्षिणः ।
आत्ताभ्यां चापखण्डाभ्यां रामकृष्णौ निजघ्नतुः ॥ ५ ॥
सूर्येऽस्तशिखरं प्राप्ते सर्वैः सहचरैः सह ।
प्रत्यागाच्छकटैः पूर्णं मथुरोपवनं हरिः ॥ ६ ॥
अन्येद्युर्दुर्निमित्तौघदर्शी रङ्गस्थलं व्यधात् ।
गोपीवल्लभघाताय कंसो मल्लगणावृतम् ॥ ७ ॥

धनुर्भङ्गः ।

(४३) त्रिचत्वारिंशके श्रुत्वा मल्लदुन्दुभिनिस्वनम् ।
मुकुन्दः साग्रजः प्राप रङ्गद्वारं सकुञ्जरम् ॥ १ ॥
दन्तावलं रुद्धमार्गमेनं कुरु पराङ्मुखम् ।
इत्यम्बष्ठं हरिः प्रोचे स चक्रेऽभिमुखं खलः ॥ २ ॥
अम्बष्ठनोदितो दन्ती समभिद्रुत्य केशवम् ।
अगृह्णात्त्वरया सोऽपि लाघवेन व्यमुच्यत ॥ ३ ॥
अङ्घ्रिलीनः पुष्करेण स्पृश्यमानः पुनः प्रभुः ।
पुच्छे निगृह्य तं नागं भ्रमयामास भूरिशः ॥ ४ ॥
अथ संमुखमभ्येत्य निहत्यदृढमुष्टिभिः ।
प्राद्रवत् स्पृश्यमानः सन् दूरं कृष्णः पदे पदे ॥ ५ ॥
पतित्वा पुनरुत्थाय लाघवेनाऽन्यतो गतम् ।
हरिं निपतितं मत्वा दन्ताभ्यां प्राहरद्गजः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृथाभूतप्रयासश्च पुनरम्बष्ठनोदितः ।
धावन् प्रहर्तुं हरिणा करप्रान्ते न्यगृह्यत ॥ ७ ॥
समाकृष्य बलोद्रेकाद्दन्तमुत्पाट्य सत्वरः ।
जघानाम्बष्ठसहितमेनं तेन बलानुजः ॥ ८ ॥
यथाप्रकृति भेदेन पौरैरुल्लिखितो हरिः ।
रङ्गमण्डपमापेदे वर्ण्यमानगुणोदयः ॥ ९ ॥
"एहि कृष्ण ! बलिष्ठोऽसि नियुध्येमहि धर्मतः" ।
चाणूर इत्यनिच्छन्तमिव प्रोचे मदोद्धतः ॥ १० ॥

कुवलयापीडगजवधः ।

(४४) चतुश्चत्वारिंशके तु चाणूरेण स केशिहा ।
न्ययुध्यत सगर्वेण मुष्टिकेन प्रलम्बहा ॥ १ ॥
चिरं नियुध्य भगवाँश्चाणूरं भ्रमयन् बहु ।
निश्चेष्टं पातयामास शक्रध्वजमिव क्षितौ ॥ २ ॥
रामोऽपि युध्वा सुचिरं मुष्टीमुष्टि तलातलि ।
मुष्टिकं पातयामास रुधिरोद्गारिणं व्यसुम् ॥ ३ ॥
रामेण कूटः, कृष्णेन मल्लाग्र्यौ शलतोशलौ, ।
निहताः सात्वसेनान्ये,ऽधिजग्मुरुचितां गतिम् ॥ ४ ॥
मञ्चमुत्तुङ्गमाश्रित्य कंसं दुर्वचनं स्थितम् ।
खड्गपाणिं समाकृष्य भूतलेऽपातयत् प्रभुः ॥ ५ ॥
तस्योपरिष्टाद्दुष्टस्य निपत्य स्वयमच्युतः ।
जहारोच्छलतः प्राणान् सर्वेषामेव पश्यताम् ॥ ६ ॥
सन्ततानुध्यानवशात् कंसः प्राप्तमहाभयः ।
हरेः सरूपतां प्राप कृतपापसमुच्चयः ॥ ७ ॥
कंसानुजान् रुषाऽऽयातान् कङ्कन्यग्रोधकादिकान् ।
निहत्याऽऽश्वासयामास मुकुन्दः कंसयोषितः ॥ ८ ॥

चाणूरादिमल्लानां कंसस्य च वधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

MAHENDRA SANSKRIT UNIVERSITY
वाल्मीकि विद्यापीठ-पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



धृतजरौ बत! बन्धविमोचितौ
प्रमुदितौ पितरौ वरिवस्यते ।
अकृतिनं च निजं वदते स्वयं
प्रकृति-वेशवधू-पतये नमः ॥

"गुजराती" प्रिंटींग प्रेस-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४५) शरवेदमितेऽध्याये हरिणा पितरौ निजौ ।
सान्त्वितौ स्निग्धया वाचा परां मुदमवापतुः ॥१ ॥
अभिषिच्योग्रसेनं स मातामहमनुव्रतः ।
कंसभीत्या गतान्बधून्सदकार्षीत्समागतान् ॥ २ ॥
साशङ्कमनुयातं च नन्दं वृत्तान्तवेदिनम् ।
यथोचितं पुरस्कृत्य प्राहिणोत्सदनं हरिः ॥ ३ ॥
ततः क्षात्रेण विधिना वसुदेवेन संस्कृतौ ।
गुरुं सान्दीपनिं प्राप्तौ रामकृष्णौ धृतव्रतौ ॥ ४ ॥
अचिरादेव सकला विद्याः सान्दीपनेर्गुरोः ।
तावुभावध्यगीषातां चतुःषष्टिकलान्विताः ॥ ५ ॥
यमपुर्याः समानीय जीवितं स्वगुरोः सुतम् ।
साग्रजो हरिराहैनं किमन्यत्करवावहै ॥ ६ ॥
साधु सन्तुष्यता तेन गुरुणाऽनुमतौ ततः ।
तौ स्यन्दनेन स्वपुरीं प्रत्याजग्मतुरादृतौ ॥ ७ ॥

भगवतोर्गुरुकुलनिवासः ।

(४६) रसवेदमितेऽध्याये नन्दादीन्गोपिका अपि ।
सान्त्वयन्प्रेषयामास सद्बुद्धिं व्रजमुद्धवम् ॥ १ ॥
स च व्रजं समागच्छत्सौम्यपीवरगोकुलम् ।
रामकृष्णगुणोद्गारिनारीजनसमाकुलम् ॥ २ ॥
नन्द उद्धवमायातं समादृत्य यथोचितम् ।
उत्कण्ठितः सन्नपृच्छद् बन्धूनां सर्वतो हितम् ॥ ३ ॥
स्मारंस्मारं भगवतश्चरितान्यपि कीर्तयन् ।
रुद्धकण्ठोऽभवन्नन्दः साश्रुप्रसरलोचनः ॥ ४ ॥
उद्बुद्धेन यशोदा च स्नेहेन सरलाशया ।
उत्ससर्ज स्तनाग्राच्च नेत्राच्च प्रचुरं पयः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्धवः शुद्धयोः प्रेक्ष्य तयोस्तां तादृशीं दशाम्।
प्रभुं स्मरन्प्रत्यवदद्धर्षगद्गदभाषितः ॥ ६ ॥
मैवं विषीदतं भद्रौ ! धन्यौ स्थः परमात्मनि।
पुमाकारे ययोरासीदसीमा प्रीतिरीदृशी ॥ ७ ॥
सत्यप्रतिश्रुतः कृष्णः कृतवेदी समुत्सुकः।
संप्राप्तावसरः प्राप्य युवामानन्दयिष्यति ॥ ८ ॥
इत्यादि जल्पतां तेषां सा व्यतीयाय शर्वरी।
प्रातः प्रशुश्रुवे धीरो दधिनिर्मन्थनध्वनिः ॥ ९ ॥

उद्धवस्य व्रजे गमनम्।

(४७) वाजिवेदमितेऽध्याये तूद्धवं वीक्ष्य गोपिकाः।
प्रियं स्मरन्त्यः सानन्दाः परिवव्रुः समुत्सुकाः ॥ १ ॥
विविक्तवर्तिनं कृत्वा तं सत्कृत्य कृतस्मिताः।
ऊचिरे रुचिरा वाचस्त्यागरुष्टास्तथोचिताः ॥ २ ॥
प्रियकर्माणि गायन्त्यः साश्रुनेत्रा गतत्रपाः।
उद्धवस्य पुरः सर्वा रुरुदुर्द्रुतचेतसः ॥ ३ ॥
काचिच्छृण्वति सश्रद्धमुद्धवे मञ्जुगुञ्जनम्।
उत्प्रेक्ष्य दूतं मधुपमुपालभत वल्लभम् ॥ ४ ॥
इति प्रणयबद्धानां गोपीनां तादृशीं गतिम्।
निरीक्ष्य श्रावयामास सन्देशं केशवस्य सः ॥ ५ ॥
उद्धवः श्रुतसन्देशा गोपिका भक्तिसंभृताः।
नन्दं सदारं गोपांश्चाऽऽमन्त्र्यागान्मथुरां पुरीम् ॥ ६ ॥

नन्दादिसान्त्वना।

(४८) गजवेदमितेऽध्याये भगवान् भक्तवत्सलः।
कुब्जायाः सदनं प्राप्य विजहार यथार्थितम् ॥ १ ॥
तत उद्धवरामाभ्यामक्रूरभवनं गतः।
नमताऽर्चयता तेन स्तूयते स्म जगत्पतिः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथातनयवृत्तान्तमधिगन्तुं गजाह्वयम् ।
गन्तुमादिश्य तं प्राप मुकुन्दः स्वस्य मन्दिरम् ॥ ३ ॥

कुब्जानुग्रहोऽक्रूरप्रेषणं च ।

(४९) नन्दवेदमितेऽध्यायेऽक्रूरः कुरुभिरादृतः ।
उवास कतिचिन्मासान् कार्यार्थी गजसाह्वये ॥ १ ॥
विदुरात् पाण्डुपुत्रेषु धृतराष्ट्रस्य भूपतेः ।
गरदानादिकां वृत्तिं गर्हणीयां विवेद सः ॥ २ ॥
पितुः कुलं संस्मरन्त्या विविधक्लेशतप्तया ।
रुदन्त्या विदितार्थोऽयं चक्रे कुन्त्याऽपि खिन्नया ॥ ३ ॥
मुखेऽमृतमयाकारं चेतसि क्रकचाकृतिम् ।
परर्द्धिगर्धया पूर्णं धृतराष्ट्रमबुद्ध सः ॥ ४ ॥
प्रबोधितं कुरुपतिं पाण्डवाँश्च समातृकान् ।
आपृच्छ्य रथमारूढः प्रत्यागच्छत् स माधवम् ॥ ५ ॥

अक्रूरप्रत्यागमः ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
दशमस्कन्धपूर्वार्धः समक्षेपि यथामति ॥ १० ॥

॥ पद्यसंकलनाङ्काः ३१५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः १० उत्तरार्धः)

दृसान् बार्हद्रथमुखान् दुर्जयानखिलान् खलान् ।
दिष्टान्तं प्रापयन्देयादिष्टं नो द्वारकापतिः ॥ १०-२ ॥

(५०) व्योमबाणमितेऽध्यायेऽस्तिप्राप्ती कंसयौषितौ ।
जरासन्धं स्वपितरं कृष्णवृत्तान्तमूचतुः ॥ १ ॥
अक्षौहिणीः सहाऽऽदाय त्रयोविंशतिसंमिताः ।
जरासन्धः समागत्य न्यरुन्ध मथुरां पुरीम् ॥ २ ॥
अथ ध्यायति गोविन्दे सुन्दरौ सपरिच्छदौ ।
अम्बरादुपतस्थाते रथौ सन्नद्धसारथी ॥ ३ ॥
सज्जौ च तावधिष्ठाय रामकृष्णौ ससैनिकौ ।
जरासन्धस्य पृतनां नामशेषां वितेनतुः ॥ ४ ॥
रामेण हन्यमानं च जरासन्धं जनार्दनः ।
मोचयामास कार्यार्थी, निरगच्छत् स लज्जितः ॥ ५ ॥
एवं विजित्य विख्यातं वीरं बार्हद्रथं हरिः ।
साग्रजः स्वां पुरीं प्राप जयोत्सवसमुत्सुकाम् ॥ ६ ॥
अक्षौहिणीः सहाऽऽदाय तावतीर्मगधाधिपः ।
वारान् सप्तदशाऽऽयातः प्रपेदे प्राणशेषताम् ॥ ७ ॥
आयास्यति पुनस्तस्मिन् म्लेच्छकोटित्रयावृतः ।
अभ्याजगाम यवनः प्रचुराहङ्कृतिर्हरिम् ॥ ८ ॥
सत्रा रामेण संमन्त्र्य भ्रात्रा योगेश्वरो हरिः ।
मध्येपयोधि विदधे दुर्गं द्वादशयोजनम् ॥ ९ ॥

(१) साकं सत्रा समं सह इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्येदुर्गं द्वारकाख्यां निर्माय नगरीं प्रभुः ।
निनाय मोहितान् सर्वाञ्छर्वर्यामेव नागरान् ॥ १० ॥
अग्रजं मथुरां त्रातुमादिश्य यवनाग्रतः ।
एको विविक्तगः प्राप रिक्तबाहुर्जगत्पतिः ॥ ११ ॥

जरासन्धसैन्यवधः ।

(५१) विधुबाणमितेऽध्याये यवनोऽनायुधं प्रभुम् ।
आदित्सुरन्वगादात्तं मन्यमानः पदेपदे ॥ १ ॥
आक्षेपिण्यनुयाते च तस्मिन् द्रुतपदो हरिः ।
अप्राप्त एव प्राविक्षत् कां चिद्दीर्घां गिरेर्दरीम् ॥ २ ॥
कोणे निलीय सध्वान्ते माधवे क्वापि तस्थुषि ।
जवनो यवनः प्राप निःश्वसन् कन्दरोदरम् ॥ ३ ॥
तत्र कंचन संप्रेक्ष्य निद्रितं वस्त्रमुद्रितम् ।
दुर्वदन् प्रपदेनैव ताडयामास सोऽधमः ॥ ४ ॥
ततः प्रबोधनक्रुद्धतच्चक्षुस्तीव्ररोचिषा ।
आससाद स दुष्टात्मा यवनः शालभीं दशाम् ॥ ५ ॥
अथाऽवलोक्य पुरतः समाख्याय निजां कथाम् ।
मुचुकुन्दः कस्त्वमिति मुकुन्दं पृच्छति स्म सः ॥ ६ ॥
प्रसीदता विहसता स्वमाख्यातवता च सः ।
प्रतीच्छ कामान् यच्छामीत्यच्युतेनाऽभ्यधीयत ॥ ७ ॥
अथ गद्गदगीः स्तुत्वा स गोविन्दं कृताञ्जलिः ।
विषयव्रातविमुखो वव्रे भक्तिमहैतुकीम् ॥ ८ ॥
भूदेवप्रवरो भूत्वा तप्त्वा जन्मन्यनन्तरे ।
मुक्तिं गमिष्यसीत्यूचे मुचुकुन्दमधोक्षजः ॥ ९ ॥

कालयवनवधः मुचुकुन्दानुग्रहश्च ।

(५२) पक्षबाणमितेऽध्यायेऽनुगृहीतस्तथा नृपः ।
मुचुकुन्दो हरिं भेजे प्राप्तो बदरिकाश्रमम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाऽऽजगाम सामर्षः ससैन्यो मगधाधिपः ।
रामकृष्णौ च तं वीक्ष्य पद्भ्यां दुद्रुवतुर्द्रुतम् ॥ २ ॥
ग्रहणार्थिनि सानीके जरासन्धेऽनुधावति ।
उत्तुङ्गमारुरुहतुस्तौ प्रवर्षणपर्वतम् ॥ ३ ॥
अनासाद्य निलीनौ तौ निजानीकसमाहृतैः ।
संवेष्ट्य पर्वतं काष्ठैः सर्वतोऽपि ददाह सः ॥ ४ ॥
गिरिशृङ्गात्समुत्तुङ्गात्तावेकादशयोजनात् ।
निपत्य प्रापतुस्तूर्णमज्ञातौ द्वारकां पुरीम् ॥ ५ ॥
तौ निश्चिन्वन् विनिर्दग्धौ जरासन्धः प्रहर्षितः ।
सैन्यमादाय सकलं प्रतस्थे मगधान् प्रति ॥ ६ ॥

जरासन्धप्रतारणा ।

आनर्तदेशाधिपतिः पितामहनिदेशतः ।
रेवतीं प्रददौ कन्यां बलदेवाय रैवतः ॥ ७ ॥
चैद्याय दित्सिता भ्रात्रा रुक्मिणा बलशालिना ।
रुक्मिणी भीष्मकसुता वासुदेवानुरागिणी ॥ ८ ॥
निभृतं ब्राह्मणं कं चित्प्रैषयद्यं स आगतः ।
ब्रह्मण्यदेवेन सता सच्चक्रे कंसघातिना ॥ ९ ॥
मां राक्षसेन विधिनोद्वहेत्यादिनिवेदिकाम् ।
वाचयामास कृष्णाग्रे रुक्मिण्याः स च पत्रिकाम् ॥ १० ॥

रुक्मिणीपत्रिकागमः ।

(५३) वह्निबाणमितेऽध्याये रुक्मिणीप्रणयाऽऽकुलः ।
यथाकालं रथारूढो विदर्भानासदद्धरिः ॥ १ ॥
समेतानेकभूपालान् विदर्भान् प्रति निर्गतम् ।
अन्वगाज्ज्ञातवृत्तस्तं बलः स्वबलसंवृतः ॥ २ ॥
उत्कण्ठितां रुक्मिणीं च कृष्णं प्राप्तं निवेदयन् ।
प्रत्यायातो द्वारकाया भूरि प्राहर्षयद्द्विजः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"गुजराती" प्रिंटींग प्रेस-मुंबई

प्रसह्य रुक्मिणीं प्रेम्णा हरन्नेवाऽनुरागिणीम् ।
अहार्षीर्हन्त ! गोविन्द ! मतिं नः स्वैरचारिणीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समागतं च गोविन्दं विदर्भाधिपतिर्मुदा ।
यथोचितं समादृत्य वासयामास भीष्मकः ॥ ४ ॥

तदा द्वावपि पश्यन्तः प्रशंसन्तः प्रहर्षिताः ।
रुक्मिणीकृष्णयोर्योगमुचितं मेनिरे जनाः ॥ ५ ॥

यथाऽऽचारं भटैर्गुप्ता नगरप्रान्तवर्तिनीम् ।
संपूजयितुमायासीद्रुक्मिणी नगनन्दिनीम् ॥ ६ ॥

प्रार्थयन्ती पतिं कृष्णं भैष्मी भक्तिमती सती ।
सतीसमर्चितां देवीमानर्च भवभामिनीम् ॥ ७ ॥

भवानीं वन्दितवतीं मन्दिराद्बहिरागताम् ।
एतां ददर्श गोविन्दः स्यन्दनारोहणोद्यताम् ॥ ८ ॥

द्विषतां पश्यतामेव दर्पभाजां महीभुजाम् ।
रथे संस्थाप्य वैदर्भीं प्रतस्थे स महाभुजः ॥ ९ ॥

रुक्मिणीहरणम् ।

(५४) वेदबाणमितेऽध्याये रोषरूक्षा महीक्षितः ।
आरादिषून् प्रवर्षन्तः श्रीकृष्णमनुदुद्रुवुः ॥ १ ॥

भैष्मीमाश्वास्य भगवान् भयचञ्चललोचनाम् ।
भुजदर्पं भूमिभुजां चिच्छेद निशितैः शरैः ॥ २ ॥

संकर्षणशरासारपराभूताः समन्ततः ।
त्वरापराः पलायन्त जरासन्धादयो नृपाः ॥ ३ ॥

अक्षौहिणीं सहादाय विजिगीषुरधोक्षजम् ।
कृतप्रतिज्ञोऽनुययौ रुक्मी रोषवशंवदः ॥ ४ ॥

युद्धश्रद्धाऽऽगतं युध्वा हतभूरिपरिच्छदम् ।
छिन्नखड्गं खड्गपाणिर्जग्राह श्यालकं हरिः ॥ ५ ॥

पतन्ती पादयोर्भीता वैदर्भी मञ्जुवादिनी ।
कृष्णं प्रसादयामास भ्रातृजीवितकाङ्क्षिणी ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाससा तं पुरो बध्वा बध्वा दर्पसमुद्धतम् ।
सश्मश्रुकेशवपनाद्विरूपं व्यदधात्प्रभुः ॥ ७ ॥
अनुयातेन रामेण वैदर्भी परिबोधिता ।
वैमनस्यं जहाति स्म भ्रातृवैरूप्यसंभवम् ॥ ८ ॥

अनिस्तीर्णप्रतिज्ञश्च पुरं भोजकटाभिधम् ।
निर्माय रुक्मी न्यवसत्समन्युः समयाशया ॥ ९ ॥

इति विक्रम्य भगवान् पुरमानीय रुक्मिणीम् ।
विधिं वैवाहिकं कृत्वा व्यधत्त सहचारिणीम् ॥ १० ॥

रुक्मिदण्डनम् ।

(५५) भूतबाणमितेऽध्याये वैदर्भीगर्भसंभवम् ।
कन्दर्पं शम्बरो हृत्वा सागराम्भस्यमज्जयत् ॥ १ ॥
मीनस्तं जग्रसे तं च सहान्यैर्मत्स्यजीविनः ।
उपाहरञ्छम्बराय सूदेभ्योऽर्पयति स्म सः ॥ २ ॥
मीनोदरगतं बालं प्राप्य सूदैः समर्पितम् ।
मायावती नाम रतिः प्रापुष्णाज्जानती पतिम् ॥ ३ ॥
तद्यौवने वृषस्यन्ती प्रत्याख्याता च तेन सा ।
अधर्मभीरुणा प्रोचे वृत्तान्तं सर्वमादितः ॥ ४ ॥
अथ मायावतीदत्तां विद्यामादाय दुर्जयः ।
चिच्छेद युध्यमानस्य शम्बरस्य शिरः स्मरः ॥ ५ ॥
प्रियया व्योमयायिन्या स्वकीयां प्रापितः पुरीम् ।
दृष्टः कृष्णभ्रमं कार्ष्णिर्जनयामास योषिताम् ॥ ६ ॥
समातरं सपितरं सदारं साग्रजं प्रभुम् ।
विस्मितं प्राप्य वृत्तान्तं तमवोचत नारदः ॥ ७ ॥
इति नष्टं चिरायातं हरन्तं पश्यतां मनः ।
सदारं प्रेक्ष्य कन्दर्पं सर्वोऽपि मुमुदे जनः ॥ ८ ॥

प्रद्युम्नप्राप्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५६) रसबाणमितेऽध्यायं ददृशुर्द्वारकौकसः ।
स्यमन्तकोद्योतिताङ्गं भूपं सत्राजितं जनाः ॥ १ ॥
स्यमन्तकं स्वर्णभारानष्टौ मुञ्चन्तमन्वहम् ।
प्रार्थयन्नुग्रसेनार्थे नाप सत्राजिताद्धरिः ॥ २ ॥
भ्राजिष्णुस्तेन मणिना मृगयार्थी कदाचन ।
सत्राजितानुजः प्राप प्रसेनो वाजिना वनम् ॥ ३ ॥
हत्वा हयेन सहितं प्रसेनं तत्र केसरी ।
भासुरं मणिमादाय चचार गिरिगोचरः ॥ ४ ॥
तं च हत्वा मणेर्हेतोर्जाम्बवान्छ्रितकन्दरः ।
स्वकुमारक्रीडनकं चकार बलवत्तरः ॥ ५ ॥
ततः सत्राजितः शोचन् विपिने मणिधारिणः ।
प्रसेनस्य निहन्तारं श्रीकृष्णं समभावयत् ॥ ६ ॥
जप्यते स्म प्रतिगृहं प्रतिकर्णं शनैःशनैः ।
तं मणिं याचितवतो दुर्यशः श्रीहरेर्जनैः ॥ ७ ॥
कलङ्कमेनमुन्मार्ष्टुं सनागरजनो हरिः ।
प्रयातो विपिनेऽपश्यत् प्रसेनं सहयं हतम् ॥ ८ ॥
दृष्ट्वा केसरिणं दीर्णं परासुमुपकन्दरम् ।
पौरान् बहिरवस्थाप्य सोऽविशत् कन्दरोदरम् ॥ ९ ॥
मणिं प्रलम्बमानं तमुपसर्पति माधवे ।
उपार्भकं स्थिता धात्री चुक्रोश धृतसाध्वसा ॥ १० ॥
ससम्भ्रममथाऽऽयातो जाम्बवानकृतश्रमः ।
यथाप्रकृति दुर्धर्षो युयुधे गिरिधारिणा ॥ ११ ॥
त्रयोदशे दिने पौरा अनिर्याते जनार्दने ।
प्रत्यावर्तन्त नगरीं धृतदुःखभराः शनैः ॥ १२ ॥
स्थिरेतरधियः खिन्ना वसुदेवपुरःसराः ।
ध्वस्तभक्तविपद्वर्गां श्रीदुर्गामुपतस्थिरे ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रिन्दिवं युध्यमानो जाम्बवान् परमेश्वरम् ।
क्षीणशक्तिः पर्यचैषीदष्टाविंशतिवासरैः ॥ १४ ॥
दशास्यघातिनं नाथं स्तुत्वा स विहिताञ्जलिः ।
कन्यारत्नं जाम्बवतीं तद्रत्नं च ददौ मुदा ॥ १५ ॥
सदारं समणिं प्राप्तं गोविन्दं वीक्ष्य नागराः ।
उदलङ्घन्त सीमानमानन्दस्य कृतादराः ॥ १६ ॥
सत्राजितमथाऽऽकार्य कार्यवेत्ता जनार्दनः ।
उक्तोदन्तः सभामध्ये ग्राहयामास तं मणिम् ॥ १७ ॥
सत्राजितः सत्यभामां सरत्नामेव सत्वरः ।
स्वदौर्जन्यानुतप्तः स्वां कन्यां श्रीहरये ददौ ॥ १८ ॥
मध्यक्षामां सत्यभामामङ्गीकृत्य जगत्पतिः ।
प्रत्याचख्यौ मणिं ख्यातं किरञ्छ्रोत्रसुखां गिरम् ॥ १९ ॥

स्यमन्तकोपाख्यानम् ।

(५७) वाजिबाणमिते कृष्णः समातृन् वारणावते ।
दग्धान् पाण्डुसुताञ्छ्रुत्वा साग्रजः प्रययौ कुरून् ॥ १ ॥
अक्रूरकृतवर्मभ्यां शतधन्वा तदन्तरे ।
प्रोत्साहितोऽहन् मणये सुप्तं सत्राजितं निशि ॥ २ ॥
विलपन्ती सत्यभामा तैलद्रोण्यां पितुर्वपुः ।
निधाय स्वामिनं प्राप हस्तिनापुरवर्तिनम् ॥ ३ ॥
सदारः साग्रजः प्राप्य द्वारकां द्रुतमच्युतः ।
निहन्तुं शतधन्वानमारेभेऽकार्यकारिणम् ॥ ४ ॥
प्रत्याख्यातः सहायार्थी बिभ्यता कृतवर्मणा ।
सोऽक्रूरशरणं प्राप प्राणत्राणपरायणः ॥ ५ ॥
निराकृतश्च तेनाऽपि तस्मिन् न्यस्य महामणिम् ।
पलायताश्वमारुह्य शतयोजनधाविनम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामकृष्णौ रथारूढावनुयान्तौ त्वरान्वितौ ।
ददृशुर्मिथिलायां तं मृताश्वं पादचारिणम् ॥ ७ ॥
अनुद्रुत्य हरिः पद्भ्यां तं निहत्य मणिं च तम् ।
अलब्ध्वाऽग्रजमागत्य तं वृत्तान्तमवोचत ॥ ८ ॥
प्रियं द्रष्टुं प्रयामीति प्रययौ जनकं बलः ।
कृष्णस्तेन समादिष्टः प्रत्यागाद् द्वारकां पुरीम् ॥ ९ ॥
अक्रूरकृतवर्माणौ निधनं शतधन्वनः ।
आकर्ण्य पुर्याः संत्रस्तौ व्यूषतुः कृतकिल्बिषौ ॥ १० ॥
काश्यां स्यमन्तकोद्भूतप्रभूतधनदानतः ।
दानपत्याख्ययाऽक्रूरः पृथिव्यां पप्रथेतराम् ॥ ११ ॥
ऊचे साम्ना तमानीय त्वयि न्यस्तो बलान्मणिः ।
संशयं दूरयन्नाविर्भवत्विति जनार्दनः ॥ १२ ॥
इति साम्नानुनीतेन दर्शितं तेन माधवः ।
तस्मा एवार्पयामास विशुद्धिमुदितो मणिम् ॥ १३ ॥

शतधन्ववधः अक्रूरान्मणेः प्राप्तिश्च ।

(५८) गजबाणमितेऽध्याये कृतदारान् पृथासुतान् ।
इन्द्रप्रस्थगतान् द्रष्टुं जगाम गरुडध्वजः ॥ १ ॥
सख्या पार्थेन विहरन् कालिन्दीं स्वाभिलाषिणीम् ।
तपस्यन्तीं सहानैषीद्गोविन्दः सूर्यनन्दिनीम् ॥ २ ॥
प्रत्यायातः स्वनगरीं कालिन्दीं परिणीय सः ।
जह्रे पितृष्वसुः पुत्रीं मित्रविन्दां स्वयंवरे ॥ ३ ॥
अथ सप्त वृषाञ्जित्वा सत्यां नाग्नजितीं हरिः ।
भूयसा पारिबर्हेण सह जग्राह सुन्दरीम् ॥ ४ ॥
अन्यस्मै दित्सितां कृष्णः श्रुतकीर्तेः पितृष्वसुः ।
भद्राभिधां च तनयामाजहार स्वयंवरात् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मद्राधिनाथस्य कन्यां लक्षणलक्षिताम् ।
लक्ष्मणां वीक्षमाणानां जह्रे कृष्णः क्षितिक्षिताम् ॥ ६ ।

कालिन्द्यादीनां पञ्चानां परिणयः ।

(५९) निधिबाणमिते शक्रप्रार्थितः खगमास्थितः ।
भौमं जिघांसुर्निरगात् सत्यभामान्वितो हरिः ॥ १ ॥
धुरन्धरं शौर्यभाजां भौमं सुचिरयोधिनम् ।
हरिर्जघान चक्रेण लोकपालविरोधिनम् ॥ २ ॥
प्रार्थयन्तीं भक्तिमतीं भूमिं समनुगृह्य सः ।
विवेश भौमसदनं कुबेरसदनाधिकम् ॥ ३ ॥
तत्र राजन्यकन्यानां धन्यानां यौवनश्रिया ।
ददर्श दर्शनीयानां स सहस्राणि षोडश ॥ ४ ॥
सानुरागाश्च ताः सर्वाः प्राहिणोद् द्वारकां प्रभुः ।
चतुःषष्टिमितान् मत्ताँश्चतुर्दन्ताँश्च दन्तिनः ॥ ५ ॥
भौमाऽऽच्छिन्ने कुण्डले च प्राप्य स्वर्गं गरुत्मता ।
प्रादाददित्यै भगवान् पूज्यमानो मरुत्त्वता ॥ ६ ॥
शार्ङ्गधन्वा प्रियाप्रोक्तो विजित्य विबुधर्षभान् ।
पारिजातं स्वमुद्यानमानयद्भृङ्गसङ्गतम् ॥ ७ ॥
यावन्ति योषिद्रत्नानि तावद्रूपधरो हरिः ।
रेमे तावत्सु सौधेषु प्रभूतप्रणयादृतः ॥ ८ ॥

भौमवधः पारिजातहरणं च ।

(६०) व्योमर्तुप्रमितेऽध्याये प्रणयात्कोपयन् प्रियाम् ।
वीजयन्तीं चामरेण भैष्मीं प्रभुरभाषत ॥ १ ॥
राजपुत्रि ! स्वसदृशान् सलक्ष्मीकान् महीपतीन् ।
अवृत्वा मादृशान् रिक्तानवृथास्त्वं कुतो ? वृथा ॥ २ ।
जहीहि नः श्रियाहीनानुदासीनानकिञ्चनान् ।
भजस्व भूभृतं कंचिद्भूरिवैभवसंभृतम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोर्दर्पमेव द्विषतां दूरीकर्तुं विदर्भतः ।
समानीतासि जानासि ? भद्रे ! त्वं नानुरागतः ॥ ४ ॥
इतीरिता भगवता भीता भीष्मकनन्दिनी ।
श्लथगात्री कीर्णकेशी पतन्ती प्राप मेदिनीम् ॥ ५ ॥
अथोत्थाप्य समाश्लिष्य केशान् संनह्य केशवः ।
प्रोञ्छन् कराभ्यामश्रूणि तां बभाषे विषादिनीम् ॥ ६ ॥
प्रिये ! मैवं विषीद, त्वां वेद्मि तत्त्वानुरागिणीम् ।
न प्रद्युम्नप्रसूर्वेत्सि त्वमहो ! मर्म नर्मणः ॥ ७ ॥
चिन्तादहनदग्धानां काले क्लेशेन गच्छति ।
मुग्धे ! प्रणयिवर्गेण नर्म शर्म प्रयच्छति ॥ ८ ॥
इति वाचं प्रभोः सत्यामवगत्य धृतस्मिता ।
सत्रपं च सहर्षं च प्रत्यभाषत भीष्मजा ॥ ९ ॥
क्वापि नैवानुरक्तोऽसि प्रिय ! रिक्तोऽसि सर्वतः ।
त्रिगुणा नानुरूपाऽस्मि निर्गुणस्य च ते सतः ॥ १० ॥
भूखण्डखण्डितमतीननेकानेकदुर्गुणान् ।
भवत्कृपापात्रतया स्थाने नावारिषं नृपान् ॥ ११ ॥
अकिञ्चनोऽसि भगवन् ! दूरतोऽसीति गीयसे ।
उदासीनोऽसि सर्वत्र न सर्वैः परिचीयसे ॥ १२ ॥
मृत्योरिमां रसवतीं मेदिनीं प्रति लोलुपा ।
कथं भवेयं ? भगवन् ! भवतोऽनुव्रता सती ॥ १३ ॥
इत्यादिवादिनीं प्रेम्णा रुक्मिणीं तरलेक्षणाम् ।
अभ्यनन्दद्धृतानन्दो गोविन्दः स्निग्धया गिरा ॥ १४ ॥

रुक्मिणीपरिहासः ।

(६१) चन्द्रर्तुप्रमितेऽध्याये प्रतिपत्तिन शुभाकृतेः ।
पुत्रा दशोदपद्यन्त पुत्री चैका जगत्पतेः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तावतां कृष्णपुत्राणां विशालगुणशालिनाम् ।
प्रद्युम्नो रुक्मिणीसूनुः सर्वेषामग्रणीरभूत् ॥ २ ॥
श्रीपर्णपर्णनयनां वैदर्भीगर्भसंभवाम् ।
कृतवर्मसुतायादात्कन्यां चारुमतीं हरिः ॥ ३ ॥
जहार द्विषतः सर्वान् जित्वा मातुलनन्दिनीम् ।
स्वयंवरे वृतवतीमेको रुक्मवतीं स्मरः ॥ ४ ॥
प्रद्युम्नादनिरुद्धोऽभूद्रुक्मवत्यां पितुः समः ।
रुक्मी तस्मै ददौ पौत्रीमनुरोधेन रोचनाम् ॥ ५ ॥
प्रोत्साहितश्छद्मभाजा तद्विवाहोत्सवे बलः ।
अक्षैर्दिदेव सोत्साहमनक्षज्ञोऽपि रुक्मिणा ॥ ६ ॥
शतं सहस्रमयुतं पणं क्रमविवर्धितम् ।
न्यस्तवन्तं बलं रुक्मी प्रोचे पश्य मया जितम् ॥ ७ ॥
विलक्षं वीक्ष्य कालिङ्गो बलं लक्षपणोद्यतम् ।
दशनान् दर्शयन् दीर्घानुपाहसदसत्तमः ॥ ८ ॥
अनिर्जितं जितमिति ब्रुवाणं वीक्ष्य रुक्मिणम् ।
बलभद्रः पणीचक्रे न्यर्बुदं शोणलोचनः ॥ ९ ॥
रुक्मिणि स्वजयं जल्पत्युदभूद् व्योमभारती ।
बलो जयीति, स श्रुत्वा चुकोपाऽनल्पविक्रमः ॥ १० ॥
अथोपहासैर्भिन्दन्तं मर्म निन्दन्तमुद्धतम् ।
जघान परिघाघाताद्रुक्मिणं रोहिणीसुतः ॥ ११ ॥
कलिङ्गराजं त्रस्यन्तं द्विषं सन्तं सभान्तरात् ।
निर्गच्छन्तं मुष्टिदानाददन्तमकरोद्बलः ॥ १२ ॥

रुक्मिवधः कालिङ्गदन्तभङ्गश्च ।

(६२) पक्षर्तुप्रमितेऽध्याये बाणनामा महाबलः ।
शोणितं नामनगरमध्यतिष्ठद्बलेः सुतः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताण्डवोल्लाससमये वादनेन प्रसादितः ।
सहस्रबाहोर्यस्यासीत्पुरारिः पुरपालकः ॥ २ ॥
तस्योषा नाम तनया यूना केनापि सुन्दरी ।
संप्राप्य सुरतं स्वप्ने प्रबुध्योदमनायत ॥ ३ ॥
चित्रलेखा सखी तस्याः कलाकौशलशालिनी ।
यूनः प्रदर्शयामास विलिख्य विपुलान् पुरः ॥ ४ ॥
अनिरुद्धं कृष्णपौत्रं पश्यन्ती तत्र सत्रपा ।
चित्तचोरोऽयमेवेति बभाषे बाणनन्दिनी ॥ ५ ॥
अनिरुद्धं चित्रलेखा योगिनी व्योमवर्त्मना ।
सपर्यङ्कं समानैषीच्छयानं शोणितं पुरम् ॥ ६ ॥
निरुद्धजनसंचारेऽनिरुद्धसहचारिणी ।
निशान्ते सा मुदा रेमे निशान्तेऽभूद्विषादिनी ॥ ७ ॥
संभोगलक्ष्मसाशङ्कैरन्तःपालैर्निवेदितः ।
उषान्तःपुरमायासीद्रुषा बाणः कृतत्त्वरः ॥ ८ ॥
अक्षैर्दीव्यन्तमुषया विलसत्पाणियुग्मया ।
स्मितानुबद्धवदनमनिरुद्धं ददर्श सः ॥ ९ ॥
भटाँल्लौहेन दण्डेन निघ्नन्तमुपयायिनः ।
बबन्ध नागपाशेन बाणस्तं बलवत्तरः ॥ १० ॥
ताराक्रन्दान् साश्रुधारान् भीभाराक्रान्तचेतसः ।
दारान् पश्यन्नयं वीरः कारागारमनीयत ॥ ११ ॥

अनिरुद्धनिरोधः ।

(६३) रामर्तुप्रमितेऽध्याये हरिर्नारदबोधितः ।
रुरोध शोणितपुरं द्वादशाक्षौहिणीयुतः ॥ १ ॥
बाणार्थे वृषमारूढः सपुत्रः प्रमथैर्वृतः ।
कृष्णसंकर्षणमुखैर्यदुभिर्युयुधे हरः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदर्थयन्तं पृतनां कृतनानास्त्रवर्षणम् ।
विमोहयामास शम्भुं जृम्भणास्त्रेण माधवः ॥ ३ ॥
बाणः शतानि धनुषां पञ्च वामैर्भुजैर्धरन् ।
दक्षिणैर्द्विगुणान् बाणान् सन्दधानः समभ्यगात् ॥ ४ ॥
धनूंषि तानि युगपच्छित्त्वा बाणस्य सायकैः ।
पातयामास सरथं साश्वं सारथिमच्युतः ॥ ५ ॥
आसन्नमरणे बाणे तन्माता प्राप्य कोटरा ।
पुरो बभूव कृष्णस्य मुक्तकेशी दिगम्बरा ॥ ६ ॥
नग्नां निरीक्ष्य गोविन्दे परावर्तितलोचने ।
भग्नात्मीयरथो बाणस्त्वरायुक्तः पलायत ॥ ७ ॥
वैष्णवेन ज्वरेणाथ जितो माहेश्वरो ज्वरः ।
कृष्णं स्तुत्वा च नत्वा च लब्धाभीतिर्विनिर्ययौ ॥ ८ ॥
बाणं तु पुनरायातं बाणश्रेणिप्रवर्षिणम् ।
रुष्टश्चकार भगवाञ्छिष्टबाहुचतुष्टयम् ॥ ९ ॥
अथ रुद्रेणानुनीते श्रीकृष्णे बलिनन्दनः ।
अनिरुद्धं पुरोऽनैषीदुषया योषया समम् ॥ १० ॥

बाणविजयः ।

(६४) वेदर्तुप्रमितेऽध्याये प्रद्युम्नाद्या हरेः सुताः ।
विहरन्तः शुष्ककूपे कृकलासमचक्षत ॥ १ ॥
कृतयत्नास्तमुद्धर्तुमशक्ता जातविस्मयाः ।
न्यवेदयन् भगवते श्रीकृष्णाय समुत्सुकाः ॥ २ ॥
एत्य कृष्णेन संस्पृष्ट उत्सृष्टसरटाकृतिः ।
पृष्टश्च दानवीरं स्वं नृपं नृगमचष्ट सः ॥ ३ ॥
ब्राह्मणस्वामिकां धेनुं भ्रमाद्दत्तवतो मम ।
इयं दशा सत्ययुगादारभ्याद्यावधि स्थिता ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्तनैः सुकृतैरद्य दर्शिताय परात्मने ।
अनन्तशक्तये तुभ्यं श्रीकृष्णाय नमोनमः ॥ ५ ॥
इत्याद्युक्त्वा परिक्रम्य प्रणम्य च जगत्पतिम् ।
व्योमयानं समारुह्य स जगाम निजां गतिम् ॥ ६ ॥
अथ शृण्वत्सु पौरेषु भूरिषु व्यक्तविस्मयान् ।
तनयानात्तविनयानुपादिक्षदधोक्षजः ॥ ७ ॥
हालाहलादपि क्रूरं तीव्रं दावानलादपि ।
ब्रह्मस्वं हन्त ! केनाऽपि नैव प्रतिविधीयते ॥ ८ ॥
पचन्ति कुम्भिनीरेणून् विप्राश्रूणि दुराशयैः ।
यैः पातितानि तेषां भोः ! कुम्भीपाको विधीयते ॥ ९ ॥
ब्रह्मस्वं मधुरास्वादं बत ! येनोपजीव्यते ।
व्याकुलेन कुलेनाऽस्य दह्यमानेन जीव्यते ॥ १० ॥
इत्थमादिश्य भगवानात्मजैरनुयायिभिः ।
समेतः सदनं प्राप पापपुञ्जहराकृतिः ॥ ११ ॥

नृगोद्धारः ।

(६५) बाणर्तुप्रमितेऽध्याये प्राचीनप्रेमयन्त्रितः ।
बलभद्रः स्यन्दनेन प्रययौ नन्दगोकुलम् ॥ १ ॥
सप्रहर्षैर्नन्दमुख्यैरादृतः स यथोचितम् ।
पृष्टश्चानामयं प्रोचे सर्वेषामेव सर्वतः ॥ २ ॥
कृष्णसन्देशकथनाद्विरहानलतापिताः ।
स मन्दतापतां निन्ये विविक्ते व्रजसुन्दरीः ॥ ३ ॥
समधुं माधवं तत्र वसन् सतरुणीगणः ।
बलो विहारमारेभे वसन्तसमयोचितम् ॥ ४ ॥
सुधयैव सहोत्पन्नां वारुणीं वरुणार्पिताम् ।
स मारमन्दगतिभिः साकं युवतिभिः पपौ ॥ ५ ॥

(१) भूपांसून् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विजिहीर्षुर्जले सोऽथ यमुनामाह्वयन्नदीम् ।
अनायान्तीमाचकर्ष सीराग्रेण महाबलः ॥ ६ ॥
अथ भीता मूर्तिमती यमुनोपेत्य पादयोः ।
प्रपन्ना स्तुतिभिश्चक्रे प्रसन्नं यदुनन्दनम् ॥ ७ ॥
ततोऽवगाह्य कालिन्दीं सानन्दः स यथेप्सितम् ।
मन्मथाकुलिताश्चक्रे गोपीर्मन्थरमन्मथाः ॥ ८ ॥
उत्तीर्णाय ततस्तस्मै वाससी भूषणान्विते ।
वैजयन्तीं स्रजं चाऽदात् कान्तिः साक्षात्पुरो गता ॥ ९ ॥

कालिन्दीकर्षणम् ।

(६६) रसर्तुप्रमितेऽध्याये वासुदेवानुकारिणा ।
प्रहितः पौण्ड्रकेणाऽगाद्दूतो गोविन्दसन्निधिम् ॥ १ ॥
"जगत्पतिर्वासुदेवः सोऽहमस्मि चतुर्भुजः ।
मां भजन् यदुदायाद ! लप्स्यसे महतीं श्रियम् ॥ २ ॥
अवस्तुतां समायातैः किं तैस्तैस्तव लक्षणैः ।
शौरे ! तूर्णं विनिर्याहि शरणाय रणाय वा" ॥ ३ ॥
इति पौण्ड्रकसन्देशं श्रुत्वा सदसि तन्मुखात् ।
उग्रसेनादयः सर्वे जहसुः सजनार्दनाः ॥ ४ ॥
द्रुतं सुदर्शनादीनि लक्षणानि तवोपरि ।
एष त्यजामि मूढेति तं प्रत्यूचे श्रियः पतिः ॥ ५ ॥
रथमारुह्य गोविन्दः प्रयातः काशिकां पुरीम् ।
सकाशिराजमवधीत् पौण्ड्रकं रणमूर्धनि ॥ ६ ॥
पौण्ड्रकं ससखं हत्वा प्रत्यायाते जनार्दने ।
काशिराजसुतोऽमर्षी तपस्तेपे सुदक्षिणः ॥ ७ ॥
प्रसीदता शङ्करेण समादिष्टो जुहाव सः ।
कृष्णायाऽभिचरन्नुच्चैर्दक्षिणाग्नौ द्विजैर्वृतः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्रमथसंघातैः सहोद्भूतो हुताशनः।
मूर्तिमान् द्वारकां दग्धुमभिदुद्राव दारुणः॥ ९॥
तेन निर्दह्यमानानां प्राणिनां द्वारकौकसाम्।
श्रुत्वाऽऽक्रन्दं वासुदेवोऽमुञ्चच्चक्रं सुदर्शनम्॥ १०॥
तमाभिचारिकं दग्ध्वा वह्निं सप्रमथव्रजम्।
हरेश्चक्रं निरदहत्तां पुरारेः पुरीमपि॥ ११॥

पौण्ड्रकवधः।

(६७) अश्वर्तुप्रमितेऽध्याये गोविन्दं प्रति वानरः।
नरकस्य सुहृत्त्वेन चुकोप द्विविदो बली॥ १॥
उत्क्षिप्तैर्वारिधेर्वार्भिः शैलैरुत्पाटितैरपि।
आनर्तान् पीडयामास दीपितैर्दहनैश्च सः॥ २॥
जातु रैवतके सोऽयं सुन्दरीवृन्दमध्यगम्।
गीतसक्तं समापेदे रामं पीतपरिस्रुतम्॥ ३॥
कुर्वन् किलकिलारावं शाखामारुह्य कम्पयन्।
भीषयामास दुर्धर्षः स यथाप्रकृति स्त्रियः॥ ४॥
बलेन नुन्नं पाषाणं वञ्चयित्वा प्रकोपयन्।
बिभेद वारुणीपूर्णं कलशं तूर्णमेव सः॥ ५॥
तथोद्धतं तं निहन्तुमाददे स्वं हलं बलः।
स चोद्धृतेन त्वरया शाखिना प्राहरद्धलम्॥ ६॥
जघान मूर्धनि खलं मुसलेन भृशं बलः।
आत्तद्रुमोऽभिदुद्राव शीर्णमूर्द्धा स सत्वरः॥ ७॥
बलेन शतधा च्छिन्ने द्रुमे तस्मिन्नथाऽपरम्।
समुन्मूल्याऽभ्यगात्तं च चिच्छेद शतधा बलः॥ ८॥
इति द्रुमान् बहून् वारानाददानः समन्ततः।
गिरिं रैवतकं चक्रे निर्द्रुमं द्विविदोऽचिरात्॥ ९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिलाः प्रवर्षन् वृहतीस्ताश्च पश्यन्विचूर्णिताः ।
मुष्टिभ्यां ताडयामास मुष्टिकान्तकवक्षसि ॥ १० ॥
बलेन कण्ठमूलेऽथ बलान्निष्पीडिते खलः ।
क्षणेन व्याकुलान् प्राणानसृग्धारां वमञ्जहौ ॥ ११ ॥
द्विविदवानरवधः ।

(६८) गजर्तुप्रमितेऽध्याये साम्बो नाम हरेः सुतः ।
दौर्योधनीं लक्ष्मणाख्यां जहारैकः स्वयंवरे ॥ १ ॥
बहुभिर्युध्यमानोऽयं कर्णमुख्यैर्महारथैः ।
विरथीकृत्य संभूय जगृहे कृतविक्रमः ॥ २ ॥
निरुद्धं कन्यया सार्धं साम्बं कुरुभिरुद्धतैः ।
आचचक्षे भगवते कृष्णायाऽभ्येत्य नारदः ॥ ३ ॥
यदून्युयुत्सून्सकलान्निवार्य गजसाह्वयम् ।
शान्तिकामः कामपालः सत्वरः प्राप सोद्धवः ॥ ४ ॥
प्रहितादुद्धवाद्बुध्वा पुरोपवनवर्तिनम् ।
मङ्गलानि समादाय कुरवो राममाययुः ॥ ५ ॥
अर्चत्सु कुरुवृद्धेषु प्रणमत्सु यथोचितम् ।
स्वं वदञ्छमसाकाङ्क्षमिदमूचे हलायुधः ॥ ६ ॥
आदेशमुग्रसेनस्य शृणुत क्षत्रियर्षभाः! ।
अथो तदनुरूपं च कुरुत क्षेमकाङ्क्षिणः ॥ ७ ॥
संभूय साम्बं यद्यूयं जगृह क्षत्रमानिनः ।
तत्तितिक्षे सकृत्क्षेमं काङ्क्षन्संबन्धिनां सताम् ॥ ८ ॥
ओजस्विनीमिति श्रुत्वा बलदेवसरस्वतीम् ।
दुर्वदन्तः सदर्पास्ते न्यवर्तन्त पुरीं प्रति ॥ ९ ॥
विदार्य धरणीं पौरीं हलाग्रेण ततो हली ।
आचकर्ष शनैरेव पर्यावर्तयितुं पुरीम् ॥ १० ॥
विपर्ययन्तीं नगरीं निरीक्ष्य कुरवस्ततः ।
सलक्ष्मणं पुरोधाय साम्बं राममुपाययुः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसाद्यमानः कुरुभिर्हलमुत्तार्य तां पुरीम् ।
ईषन्निम्नामेव बलः स्थापयामास कीर्तये ॥ १२ ॥
पारिबर्हव्रातयुक्तां वधूमादाय लक्ष्मणाम् ।
नीलाम्बरः प्रतीयाय ससाम्बः स्वां पुरीं प्रति ॥ १३ ॥

हस्तिनापुरकर्षणं साम्बप्रत्यानयनं च ।

(६९) नन्दर्तुप्रमितेऽध्याये दिदृक्षुः कृष्णवैभवम् ।
भक्तः कुतूहलाऽऽक्रान्तो द्वारकां प्राप नारदः ॥ १ ॥
प्रत्यालयं भिन्नरूपे कर्मणि व्यापृतं प्रभुम् ।
सत्कुर्वन्तं स्वमालोक्य मुनिरेष विसिष्मिये ॥ २ ॥
प्रभुं कथापथातीतवैभवं वीक्षितं तथा ।
स्तुत्वा तेनाऽनुशिष्टोऽयं निर्जगाम प्रहर्षितः ॥ ३ ॥

प्रतिगृहं कृष्णदर्शनम् ।

(७०) व्योमवाजिमितेऽध्याये जगन्मङ्गलदायकम् ।
नित्यकृत्यं निजं चक्रे स्नानदानादि केशवः ॥ १ ॥
रथारूढो वृष्णिवीरैः सह निर्गत्य माधवः ।
अध्यतिष्ठत्सुधर्माख्यां षडूर्मिरहितां सभाम् ॥ २ ॥
पुरस्ताद्वृष्णिवीराणां समासीनः शुभासने ।
विभावरीपतिरिव भ्राजते स्म जगत्पतिः ॥ ३ ॥
जरासन्धनिरुद्धानां भीभाजां शरणार्थिनाम् ।
अयुतद्वयसंख्यानां राज्ञां दूतः समाययौ ॥ ४ ॥

राजदूतागमः ।

"राजमेधाभिधात् क्रूरात् कर्मणः पाहि नः प्रभो" ।
इति तेषां स सन्देशं श्रावयामास सस्तुतिम् ॥ ५ ॥
तदात्व एव संप्राप्तः कृतासनपरिग्रहः ।
स्तुत्वा सूनृतया वाचा श्रीशं प्राह स्म नारदः ॥ ६ ॥

नारदागमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"चिकीर्षन् प्राप्य साहाय्यं राजसूयं महामखम् ।
निमन्त्रयति गोविन्द ! भवन्तं पाण्डुनन्दनः" ॥ ७ ॥
इति वाचं समाकर्ण्य जरासन्धवधोत्सुकान् ।
यदुवीरान् समालक्ष्य हरिः पप्रच्छ मन्त्रिणम् ॥ ८ ॥
"याम प्रीत्यै पृथापुत्रसुत ? युद्धाय मागधम् ।
नीतिप्रबुद्ध ! कर्तव्यमुद्धव ! ब्रूहि संशये" ॥ ९ ॥
इत्यच्युतमुखाम्भोजप्रच्युतं तद्वचोमधु ।
स चक्रे श्रवसाऽऽस्वाद्य चञ्चलं रसनाञ्चलम् ॥ १० ॥

मन्त्रणम् ।

(७१) विधुवाजिमितेऽध्याये हरिं प्रावोचदुद्धवः ।
इन्द्रप्रस्थाभिगमनसुभयार्थविधायकम् ॥ १ ॥
प्रधाने पार्थसाहाय्ये क्रियमाणे प्रयास्यति ।
जरासन्धस्य निधनमानुषङ्गिकतामिति ॥ २ ॥
तदुद्धवस्य वचनमभिनन्दञ्जनार्दनः ।
इन्द्रप्रस्थं प्रति प्रीतः प्रतस्थे सवधूजनः ॥ ३ ॥
भगवन्तं प्राप्तवन्तं सदारं साश्रुलोचनः ।
अभ्याजगाम मुदितः सानुजः पाण्डुनन्दनः ॥ ४ ॥
समातृदारपौरेभ्यः कृतवद्भ्यो मुहुर्नमः ।
पृथासुतेभ्यो रुरुचे रमानाथसमागमः ॥ ५ ॥
उद्यच्चन्द्रमुखीः सर्वाः समायाताः सखीसमाः ।
आदद्रे द्रौपदी कृष्णप्रिया भैष्मीपुरोगमाः ॥ ६ ॥
परिच्छदसमाच्छन्नं प्रासादं सादरार्पितम् ।
अध्युवास सह स्त्रीभिर्वासुदेवो यथासुखम् ॥ ७ ॥
नियुज्य सारथीभूय वीरं मध्यमपाण्डवम् ।
स याचता हुतभुजा दाहयामास खाण्डवम् ॥ ८ ॥
भयेन व्याकुलीभूय प्रपन्नेन कलावता ।
मयेन कारयामास रक्षितेन सता सभाम् ॥ ९ ॥

भगवत इन्द्रप्रस्थगमनं खाण्डवदाहनं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७२) पक्षवाजिमितेऽध्याये राजसूयमनोरथम् ।
पृथापुत्रेण जगदे जगदेकाश्रयो हरिः ॥ १ ॥
प्रसीदता भगवताऽनुमतः ककुभां जये ।
प्राहिणोदनुजान्धार्मिश्चतुरश्चतुरस्ततः ॥ २ ॥
विजित्य नृपतीन् सर्वान् वित्तमाहृत्य भूरि ते ।
न्यवेदयन्नग्रजाय जायमानमहामुदे ॥ ३ ॥
ततः सभीमबीभत्सुर्व्रतिवेषः श्रियः पतिः ।
जरासन्धातिसन्धानमभिसन्धाय निर्ययौ ॥ ४ ॥
आतिथ्यसमये प्राप्य त्रयस्ते व्रतिमूर्तयः ।
प्राशंसन् स्वार्थसिद्ध्यर्थं वीरं बार्हद्रथं नृपम् ॥ ५ ॥
आभक्ष्यजातमाप्राणं किं? ददानीति वादिनम् ।
द्वन्द्वयुद्धमयाचन्त तं च ते नीतिवेदिनः ॥ ६ ॥
परिचित्य ततो वाचाऽवधीर्य हरिफाल्गुनौ ।
वव्रे बार्हद्रथो योद्धुं बन्धुराङ्गं वृकोदरम् ॥ ७ ॥
प्रदाय भीमसेनाय महतीमायसीं गदाम् ।
स्वयं चादाय तादृक्षां स जगाम क्षमां समाम् ॥ ८ ॥
ततश्चटचटाशब्दप्रतिध्वनितदिक्तटौ ।
तौ गजाविव सन्नद्धौ युयुधाते महाभटौ ॥ ९ ॥
दिवा तौ कोपकुटिलौ परस्परवधैषिणौ ।
नक्तं स्वस्थौ सविस्रम्भौ मित्रवत् सह तस्थतुः ॥ १० ॥
साधुवादपरिश्रान्तदिदृक्षुजनसन्ततिः ।
एवमेव व्यतीयाय दिनानां सप्तविंशतिः ॥ ११ ॥
अथ भीमं पटीयांसं विटपं पाटयन् पुरः ।
खिन्नं प्रोत्साहयामास भक्तत्रासहरो हरिः ॥ १२ ॥
युध्यमानं पदोर्धृत्वा पातितं धरणीतले ।
उदपाटयत स्थाम्ना गुदतस्तं वृकोदरः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शकलद्वयतां प्राप्य जरासन्धे मृते सति ।
आकुला एत्य सकलाश्चक्रुः कलकलं जनाः ॥ १४ ॥
सहदेवं जरासन्धतनयं विनयान्वितम् ।
अभिषिच्य नृपान् बद्धान् मोचयामास माधवः ॥ १५ ॥

जरासन्धवधः ।

(७३) वह्निवाजिमितेऽध्याये धराधीशाः प्रतुष्टुवुः ।
उत्सृष्टबन्धनागारा नारायणमभीष्टदम् ॥ १ ॥
तान् पटच्चरसंवीतान् कृशकच्चरवर्ष्मणः ।
अनुजग्राह भगवान् परिष्कार्य सपर्यया ॥ २ ॥
"उपस्थातव्यमखिलै राजसूयमहामखे" ।
इत्यादिष्टान् प्रमुदितानेतान् व्यसृजदच्युतः ॥ ३ ॥
अर्चितः सहदेवेन भीमसेनधनञ्जयौ ।
सविस्मयौ सहादाय शक्रप्रस्थं हरिर्ययौ ॥ ४ ॥
शुश्रूषमाणाय सते सुहृद्वर्गाय तुष्यते ।
विस्तराद्वर्णयामास बार्हद्रथवधं प्रभुः ॥ ५ ॥
हरेः प्रसादातिशयं समासाद्य प्रहर्षितः ।
रुद्धकण्ठः सञ्चिताश्रुः किञ्चिन्नोचे युधिष्ठिरः ॥ ६ ॥

जरासन्धनगरात्प्रत्यागमनम् ।

(७४) वेदवाजिमिते धार्मिराजुहाव समन्ततः ।
महर्षीन्भूपतीन् बन्धून् भूसुरानितरानपि ॥ १ ॥
यथादेशं यथोत्साहं यथावित्तं यथाविधि ।
पुण्येऽहनि प्रववृते धर्मसूनोः क्रतूत्तमः ॥ २ ॥
निर्धूमाः सर्पिषो धारामधिगत्य हुताशनाः ।
अर्चींषि दर्शकश्रद्धामपि सार्धं व्यवर्धयन् ॥ ३ ॥
आस्तिकानां समस्तानां स्वान्तानि दुरितान्यपि ।
हरन्तः प्रासरन् होमा ओमाद्यैर्मनुभिः कृताः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्रे सदस्यवर्गस्य सहदेवादिसंमतेः।
अर्चां चक्रे धर्मपुत्रः सौत्येऽहनि रमापतेः॥ ५॥
समर्चितं द्योतयन्तं सभान्तरभुवं त्विषा।
मुहुर्निनिन्द गोविन्दं शिशुपालः श्वसन् रुषा॥ ६॥
वशंवदममर्षस्य तं कद्वदमनेकशः।
समादृतः शिष्टजनैरुपैक्षिष्ट जनार्दनः॥ ७॥
कर्णौ पिधाय निर्यातः सदस्यान् वीक्ष्य पाण्डवाः।
दुष्टं दण्डयितुं चैद्यमायुधानि समाददुः॥ ८॥
अथोद्धतं दुर्वदन्तं खड्गहस्तं जगत्पतिः।
तं छिन्नमस्तकं चक्रे चक्रेण क्ष्माभृतां पुरः॥ ९॥
शिशुपालशरीरोत्थे ज्योतिषि श्रितमाधवे।
तत्रत्याः समपद्यन्त सर्वं एव सविस्मयाः॥ १०॥
क्रतुं निर्वर्त्य विधिवत् संगताशेषसज्जनम्।
सकुटुम्बः पृथापुत्रश्चक्रेऽवभृथमज्जनम्॥ ११॥
अनिच्छन्नपि कृष्णादीन् चिराऽऽयातान् यियासतः।
व्यसर्जयत् समादृत्य धर्मसूनुः सतां मतः॥ १२॥

चैद्यवधः क्रतुसमाप्तिश्च।

(७५) बाणवाजिमितेऽध्याये मखवृत्तमवोचत।
सिंहावलोकनन्यायमनुसृत्य पुनर्मुनिः॥ १॥
समारम्भेण महता समाप्याऽवभृथं नृपः।
आस्ते स धर्मतनयः सभायां ससुहृज्जनः॥ २॥
तदा दुर्योधनो मानी सभाप्रान्तदिदृक्षया।
मत्सरभ्रंशितमतिर्भ्रातृभिः सह निर्ययौ॥ ३॥
गच्छँस्स्थलं विशालं स क्वापि जानन् जलं जडः।
उपर्युपरि वस्त्रान्तमाचकर्ष तितीर्षया॥ ४॥
क्वचित् स्थलधिया गच्छन्ननिरुद्धगतिर्जले।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेक्षकेषु हसत्स्वेव सलज्जं निममज्ज सः ॥ ५ ॥
नानाद्भुतनिधानायां सभायां धर्मजन्मनः ।
सामर्षत्वेन लिप्तोऽयं पामरत्वं समाययौ ॥ ६ ॥
वृकोदरादीन् हसतः संप्रेक्ष्याऽवनतस्ततः ।
दुर्योधनो भग्नमानो ययौ प्रतिचिकीर्षया ॥ ७ ॥
तन्मानमर्दनं तस्य महायुद्धनिदानताम् ।
यास्यतीति विदन्नासीत्तूष्णीं वृष्णिधुरन्धरः ॥ ८ ॥

दुर्योधनमानभञ्जनम् ।

(७६) रसवाजिमितेऽध्याये प्राप सौभविमानवान् ।
शिशुपालसखः शाल्वः प्रधनाय पुरीं प्रभोः ॥ १ ॥
अनागते हरौ तेन बाध्यमानाः पुरौकसः ।
पाहि प्रद्युम्न ! पाहीति चुक्रुशुर्भीतिविह्वलाः ॥ २ ॥
प्रद्युम्नोऽप्यथ सन्नद्धः पुरीविध्वंसनोद्यताम् ।
जघान शाल्वपृतनां धृतनानाविधायुधाम् ॥ ३ ॥
शिखिवाहनसंकाशैः प्रद्युम्नाद्यैर्हरेः सुतैः ।
विशिखैराहतः शाल्वः संमुखे विव्यथेतराम् ॥ ४ ॥
गदया वक्षसि हतं द्युमता रुक्मिणीसुतम् ।
सारथिस्त्वरयन् वाहानपोवाह विमूर्च्छितम् ॥ ५ ॥
मुहूर्तानन्तरं बुद्धः स निजं सारथिं रुषा ।
भर्त्सयँस्तेन जगदे धर्म्यं कृच्छ्रे पलायनम् ॥ ६ ॥

शाल्वयुद्धे प्रद्युम्नमूर्च्छा ।

(७७) स्वरवाजिमितेऽध्याये प्रद्युम्नः समराजिरम् ।
संप्राप्य द्युमता सार्द्धं युयुधे कोपनश्चिरम् ॥ १ ॥
प्रद्युम्नसात्यकिमुखैर्वीरमुख्यैः कृतश्रमैः ।
दिनानां सप्तविंशत्या नासीत्सौभपतिर्जितः ॥ २ ॥
इन्द्रप्रस्थात् समायातो दृष्टोदन्तश्च माधवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समनह्यत युद्धाय शाल्वेन बलशालिना ॥ ३ ॥
विकत्थमानः समरे गदया हरिणा हतः ।
उद्गिरन् रुधिरं भूरि क्षणादन्तरधीयत ॥ ४ ॥
बध्वा शाल्वेन बलिना जनकस्तव नीयते ।
देवक्या प्रेषितोऽस्मीति कोऽप्यूचे पुरुषः प्रभुम् ॥ ५ ॥
दुर्मनस्के ततः कृष्णे शाल्वः खड्गधरः पुरः ।
वसुदेवाऽऽकृतिं कंचिद्दर्शयन्निदमब्रवीत् ॥ ६ ॥
यदर्थं ध्रियसे कृष्ण ! तमिमं पितरं निजम् ।
संछिद्यमानं पश्येति चिच्छेद तमसौ खलः ॥ ७ ॥
तं तादृशदुराचारं विचारेण जगत्पतिः ।
विज्ञाय तद्वधार्थाय प्रजिघाय सुदर्शनम् ॥ ८ ॥
छिन्नकण्ठे निपतिते शाल्वे मायाविशारदे ।
उपगोविन्दमश्रावि दिव्यदुन्दुभिनिस्वनः ॥ ९ ॥

शाल्ववध ।

(७८) गजवाजिमितेऽध्याये गदापाणिर्मदावृतः ।
शिशुपालसखः कृष्णं दन्तवक्र उपाद्रवत् ॥ १ ॥
कौमोदकीमथाऽऽदाय रथाद्भूमीतलं गतः ।
तं गर्ह्यवादिनं कृष्णः प्राहरत् सिंहनादिनम् ॥ २ ॥
कौमोदकीभिन्नवक्षाः शोणितक्षालिताननः ।
अनार्यधीः पपातोर्व्यां पाणिपादं प्रसार्य सः ॥ ३ ॥
अथ तद्देहजं ज्योतिराविवेश जनार्दनम् ।
तद्वृत्तं चिन्त्यवीजं च चमच्चक्रे जनं जनम् ॥ ४ ॥

दन्तवक्त्रवधः ।

विदूरथोऽथ तद्भ्राता खड्गखेटकभीषणः ।
अभ्यागादुच्छ्वसन् रोषाद्भुजाविभ्यद्विद्विषद्गणः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदोद्धतस्य तस्यापि श्रीपतिर्लोलकुण्डलम् ।
शिरो जहार चक्रेण सुखयन् भूमिमण्डलम् ॥ ६ ॥

विदूरथवधः ।

कुरूणां पाण्डवानां च समरं द्रष्टुमक्षमः ।
तीर्थार्थी रोहिणीसूनुर्द्वारकाया विनिर्ययौ ॥ ७ ॥
तीर्थानि पर्यटन्नेव श्रद्धाशुद्धमतिर्बलः ।
नानामुनिगणाऽऽकीर्णं नैमिषारण्यमाययौ ॥ ८ ॥
अभ्युत्तिष्ठत्सु मुनिषु रोमहर्षणमासने ।
आसीनमेव संप्रेक्ष्याऽक्रुध्यत् संकर्षणः प्रभुः ॥ ९ ॥
मुष्टिगर्भस्थितेनाऽथ दर्भेण हलिना हतः ।
स पुराणगुरूभूतः सूतः प्राणैरमुच्यत ॥ १० ॥
महर्षीञ्छोचतो वीक्ष्य पुराणश्रवणोत्सुकान् ।
सूतपुत्रं स विदधे योगेशः पितृसन्निभम् ॥ ११ ॥
बल्वलं दानवं हत्वा स्नात्वा तीर्थेषु वत्सरात् ।
मोक्ष्यसे सूतहत्याया इत्यूचुर्मुनयो बलम् ॥ १२ ॥

सूतवधः ।

(७९) निधिवाजिमितेऽध्याये मुनीनां मखमण्डपे ।
पूयादि वर्षन्नभ्यागाद्बल्वलो नाम दानवः ॥ १ ॥
शूलहस्तं नीलकायं तं दंष्ट्रादारुणाननम् ।
निजघान प्रलम्बघ्नो मुसलेन महाबलम् ॥ २ ॥
अथो मुनिभिरादिष्टः श्रवणीयकथोऽमलः ।
जगाम तीर्थचर्यायै मर्यादां पालयन् बलः ॥ ३ ॥
स भीमदुर्योधनयोर्गदया युध्यमानयोः ।
विनष्टप्रचुरक्षत्त्रं कुरुक्षेत्रं समाययौ ॥ ४ ॥
तावुभौ युद्धसन्नद्धौ रामः पश्यन्ननाश्रवौ[1] ।
बुद्ध्वाविधिबलीयस्त्वं प्रतीयाय निजां पुरीम् ॥ ५ ॥

रामतीर्थयात्रा ।

(१) अनाश्रवौ—अश्रुतोपदेशौ. वचने स्थित आश्रवः—इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८०) व्योमनागमितेऽध्याये सतीर्थ्यः शान्तधीर्द्विजः ।
श्रीदामा नाम दयिताप्रेरितो दुर्गतः श्रिये ॥ १ ॥
ययौ पृथुकखण्डानां खलु मुष्टिचतुष्टयम् ।
उपायनं याचितकं समादाय श्रियः पतिम् ॥ २ ॥
कुचेलमेनं संप्राप्तं श्रीकान्तेन समादृतम् ।
वीक्ष्य विस्मयमायासीदवरोधवधूजनः ॥ ३ ॥
सखायं कुशलं पृष्ट्वा प्रत्यभिज्ञापयन् प्रभुः ।
छात्रवृत्तादि संक्षेपात् स्मारं स्मारमवोचत ॥ ४ ॥
सखे ! स्मरसि किंस्विच्त्वमधीताना गुरोर्गिरा ।
आहर्तुमिन्धनादीनि प्रयास्यामः प्रहर्षिताः ॥ ५ ॥
अपि स्मरसि वर्षेण वातेन च गरीयसा ।
विपिने भ्रमतामेव भानुरस्तं गमिष्यति ॥ ६ ॥
कच्चिच्चेतयसे श्रान्ताञ्छ्रान्तान्संपन्नकर्मणः ।
आचार्योऽस्मान् समभ्येत्य शतशः सान्त्वयिष्यति ॥ ७ ॥
निरीहस्य सतीर्थ्यस्य विदुषोऽनुव्रतस्य च ।
भवतो दर्शनाद् ब्रह्मन् ! प्रीतोऽस्मि नितरामिति ॥ ८ ॥
श्रीदामागमः भगवत्कुशलप्रभाश्च ।

(८१) विधुनागमितेऽध्याये हरिर्मित्रमकिञ्चनम् ।
मह्यं न किंचिदानीतमिदानीमित्यवोचत ॥ १ ॥
व्रीडावनम्रवदनः पृथुकप्रसृतिद्वयम् ।
उपहर्तुमनीशानः किंचिन्नोचे कुचेलकः ॥ २ ॥
अन्तर्यामी स वस्त्रान्तर्निहितानपि तावतः ।
जहार पृथुकान् प्रेम्णा तस्य तानजिहासतः ॥ ३ ॥
ततः पटच्चरग्रन्थिमवमुच्य शनैः शनैः ।
हसन् कुचेलं प्रावोचच्चराचरजगत्पतिः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संकोचमञ्चसि वृथा मा सखे ! विमुखो भव ।
मां प्रीणयन्ति नितरां नन्वेते पृथुकास्तव ॥ ५ ॥
इति प्रणयपीयूषमुद्गिरन्नेव सादरः ।
श्रीभर्ता बुभुजे तुष्टो मुष्टिमेकां कृतत्वरः ॥ ६ ॥
आदित्सतो द्वितीयां च मुष्टिं भर्तुः ससम्भ्रमा ।
जग्राह प्रसृतं हस्तं स्मितरम्यमुखी रमा ॥ ७ ॥
अथाऽन्येद्युर्भुक्तपीतं वचसा च समादृतम् ।
वयस्यमेतं श्रीजानिर्विससर्ज कृताञ्जलिः ॥ ८ ॥
भोगो योगोपघातीति कंसघाती न मे धनम् ।
प्रददातीति संतुष्यन् स प्राप स्वगृहान्तिकम् ॥ ९ ॥
उपकार्यासमानायाः शालाया बहिरागताम् ।
भार्यां सदासीनिवहामासीत् स प्रेक्ष्य विस्मितः ॥ १० ॥
प्रभूतभक्तिसंभूतबृहद्भूतिविभूषितः ।
विरक्तः सक्तवत् कामाञ्छ्रीदामा बुभुजे सुधीः ॥ ११ ॥

श्रीदामानुग्रहः ।

(८२) नेत्रनागमितेऽध्याये कुरुक्षेत्रे महत्तरे ।
भानूपरागे सुमहदासीत् संमेलनं नृणाम् ॥ १ ॥
तदा सदारतनया वसुदेवपुरोगमाः ।
यदवोऽपि समाजग्मुः सर्वसंपत्समुन्नताः ॥ २ ॥
ते यथासमयं तत्र स्नानदानार्चनादिकाः ।
श्रद्धाविशुद्धमनसश्चक्रुः समुचिताः क्रियाः ॥ ३ ॥
तीर्थकृत्यावसानेऽथ विचिन्वन्तः परस्परम् ।
समन्ततः समायाता निजैः सञ्जग्मिरे जनाः ॥ ४ ॥
सपुत्रा सस्नुषा कुन्ती वदन्ती करुणं वचः ।
मुमुदे संगता भ्रात्रा वसुदेवेन सान्त्विता ॥ ५ ॥

(१) सौधोऽस्त्री राजसदनमुपकार्योपकारिका-इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नन्दादयश्च गोपाला गोपिकाश्च समागतान्।
रामकृष्णमुखान् वीक्ष्य संवदन्ति स्म साश्रवः॥ ६॥
विविक्तदेशे रुदतीर्विरहक्षामतां गताः।
अनुनिन्ये मधुरया वाचा गोपीर्जनार्दनः॥ ७॥

कुरुक्षेत्रे बन्धूनां संमेलनम्।

(८३) वह्निनागमितेऽध्याये कृष्णधार्म्यर्जुनादिषु।
पुंसु प्रेम्णा संलपत्सु संघटन्ते स्म तत्स्त्रियः॥ १॥
इतरेतरसौहार्दरम्यसापत्न्यभूषिताः।
समानरूपाभरणाम्बरदासीपरिच्छदाः॥ २॥
सख्यसंबन्धमुदिताः सौशील्यविमलाशयाः।
गोविन्दसुन्दरीः प्रोचे स्मेरा द्रुपदनन्दिनी॥ ३॥
सख्यः! सखा नो भगवान् मुकुन्दः सर्वसुन्दरः।
कथं कथं पर्यणैषीद्युष्मान् ब्रूत यथातथम्॥ ४॥
इति पृष्टा हृषीकेशप्रिया भैष्मीपुरोगमाः।
स्वं स्वं विवाहवृत्तान्तं वर्णयन्ति स्म सस्मिताः॥ ५॥

द्रौपदी–रुक्मिण्यादिसंवादः।

(८४) वेदनागमितेऽध्याये द्वैपायनपुरस्सराः।
महर्षयः समाजग्मुर्हरिदर्शनकाङ्क्षिणः॥ १॥
अभ्युत्थानादिकैः सर्वैरुपचारैः समर्चयन्।
सदकार्षीदच्युतोऽपि वाचा मधुरया च तान्॥ २॥
अथ स्तुत्वा जगन्नाथं प्रपन्नार्तिहरं हरिम्।
महर्षीन् गन्तुमुद्युक्तान् पप्रच्छानकदुन्दुभिः॥ ३॥
कर्मणा किंविधेन? स्यान्निरासः सर्वकर्मणाम्।
कर्मणां पारदृश्वानस्तद्भवन्तो ब्रुवन्त्विति॥ ४॥
"उपगङ्गं वसन्कूपं पिपासुर्वत! धावति"।
इत्यूचिवांसो मनसा ते प्रत्यूचुरिदं वचः॥ ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोः परब्रह्मजनक ! शृणु साधो ! समाहितः ।
सति कृष्णे वयं ब्रूमः सादरं शास्त्रयन्त्रिताः ॥ ६ ॥
त्यक्त्वा फलाभिसन्धानं श्रद्धामाधाय चेतसि ।
विष्णुं यजन्नवाप्नोति निरासं कर्मणां नरः ॥ ७ ॥
इति वाचं समाकर्ण्य मुनीनानकदुन्दुभिः ।
सश्रद्धं यक्ष्यमाणस्तानृत्विजोऽवृत सत्वरः ॥ ८ ॥
पत्नीभिरष्टादशभिर्विष्णुयागाय दीक्षितः ।
प्रभूतपरिवारर्द्धिः सोऽभूत् स इव वीक्षितः ॥ ९ ॥
समापिते क्रतौ तस्मिन्नृत्त्विजः स्वजनानपि ।
दक्षिणापारिबर्हाद्यैः स सन्तोष्य व्यसर्जयत् ॥ १० ॥
तत्रैव जनितानन्दं यदुवृन्दसमादृतम् ।
त्रीन् मासान् वासयामास नन्दमानकदुन्दुभिः ॥ ११ ॥
नन्दं स्वमन्दिरं प्रेष्य यदवः कृष्णचक्षुषः ।
कुरुक्षेत्रात् समुदिता ग्रीष्मान्ते द्वारकां ययुः ॥ १२ ॥

वसुदेवकृतो विष्णुयागः ।

(८५) बाणदन्तिमितेऽध्याये वसुदेवः सुतौ निजौ ।
प्रधानपुरुषौ जानन्नस्तावीद्वेदवित्प्रियः ॥ १ ॥
एक आत्मा निर्विकारः प्रचुराकारतां गताम् ।
मायां विद्धीति भगवाँस्तातं तत्त्वमवोचत ॥ २ ॥
संपरेतं गुरुसुतमानीतं जानती सती ।
देवकी कंसनिहतान् ययाचे तनयान् निजान् ॥ ३ ॥
तानानिनीषू सुतलं संप्राप्तौ रामकेशवौ ।
तुष्टाव जानन्नीशानौ बलिर्विरचिताञ्जलिः ॥ ४ ॥
ब्रह्मशप्ताज्ञातमृतान् मरीचेः षट् सुतानिमान् ।
देवकीगर्भसंभूतान् देहीत्यवददच्युतः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः प्रीतेन बलिना दत्तानादाय तावुभौ ।
तस्यै प्रतीक्षमाणायै जनन्यै तानयच्छताम् ॥ ६ ॥
देवकी तानुपाघ्राय स्नेहस्नुतकुचद्वया ।
पाययामास भगवत्पीतशेषं निजं पयः ॥ ७ ॥
मुदितौ पितरौ स्वीयौ भ्रातरौ च प्रणम्य ते ।
तेषां प्रपश्यतामेव स्वर्जग्मुर्व्योमवर्त्मना ॥ ८ ॥

मृताग्रजानयनम् ।

(८६) रसदन्तिमितेऽध्याये पार्थस्तीर्थप्रसङ्गतः ।
प्रभासमागतोऽश्रौषीत् सुभद्रां प्राप्तयौवनाम् ॥ १ ॥
दुर्योधनाय हलिना दित्सितामवगत्य ताम् ।
कृष्णापतिश्छद्मयतिर्द्वारकां नगरीमगात् ॥ २ ॥
उवास चतुरो मासानन्तरं प्रेप्सुरर्जुनः ।
मत्वा त्रिदण्डिनं सत्यं सदकार्षीच्च तं जनः ॥ ३ ॥
भक्तिभाजा बलेनाऽपि गृहमानीय भोजितः ।
पर्यन्तवर्तिनीं चक्रे सुभद्रां चित्तवर्तिनीम् ॥ ४ ॥
निर्गतां देवयात्रायै गोविन्दानुमतस्ततः ।
विद्राव्य रक्षिणः शूराँस्तां जहार धनञ्जयः ॥ ५ ॥
बलभद्रस्ततः क्रुध्यन्ननुजेनान्वनीयत ।
किरीटिना सुभद्रा च शक्रप्रस्थमनीयत ॥ ६ ॥
अथ कृष्णोऽनुग्रहाय वैदेहश्रुतदेवयोः ।
विदेहदेशान् प्रययौ मुनिवृन्देन संवृतः ॥ ७ ॥
भक्तिभाजः प्रणमतः स्तुवतोऽर्थयतः सतः ।
राज्ञो विप्रस्य च गृहानगमद्युगपत्प्रभुः ॥ ८ ॥
समहर्षिगणः कृष्णः कृतार्थीकृत्य तावुभौ ।
उपदिश्य परं तत्त्वं प्रत्यागाद्भृत्यवत्सलः ॥ ९ ॥

सुभद्राहरणम्, वैदेहश्रुतदेवानुग्रहश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८७) ननु ? प्रवृत्तौ शब्दानां सङ्केतसहचारिणाम् ।
जातिर्गुणः क्रिया द्रव्यमिति याति निमित्तताम् ॥ १ ॥
एतच्चतुष्टयाभावादनिर्देश्ये कथं ? स्वतः ।
ब्रह्मन् ! ब्रह्मणि शब्दात्मा श्रुतिसार्थः प्रवर्तते ॥ २ ॥
इति प्रश्नं समाकर्ण्य राजर्षेः श्रुतशालिनः ।
प्रत्यवोचत हर्षेण भगवान् बादरायणिः ॥ ३ ॥
निमित्ताभावतः साक्षाच्छ्रुतयः परमात्मनि ।
अशक्ता न प्रवर्तन्ते सर्वथा गुणवृत्तयः ॥ ४ ॥
बुद्धीन्द्रियमनःप्राणान् सृष्ट्वा भोगापवर्गयोः ।
जीवान् प्रवर्तयन् योऽयं परमात्माऽस्ति शाश्वतः ॥ ५ ॥
तेनैक्यं किल जीवस्य भागलक्षणवर्त्मना ।
श्रुतयस्तत्त्वमस्याद्या वेदयन्तीति विद्धि भोः ॥ ६ ॥
इत्थमेवाऽनुयुञ्जानं पुरा बदरिकाश्रमे ।
नारदं मुनिमेकान्ते प्रोचे नारायणो मुनिः ॥ ७ ॥
महर्षे ! नारद ! पुरा ब्रह्मचर्यपरायणैः ।
सहजैरर्थितोऽवोचत्सर्ववेदी सनन्दनः ॥ ८ ॥
ईशनिश्वाससंभूताः श्रुतयः प्रलयात्यये ।
तमित्थं तुष्टुवुस्तुष्टाः सम्राजमिव बन्दिनः ॥ ९ ॥

* * *

जय भगवन् ! वितथगुणां सदूषणां जह्यजामजित ! ।
व्यक्तीकृतनिजशक्ते ! जय भगवन्नसदाराध्य ! ॥ १० ॥
एतद् दृश्यमशेषं शेषाद्भवतो न भिद्यते भगवन् ! ।
अत इतरान् भजमानो भवन्तमेवाऽद्भुतं भजते ॥ ११ ॥
मायाधिनाथ ! तापान् कथासुधाब्धौ निमज्जनाज्जहति ।
केऽपि भवन्ति भवन्तं सच्चित्सुखमाश्रिताः कृतिनः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतः परेश ! भजनात् सफलत्वं याति जन्मिनां जन्म ।
व्यतिरिच्यते न जन्तुर्दृतेर्भवद्भक्तितो विमुखः ॥ १३ ॥
अध्युदरं कूर्पदृशोऽधिहृदयदहरं भवन्तमारुणयः ।
आधिमूर्धरन्ध्रमन्येऽपवर्गकामा उपासते सुधियः ॥ १४ ॥
योनीनां वैचित्र्याद्वह्हिरिवाऽनन्तरूपतां धत्से ।
समरसममलं धाम त्वदीयमवलोकते कोऽपि ॥ १५ ॥
पुरि पुरि वितत्य मायां प्रतिसीरां स्वैरमासीनम् ।
पुरुषोत्तमं भवन्तं वीक्षन्ते यत्नशालिनः सन्तः ॥ १६ ॥
सत्सङ्गमुक्तगेहाः कथामृतास्वादसानन्दाः ।
अप्यपवर्गं लब्धं न नाथ ! कृतिनस्तृणाय मन्यन्ते ॥ १७ ॥
असदासक्तः सततं सन्ततसन्तं भवन्तमनवाप्य ।
लोकान् व्रजत्यसुर्यान् हन्त ! हतात्माऽबुधो जन्तुः ॥ १८ ॥
युक्तिवलाद् योगिजनैः प्रद्वेषादेव दुर्जनैर्देव ! ।
कामात् स्त्रीभिर्ज्ञानादस्माभिः प्राप्य एकोऽसि ॥ १९ ॥
अर्वाक्तनो हि जीवो जगदादिं वर्तमानतावसरे ।
शेषं त्वां प्रलये वा स्वयं विलीनः कथं वेत्तु ॥ २० ॥
अवगत्य गुणिनमेवाऽज्ञानवशाद्दर्शनानि विवदन्ते ।
ज्ञानघने भवति पुनर्नाज्ञानं तत्त्वतो भवति ॥ २१ ॥
त्वामसति भिन्नरूपे सतीव जगति प्रकल्पनासिद्धे ।
अवयन्ति वर्तमानं सन्तो भूषासु कनकमिव ॥ २२ ॥
मृत्योर्मूर्धनि पादं दधाति विशुद्धा भवद्भक्ताः ।
बध्नासि माययाऽन्यान्पशूनिव ज्ञानिमानिनो विमुखान् ॥ २३ ॥
राजसि करणविहीनः करणानां व्यापृतेर्हेतुः ।
कुर्वन्ति कर्म नियता भवद्भिया नाथ ! सूर्याद्याः ॥ २४ ॥
ईक्षामात्राद्भगवन्नाविष्कुरुषे स्वकर्मसंबद्धम् ।
जगदेतत्, समरूपं खं ब्रह्म त्वं जगत्साक्षी ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानास्ति नेह किंचिन्निर्वचनानर्ह ! यन्ताऽसि ।
ज्ञाता स्वयमासि भगवन् ! ज्ञेयत्वं नैव ते घटते ॥ २६ ॥
अजयोर्द्वयोः प्रसङ्गाद्बुद्बुदवज्जायमानानि ।
त्वयि कारणे समन्तात्सरित इवाब्धौ जगन्ति लीयन्ते ॥२७॥
भावबलाद्भवभीता भवतो भावं समायान्ति ।
कालव्यालग्रस्ता भावविहीनाः सरन्ति संसारे ॥ २८ ॥
प्रत्याहृतेन्द्रियगणः कुम्भितपवनो निरुद्धहृद्वृत्तिः ।
अपि जन्तुर्गुरुचरणं विना भवन्तं न वीक्षितुं क्षमते ॥ २९ ॥
सर्वरसास्पदरूपं भवन्तमाप्तुं सनातनं सुधियः ।
कान्ताकनकादिमयान् विषयाञ्जहतीति साम्प्रतं भगवन् ! ३०
भवदङ्घ्रिबद्धमनसस्तीर्थीभूयाऽपि तीर्थानि ।
अध्यासते प्रशान्ताः सन्तः सत्सङ्गसाकाङ्क्षाः ॥ ३१ ॥
अद्वैतमेव सत्यं व्यवहृतये कल्पितं द्वैतम् ।
कर्मजडा अस्माकं तात्पर्यं देव ! नैव जानन्ति ॥ ३२ ॥
आद्यन्ताऽव्यक्तमिदं मध्ये व्यक्तं जगद्भगवन् ! ।
अव्यक्तत्वन्मयतां न जहातीत्याहुराचार्याः ॥ ३३ ॥
जीवोऽजां जुषमाणः संसरति प्राप्तवैरूप्यः ।
कञ्चुकमिव सर्पस्त्वं तामवमुञ्चन् महीयसे भगवन् ! ॥३४॥
त्वां हृद्गतमपि जन्तुर्न वेत्ति दुर्वासनाविवशः ।
अन्विष्यति कण्ठमणिं विषद्य विपणीषु मद्यमदमूढः ॥ ३५ ॥
अपवर्गगते ! भगवन् ! भवन्तमाश्रित्य जायते हन्त ! ।
निष्प्रतिषेधो निर्भीर्निर्द्वन्द्वो निर्विधिर्जन्तुः ॥ ३६ ॥
ब्रह्माण्डाणून् गगने नर्तयतोऽनन्त ! वैभवं भवतः ।
के निर्ब्रूयुर्ब्रूमो वयमपि यन्नेतिनेतीति ॥ ३७ ॥

वेदस्तुतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुतिमुखोदीतां स्तुतिं श्रुत्वा सनन्दनात्।
कुमारा ब्रह्मविद्वांसस्तमानर्चुर्मुदान्विताः ॥ ३८ ॥
महर्षे ! नारद ! त्वं च सर्वमेतद्विचारयन्।
चरितार्थत्वमायाहीत्यूचे नारायणो मुनिः ॥ ३९ ॥
स च प्रमुदितोऽभ्येत्य मत्पित्रे तदवोचत।
इति सप्ताशीतितमेऽवदद्वृत्तं नृपं शुकः ॥ ४० ॥

(८८) गिरिदन्तिमितेऽध्याये वृकाख्यः शकुनेः सुतः।
तोषयन् गिरिशं तेपे तीर्थे केदारमाश्रितः ॥ १ ॥
क्रव्यमात्मीयमुत्कृत्य जुह्वतः सप्तमेऽहनि।
प्रवृत्तस्य शिरश्छेत्तुमुग्रस्तस्याऽग्रतोऽभवत् ॥ २ ॥
वृणीष्वेति व्याहरन्तं स वव्रे शङ्करं वरम्।
प्राणी मत्पाणिना स्पृष्टो मूर्ध्नि प्रध्वंसतामिति ॥ ३ ॥
ओमित्युक्तवतः शम्भोरेव मूर्धनि सोऽधमः।
स्वकीयं पाणिमाधातुं धावति स्म कृतत्वरः ॥ ४ ॥
अथानुद्रवता तेन गौरीहरणकाङ्क्षिणा।
क्षुद्रेण रुद्रस्त्राणार्थी द्राव्यते स्म दिशो दश ॥ ५ ॥
वर्णिवेषं समालम्ब्य प्रशान्तमधुराकृतिः।
तयोः पन्थानमासाद्य तस्थावथ रमापतिः ॥ ६ ॥
ससंभ्रमं धावमानं वृकं मधुरया गिरा।
पप्रच्छ धावने हेतुं सोऽपि सर्वमवोचत ॥ ७ ॥
दक्षशापात् पिशाचस्य विना वीर ! परीक्षणम्।
अध्वरध्वंसिनो वाणी प्रमाणीक्रियतां कथम् ? ॥ ८ ॥
पाणिं स्वशीर्ष्णि विन्यस्य वाणीं मिथ्याऽवधार्य ताम्
पिनाकपाणिमाहितं जहि तं शैलवासिनम् ॥ ९ ॥
इत्ययं मोहितमतिर्भगवद्वचसाऽसुरः।
मौलिं स्पृशन् स्वहस्तेन शीर्णमूर्धाऽपतत् पुरः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शङ्करमभ्येत्य भगवान् मधुसूदनः ।
संभाष्य तेन महितो निजं धाम समाययौ ॥ ११ ॥

वृकासुरवधः ।

(८९) निधिदन्तिमितेऽध्याये सर्वश्रैष्ठ्यबुभुत्सया ।
वैरञ्चप्रमुखाँल्लोकान् प्राहिण्वन् मुनयो भृगुम् ॥ १ ॥
भृगुर्विरञ्चिमासाद्य स्तब्धो नतिपराङ्मुखः ।
तं जानन्निङ्गितैः क्रुद्धं प्रययौ धाम धूर्जटेः ॥ २ ॥
तत्र रुद्रं परिष्वक्तुमागच्छन्तं पुरो मुनिः ।
श्मशानस्थोऽसि नार्होऽसीत्येवं चक्रे निराकृतम् ॥ ३ ॥
अथ शूलं समुद्यम्य जिघांसन्तं विहाय तम् ।
स वैकुण्ठं गतोऽपश्यत् सुखसुप्तं जनार्दनम् ॥ ४ ॥
तं श्रियां वीक्षमाणायां वक्षसि प्राहरत् पदा ।
उत्थितोऽथ समादद्रे श्रीनाथस्तं मुनिं मुदा ॥ ५ ॥
स च निर्णीय देवेषु सेवनीयतमं हरिम् ।
प्रत्येत्य श्रावयामास वृत्तमेतन्मुनीन् भृगुः ॥ ६ ॥

विष्णुपरीक्षा ।

द्वारवत्यां द्विजः कश्चिन्मृतमानीय पुत्रकम् ।
राजद्वारं समासाद्य रुदन् व्यलपदुच्चकैः ॥ ७ ॥
ममार जातमात्रोऽयं मुग्धमूर्तिर्ममार्भकः ।
राज्ञा कृतापचारेण हा ! हतोऽस्मि मृतप्रजः ॥ ८ ॥
इत्थमेव द्विजः सोऽयं नव वारानुपेक्षितः ।
मृतं मृतं सुतं नीत्वा व्यलपद् द्वारमाश्रितः ॥ ९ ॥
नवमं पुत्रकं शोचन्नथ गाण्डीवधन्वना ।
अभ्यधीयत विप्रोऽसौ माधवान्तिकवर्तिना ॥ १० ॥
त्राताहे त्वत्सुतं जातं ध्रुवमाश्वासिहि द्विज ! । (९०)
असिद्धायां प्रतिज्ञायां प्रवेष्टास्मि हुताशनम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रतिश्रुतवति त्राणसज्जे धनञ्जये ।
प्रासूत बालं विप्रस्त्री यथाकालं व्यथावती ॥ १२ ॥
रुदन् प्रसूतमात्रोऽथ सशरीरः स बालकः ।
अन्तर्दधे द्विजः पार्थं जगर्हे क्लेशकर्कशः ॥ १३ ॥
अथ विद्याबलात् पार्थः संयमिन्यादिकाः पुरीः ।
प्राप्याऽनवाप्य तं विप्रं प्रत्यागच्छद्धृतश्रमः ॥ १४ ॥

अर्जुनपौरुषपरीक्षा।

हुताशनप्रवेशाय संनद्धं पाण्डुनन्दनम् ।
निवारयामास हरिर्वदन् सहगवेषणम् ॥ १५ ॥
दिव्यं स्वं रथमारुह्य पार्थेन सह माधवः ।
लोकालोकमतीयाय समतिक्रम्य मेदिनीम् ॥ १६ ॥
सुदर्शनेन विपुलं तमोद्वैतं जगत्पतिः ।
निराकृत्य पुरोऽगच्छद्धृत्यत्राणमिलन्मतिः ॥ १७ ॥
अथ ज्योतिर्भागवतं प्रादुर्भूतं धनञ्जयः ।
निरीक्षितुमशक्तः सन् न्यमीलयत लोचने ॥ १८ ॥
सलिलाभ्यन्तरे नाथं महाकालपुरे स्थितम् ।
एतौ ददृशतुः शेषशायिनं पार्षदैर्वृतम् ॥ १९ ॥
अष्टबाहुं पीतवस्त्रं सकिरीटं सकुण्डलम् ।
उदारदर्शनं देवं मुदा तुष्टवतुश्च तौ ॥ २० ॥
तौ समाहृत्य भगवान् नरनारायणावृषी ।
प्राहिणोद्धरणीमेव सहैव द्विजसूनुभिः ॥ २१ ॥
अथ पार्थः सुतान् दत्त्वा कृतार्थीकृत्य तं द्विजम् ।
श्रीकृष्णकरुणासिद्धमजानात् पौरुषं निजम् ॥ २२ ॥

द्विजपुत्रानयनम् ।

(९०) व्योमनन्दमितेऽध्याये प्रणयार्पितबुद्धिभिः ।
अखिलाभिः प्रेयसीभिर्विजहार जले हरिः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिरं विहृत्य भगवान् गीयमानगुणोदयः ।
तोषयामास भूषाद्यैर्गायकादीन् दयामयः ॥ २ ॥
कुररीं चक्रवाकीं च सागरादींश्च सस्पृहाः ।
संबोध्य कृष्णप्रेयस्यः परोक्षेऽपि जगुर्गुणान् ॥ ३ ॥
असुरान् क्षत्रतां प्राप्तान् प्रजाः पीडयतो बहून् ।
निहन्तुं कोटिशो देवा यदुतां समुपाययुः ॥ ४ ॥
तैस्तैर्देवैः सेव्यमानो यदुनामभिरीश्वरः ।
उन्ममाथ पृथापुत्रद्वारेण कुपथाश्रितान् ॥ ५ ॥
मायानुरञ्जनपरो भजद्वृजिनभञ्जनः ।
मण्डयामास चरितैरीश्वरः क्षितिमण्डलम् ॥ ६ ॥

श्रीकृष्णवैभवम् ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
दशमस्कन्धशेषार्धः समक्षेपि यथामति ॥ १०—२ ॥

॥ पद्यसंकलनाङ्काः ४३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



निरस्तखलवर्गभीः सदयतैकसंबद्धधीः
समाहृतजगत्त्रयी–तिमिरहारिवेदान्तगीः
समृद्धतरबुद्धिभिर्निभृतमुद्धवाद्यैः स्तुतः
स्वकृत्यततिसिद्धिकृज्जयति शुद्धमूर्तिर्हरिः

"गुजराती" प्रिंटींग प्रेस–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः ११)

एके यस्मिन्नेकतानाः नानात्वभ्रमवर्जिताः ।
एकतां तात्त्विकीं प्रापुस्तमेकं समुपाश्रये ॥ ११ ॥

(१) इहैकत्रिंशताऽध्यायैर्भवबाधानिवर्तिका ।
मुक्तिरेकादशे स्कन्धे क्रमप्राप्ता प्रपञ्च्यते ॥ १ ॥
तथा समृद्धतां याते रममाणो यदोः कुले ।
जिहासति स धरणीं जगन्मङ्गलविग्रहः ॥ २ ॥
दुरासदं यदुकुलं परस्परविरोधतः ।
संहर्तव्यमिति श्रीशः कर्तव्यं समकल्पयत् ॥ ३ ॥
तेनाऽन्तर्यामिणाऽऽदिष्टा विश्वामित्राऽसितादयः ।
शिष्टाः पिण्डारकं नाम पुण्यं तीर्थं प्रपेदिरे ॥ ४ ॥
तदात्वे तत्त्ववेदित्वं मुनीनां वेत्तुमुत्सुकाः ।
क्रीडन्तस्तत्र संप्रापुः केचिद्यदुकुमारकाः ॥ ५ ॥
यथोचितपरिष्कारायोषावेशं पृथूदरम् ।
साम्बमेते पुरस्कृत्य पप्रच्छुर्हसिताऽननाः ॥ ६ ॥
भो ! दर्भाग्रधियो ! विप्राः सगर्भा पुत्रकाङ्क्षिणी ।
आसन्नप्रसवा चेयं ब्रूत किंस्वित् ? प्रसोष्यते ॥ ७ ॥
इत्याक्षिप्ताश्च जगदुर्दुर्वासःप्रमुखा द्विजाः ।
कुलघ्नं मुसलं लौहं सैषा संजनयेदिति ॥ ८ ॥
एतदाकर्ण्य सभया धूतसाम्बोदराम्बराः ।
ददृशुर्मुसलं स्थूलमायसं यदुदारकाः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उग्रसेनमतेनैते निघृष्य बलवत्तराः ।
तत्र सूचीशेषतां नीतं प्रास्थन् सागरपाथसि ॥ १० ॥
एरका जज्ञिरे चूर्णैर्मौसलैः, सूचिकां च ताम् ।
मत्स्यग्रस्तां समासाद्य बाणाग्रेऽयुङ्क्त लुब्धकः ॥ ११ ॥
इतीह प्रथमेऽध्याये वैराग्योदयदायकम् ।
वृत्तं निवेदितं राज्ञे शुकेन ब्रह्मवादिना ॥ १२ ॥

द्विजशापः ।

(२) वसुदेवो वासुदेवदिदृक्षाकृतसन्निधिम् ।
नारदं परिपप्रच्छ वस्तु संसारपारदम् ॥ १ ॥
निमिजायन्तसंवादं प्रस्तुत्य स्तुत्यधीर्मुनिः ।
आत्मतत्त्वमुपादिक्षद्भवाम्भोनिधिपारगः ॥ २ ॥
निमिनाऽऽत्यान्तिकं क्षेमं सभक्तजनलक्षणम् ।
पृष्टास्तुष्टाः समाचख्युः कविमुख्याः यथाक्रमम् ॥ ३ ॥
"भगवच्चरणद्वन्द्वभजनं भवभञ्जनम् ।
आत्यन्तिकक्षेमकरं नेतरद्वस्तु विद्यते ॥ ४ ॥
सर्वत्रहरिता बुद्धिः कर्माऽर्पणसमाश्रिता ।
लतेव मोक्षं फलती"त्यूचे चारुवचाः कविः ॥ ५ ॥
"भगवत्तां भावमात्रे भगवत्यपि भावताम् ।
भावयन्नेव भवति महाभागवतो जनः ॥ ६ ॥
अनीहमानो निर्मानो भजमानो जनार्दनम् ।
भयेन रिक्तो भक्तः स्या"दित्युवाच निमिं हरिः ॥ ७ ॥
इति द्वितीये त्वध्यायेऽध्यात्मबोधविधायकम् ।
वस्तुवृत्तं समासेन मुनिना परिकीर्तितम् ॥ ८ ॥

वसुदेवनारदसंवादे कवेर्हरेश्चोक्तिः ।

(३) मायां, तत्तरणं, ब्रह्म, कर्म, पृष्टा महीभृता ।
प्रत्यूचिरे पृथक्त्वेन तृतीयाद्या मुनीश्वराः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

" अनिरूप्या स्वरूपेण सृजन्ती सकलं जगत् ।
संहरन्ती च विज्ञेया माया भावितबुद्धिभिः ॥ २ ॥
प्रकल्पनात्मिका सेयं गुणत्रयमयी सती ।
नानारूपे"त्यन्तरिक्षोऽब्रवीदृषभनन्दनः ॥ ३ ॥
"सांसारिकाणां भावानां निःसारत्वं धिया विदन् ।
निःसङ्गतां समासाद्य भुञ्जानः कर्म केवलम् ॥ ४ ॥
भगवद्भक्तिभूयस्त्वं समासाद्य क्रमाज्जनः ।
तां मायामतियाती"ति प्रबुद्धः शुद्धधीर्जगौ ॥ ५ ॥
"यतो भूतानि जायन्ते येन जीवन्ति यत्र च ।
प्रलीयन्ते यच्च नित्यं तद् ब्रह्मेत्यभिधीयते ॥ ६ ॥
खाद्यधिष्ठातृ यद्याति जागरादिकसाक्षिताम् ।
कूटस्थं स्वप्रकाशं तद् ब्रह्मेत्याहुर्विचक्षणाः ॥ ७ ॥
रोगरुद्धदृशः पुंसो रोगाऽपायेंऽशुमानिव ।
स्वयं प्रभासते ब्रह्म जनस्य निरहङ्कृतेः ॥ ८ ॥
बोधदोषान्धतमसप्रध्वंसाय प्रगल्भते ।
दीप्यमाना हरेर्भक्ति"रित्यूचे पिप्पलायनः ॥ ९ ॥
"वेदोक्तं कर्म कुर्वाणः सर्वेशाय तदर्पयन् ।
भक्त्या च तस्य यजनं यथाकल्पं प्रकल्पयन् ॥ १० ॥
नैष्कर्म्यसिद्धेर्निर्भिन्नहृद्ग्रन्थिरचिराज्जनः ।
निर्वाणमेतीति" सुधीराविर्होत्र उपादिशत् ॥ ११ ॥
इति तृतीयेऽत्र मुनिर्वसुदेवं पदोर्नतम् ।
उद्दिधीर्षुर्मुदा प्रादादुपदेशरसायनम् ॥ १२ ॥

अन्तरिक्षादीनां चतुर्णामुक्तयः ।

(४) अवतारान् हरेर्वृत्तान् वर्तमानान् प्रवत्स्र्यतः ।
उग्रधीर्द्रुमिलोऽवोचत्कांश्चित्कर्मसमन्वितान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्येरन् केऽपि निपुणा गणितक्षितिरेणवः ।
हरेर्गुणानां गणना पटूनामपि दुर्घटा ॥ २ ॥
सृष्टिरक्षालयकृतो ब्रह्मविष्णुमहेश्वराः ।
शमधर्मैकनिरतौ नरनारायणावृषी ॥ ३ ॥
ज्ञानाऽऽविष्कृतये जाता हंसदत्तकुमारकाः ।
ऋषभो नाम भगवानार्षवर्त्मप्रकाशकः ॥ ४ ॥
हयग्रीवस्त्रयीरक्षानिमित्तधृतविग्रहः ।
विश्रुतौ मत्स्यकपिलौ साङ्ख्ययोगप्रवर्तकौ ॥ ५ ॥
वराहकूर्मौ प्रथितौ धरोद्धारकरावुभौ ।
बुद्धस्वरूपो भगवान् दैत्यवृन्दविमोहकः ॥ ६ ॥
नृसिंह–रामत्रितय–वृष्णिपुङ्गव–कल्कयः ।
दुर्वृत्तवर्गदमन–सद्रक्षणसमुद्भवाः ॥ ७ ॥
इति तुर्ये जन्मभाजां भजनीया भवापहाः ।
संक्षिप्य विविधाकारा अवताराः प्रकीर्तिताः ॥ ८ ॥

द्रुमिलोक्ता हरेरवताराः ।

(५) भक्तिहीनप्राणिगतिं, युगभेदविभेदिताम् ।
हरिपूजापद्धतिं च निमिः पप्रच्छ योगिनः ॥ १ ॥
“अभजन्तो जगन्नाथं यथावर्णं यथाऽऽश्रमम् ।
वृथाभूतजनुर्लाभा दुर्गतिं यान्ति पामराः ॥ २ ॥
भक्तिश्रद्धाविहीनानां ब्राह्मणत्वेऽपि को गुणः ।
जात्याऽधमत्वे को दोषः श्रद्धाभक्तिमतां सताम् ॥ ३ ॥
अपि केवलया भक्त्या वासुदेवाऽनुषक्तया ।
भूयांसः सद्गतिं प्रापुः स्त्रीशूद्रपतितादयः ॥ ४ ॥
अजातभक्तयः सक्ताः कर्मण्येव मनीषिणः ।
संसरन्तीह संसारे ब्राह्मणाद्याः शरीरिणः ॥ ५ ॥
रागप्राप्तव्यवायादिनियमप्रतिपादिकाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवृत्तिंतत्परामाहुः श्रुतिमेते प्रवर्तिकाम् ॥ ६ ॥
धनादिकं धर्मफलं धर्मो मोक्षफलः सताम् ।
धनादिकं भोगफलं भोगः पातफलोऽसताम् ॥ ७ ॥
अनिस्तारा आत्महनो नारायणपराङ्मुखाः ।
लोकानसुर्यान् गच्छन्तीत्याह माध्यन्दिनी श्रुतिः" ॥ ८ ॥
इति भक्तिविहीनानां प्राणिनामुचिता गतिः ।
शमातिशयशीलेन चमसेन प्रदर्शिता ॥ ९ ॥
"कृते हंससुपर्णादिनामवन्तं चतुर्भुजम् ।
व्रतिवेषं शुक्लतनुं यजन्ते तपसा जनाः ॥ १० ॥
त्रेतायां विष्णुयज्ञादिनामानं स्रुक्स्रुवान्वितम् ।
चतुर्भुजं रक्तवर्णं वेदमूर्तिमुपासते ॥ ११ ॥
द्वापरे श्यामलतनुश्छत्रादिनृपचिह्नवान् ।
चतुर्व्यूहवपुः श्रीशश्चतुर्भुज उपास्यते ॥ १२ ॥
कलौ रामः श्यामलाङ्गः कृत्यकृद्भृत्यवत्सलः ।
सीतापतिर्जगत्राता शर्मदाता प्रकीर्त्यते ॥ १३ ॥
तुलातीतगुणग्रामः कलावपि मलापहः ।
नामसंकीर्तनप्रीतः श्रीराम उपसीदति ॥ १४ ॥
ऋणैः कदर्थ्यते नायं, नायं देवादिकिङ्करः ।
सर्वात्मना यो भजते सर्वान्तर्यामिणं नरः" ॥ १५ ॥
युगभिन्नां हरेरर्चामित्यूचे करभाजनः ।
विसर्जयामास निमिर्नृपश्चैतान् महात्मनः ॥ १६ ॥
नारदोक्तमिति श्रुत्वा वृत्तमानकदुन्दुभिः ।
कृतार्थतां प्राप्त इति प्रापश्चि किल पञ्चमे ॥ १७ ॥

चमसकरभाजनोक्तयः ।

(६) अथ बर्हिर्मुखाः स्तुत्वा चतुर्मुखमुखाः, प्रभो ! ।
आरोह धाम भगवन्नित्यूचुर्वृष्णिपुङ्गवम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रशापविनष्टेऽस्मिन् कुले सिद्धसमीहितः ।
आगन्तास्मीति गोविन्दो देववृन्दं व्यसर्जयत् ॥ २ ॥
उत्पातसूचितां भीतिमनिवार्यां निवेदयन् ।
चिन्तां चाभिनयन्नूचे भक्तचिन्तामणिर्हरिः ॥ ३ ॥
आर्यकाः ! साधु गच्छाम बृहच्छापसमाकुलाः ।
हतरुग्णशशित्रासं प्रभासं शर्मकाङ्क्षिणः ॥ ४ ॥
इत्यादिष्टान् गन्तुकामान् यदूनालक्ष्य साञ्जलिः ।
अवोचदुद्धवः श्रीशं श्रद्धातिशयशुद्धधीः ॥ ५ ॥
भवन्तं भगवन् ! मन्ये गमिष्यन्तं विचारतः ।
द्विजशापप्रतीघाते कृतोपेक्षः प्रभुर्यतः ॥ ६ ॥
उच्छिष्टपुष्टवपुषं निसर्गकरुणामय ! ।
विश्लेषकातरं नाथ ! सह भृत्यमिमं नय ॥ ७ ॥
अनुद्धतां भक्तिमतीमित्युद्धवसरस्वतीम् ।
निशम्य वक्तुमारेभे भक्तत्रासहरो हरिः ॥ ८ ॥
इत्यात्मविद्यामाख्यास्यन् विस्तरेण महीयसीम् ।
षष्ठे प्रस्तावनारूपं वृत्तं वर्णितवान् मुनिः ॥ ९ ॥

उद्धवप्रार्थना ।

(७) उद्धव ! प्रार्थितो देवैः, परस्परविरोधतः ।
क्षीणे यदुकुले धाम गन्तास्मि, विदितं त्वया ॥ १ ॥
न स्थातव्यं त्वया धीमन् ! मया त्यक्ते महीतले ।
अधर्ममात्रबहुले कलिकालसमाकुले ॥ २ ॥
त्यक्तसङ्गो युक्तमना ज्ञाततत्त्वः सदाचरन् ।
मां यास्यसि यथाकालं विमुच्यैतत्कलेवरम् ॥ ३ ॥
इति प्रभुवचः श्रुत्वा त्यागदुष्करतां वदन् ।
उद्धवः प्रार्थयामास गत्यन्तरविवित्सया ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भक्तजनोद्धारबद्धधीः किल माधवः ।
तमन्वगृह्णाच्छोचन्तं सुधामधुरया गिरा ॥ ५ ॥
उद्धव ! स्वं समुद्धर्तुं शक्नोति मनुजः स्वयम् ।
यदयं साङ्ख्ययोगाभ्यां वस्तु प्राप्नोति निर्भयम् ॥ ६ ॥
यदोर्दत्तेन संवादं वर्ण्यमानं मया शृणु ।
तत्त्वं विचारतो वेद्यमिति तेनैव निश्चिनु ॥ ७ ॥
" कुतः समासादितेयं ? निर्मला भगवन् ! मतिः ।
ययाऽवधीरिता साधो ! भवता लौकिकी गतिः " ॥ ८ ॥
इति पृष्टोऽथ यदुना चतुर्विंशतिसङ्ख्यकान् ।
ऊचे गुरूकृतान् दत्तः पदार्थानर्थकोविदः ॥ ९ ॥
परार्थतासहचरीं पराऽऽक्रमसहिष्णुताम् ।
शिक्षयन्ती गुरूभूता प्रथमा मेदिनी मम ॥ १० ॥
गुणदोषाऽविलिप्तत्वं संतोषमपि शिक्षयन् ।
बाह्याऽन्तरात्मा द्विविधो द्वितीयः पवनो गुरुः ॥ ११ ॥
व्यापकत्वमसक्तत्वं दर्शयन्निजसंगतम् ।
याति पश्यत आकाशस्तृतीयगुरुतां मम ॥ १२ ॥
शिक्षयन् स्वच्छतायुक्तां सर्वलोकोपजीव्यताम् ।
नद्यादिकवपुर्धारि वारि तुर्यो गुरुर्मम ॥ १३ ॥
तेजस्वितामुपदिशन् दुराधर्षत्वभूषिताम् ।
अव्यक्तव्यक्तरूपोऽयं दहनः पञ्चमो गुरुः ॥ १४ ॥
स्वतनुस्थिरताभ्रान्तिं भक्ष्याऽभक्ष्यनियन्त्रणाम् ।
त्याजयन्नेष दहनः प्रकारान्तरतो गुरुः ॥ १५ ॥
मृत्युजन्मजरादीनां दर्शयन् देहधर्मताम् ।
अखण्डहिमपिण्डात्मा षष्ठः शशधरो गुरुः ॥ १६ ॥
गुणैर्गुणगणाऽऽदानं प्रतिबिम्बाऽविकारिताम् ।
शिक्षयन् सप्तमः साक्षात् सप्तसप्तिर्गुरुर्मम ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शोचन् कुटुम्बं व्याधेन निर्दयेन निपातितः ।
गुरुः कुटुम्बसंत्यागे मम पारावतोऽष्टमः ॥ १८ ॥
इति प्रबोधप्रचुरं गुर्वष्टकसमाश्रितम् ।
श्रीहरिः श्रावयामास सप्तमे दत्तभाषितम् ॥ १९ ॥

श्रीकृष्णोद्धवसंवादेऽष्टौ दत्तगुरवः ।

(८) ईहामात्रपरित्यागेऽवधाने धृतिधारणे ।
यदृच्छाप्राप्तसंतोषे नवमोऽजगरो गुरुः ॥ १ ॥
लाभालाभैकरूपत्वेऽगाधत्वे स्वच्छतायुते ।
मर्यादाऽलङ्घकत्वे च दशमः सागरो गुरुः ॥ २ ॥
निषेधन् कर्मणा स्वेन नानारूपानुरागिताम् ।
एकादशो वह्निदग्धः पतङ्गो मामको गुरुः ॥ ३ ॥
अल्पभिक्षाजिघृक्षायां सर्वतः सारसंचये ।
स्वकरोदरपात्रत्वे द्वादशो मधुकृद्गुरुः ॥ ४ ॥
स्वसञ्चितेन मधुना सह नाशमुपागतः ।
संचयं वर्जयन्नन्यः कर्मणा मधुकृद्गुरुः ॥ ५ ॥
करिणीकारणाद् बद्धः करेणुर्निजकर्मणा ।
गुरुः स्त्रीवर्गसंसर्गवर्जनायां त्रयोदशः ॥ ६ ॥
संचितस्याऽन्यगामित्वं दक्षतामपि शिक्षयन् ।
गुरुर्यतित्वमाप्तस्य मधुहर्ता चतुर्दशः ॥ ७ ॥
ग्राम्यगीतप्रवणतां त्याजयन्निजकर्मणा ।
व्याधबद्धो गानवशो मृगः पञ्चदशो गुरुः ॥ ८ ॥
अथाऽन्यो नृत्यगीतादिप्रसक्तः स्त्रीविमोहितः ।
ऋष्यशृङ्गः सङ्गभङ्गे कुरङ्गीतनयो गुरुः ॥ ९ ॥
सभक्ष्यबडिशग्रासात्प्राप्तमृत्युर्जलेचरः ।
जिह्वाजयोपदेशाय मीनो मे षोडशो गुरुः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छिन्नाशा प्रमदं प्राप्ता दुराशापाशवर्जने ।
वाराङ्गना पिङ्गलाख्या मम सप्तदशो गुरुः ॥ ११ ॥
इति दत्तः समाचष्ट गुरूनजगरादिकान् ।
नवेति भगवानूचे भक्तमुद्धवमष्टमे ॥ १२ ॥

दत्तस्याऽजगराद्या नव गुरवः ।

९) सामिषो बलिभिर्दुग्धः सुखं प्राप्तो निरामिषः ।
अपरिग्रहशिक्षायै कुररोऽष्टादशो गुरुः ॥ १ ॥

मानापमानव्यग्रत्वचिन्तादिरहितस्थितेः ।
साऽऽत्मारामत्वसंप्राप्तेरूनविंशोऽर्भको गुरुः ॥ २ ॥

शब्दबाहुल्यसाशङ्का क्रमनिर्भिन्नकङ्कणा ।
निःसङ्गतोपदेशाय गुरुर्विंशः कुमारिका ॥ ३ ॥

सवाद्यघोषं राजानमजानन् पार्श्वनिर्गतम् ।
एकविंशो वृत्तिरोधे मदीयः शरकृद्गुरुः ॥ ४ ॥

विविक्तस्वैरचारित्वे गेहाऽनारम्भणे तथा ।
अलक्ष्यत्वेऽवधाने च द्वाविंशः कुण्डली गुरुः ॥ ५ ॥

ऊर्णया जालमातन्वँस्तद् ग्रसन् सिद्धविभ्रमः ।
ईशज्ञप्तेरूर्णनाभिस्त्रयोविंशो गुरुर्मम ॥ ६ ॥

ध्यानाद्ध्येयत्वसंप्राप्तिं स्ववृत्तेन निवेदयन् ।
चतुर्विंशः स चतुरो मम पेशस्करो गुरुः ॥ ७ ॥

मलमूत्रादिभिः पूर्णः प्रतिक्षणविनश्वरः ।
विरागाय विवेकाय काय एव गुरुर्मम ॥ ८ ॥

प्रियापुत्रप्रीतिहेतोः कृतेन किल कर्मणा ।
जायते बीजरूपेण हन्त ! जन्तुः पुनः पुनः ॥ ९ ॥

इन्द्रियाणि स्वविषयान् प्रति नेतुमनारतम् ।
समाकर्षन्ति विवशं सपत्न्य इव देहिनम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानवैः श्रेयसे यत्नः कर्तव्यः कृतसाधनैः ।
आकीटजुष्टैर्विषयैरलमेतैरनिष्टदैः ॥ ११ ॥
इति दत्तवचः श्रुत्वा कृतार्थोऽभूद्यदुः सुधीः ।
उद्धवैधि त्वमप्येवमित्यूचे नवमेऽच्युतः ॥ १२ ॥

दत्तस्य कुररादयाः सप्त गुरवः ।

(१०) इह स्वाभासचिद्रूपो नित्योऽयं कर्तृतादिभिः ।
शरीरधर्मैरध्यस्तैरात्मा कर्त्रादितां गतः ॥ १ ॥
अवास्तवं वस्तुतया भासमानं समन्ततः ।
प्रपञ्चमेनमखिलं विद्यैवैका प्रबाधते ॥ २ ॥
कर्म नाऽऽत्यन्तिकं शर्म दातुमीष्टे कृतं जनैः ।
प्रपातः क्षीणपुण्यानां दृष्ट एव पुरातनैः ॥ ३ ॥
आकीटमासुरज्येष्ठं भयेनाऽऽकुलितं जगत् ।
द्वैतदृष्टितिरोधानादपयाति भयं महत् ॥ ४ ॥
गुणवैषम्यजनिता नैर्गुण्येन विलीयते ।
द्वैतदृष्टिरिति प्रोचे भगवानुद्धवं, स च– ॥ ५ ॥
सत्त्वे गुणानां विच्छेदेऽ, सत्त्वे साधनसंचये ।
उपपत्तिं, बद्धमुक्तभेदं चाऽपृच्छदच्युतम् ॥ ६ ॥

विद्यैव प्रपञ्चं बाधते ।

(११) अविद्यया मतो बन्धः पुंसो मायास्वरूपया ।
विद्यया च मता मुक्तिस्तादृश्या ज्ञानरूपया ॥ १ ॥
अविद्यायाः सविद्याया मायारूपतया स्वतः ।
तात्त्विकत्वेन घटते न मुक्तिर्नापि बन्धनम् ॥ २ ॥
अनाद्यविद्यासंभूतमहत्तत्त्वाऽनुबिम्बितः ।
मामकीनश्चित्प्रकाशो जीव इत्यभिधीयते ॥ ३ ॥
वृक्षमेकं परिष्वज्य सख्यभाजोः सुपर्णयोः ।
बली निरन्न एकोऽन्यो दुर्बलः पिप्पलाशनः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृतिगोचरदेहस्थः स्वप्नाद् बुद्धो यथा जनः ।
देहस्थोऽपि तथा विद्वान् न देहमधितिष्ठति ॥ ५ ॥
अदेहस्थः स्वप्नदर्शी यथा देहाभिमानवान् ।
अविद्वान् देहहीनोऽपि तथा देहाभिमानवान् ॥ ६ ॥
बन्धनं भासते मिथ्याऽप्याऽऽरूढाया अहङ्कृतेः ।
शुद्धो बुद्धो नित्यमुक्तः परमात्माऽनहङ्कृतिः ॥ ७ ॥
बद्धस्य विषमा दृष्टिर्विविधेहाप्रवर्तिता ।
मुक्तस्य तु समादृष्टिरीहामात्रविवर्जिता ॥ ८ ॥
परब्रह्मानभिज्ञानां शब्दब्रह्मविदां सताम् ।
श्रमः परिश्रमफलो वन्ध्यां गामिव बिभ्रताम् ॥ ९ ॥
निर्गुणोपासनं कर्तुमशक्तः साधुसङ्गतः ।
मद्भक्तिं प्राप्य लभते क्रमेण परमं पदम् ॥ १० ॥
समदृष्टिरनीहश्च कृपालुर्जितषड्गुणः ।
मदेकतानतां प्राप्तः साधुरित्यभिधीयते ॥ ११ ॥
अनुरक्तिर्मयि परा नवलक्षणलक्षिता ।
भक्तिरित्युद्धवमिह प्रोवाच मधुसूदनः ॥ १२ ॥

भक्तेः परमं पदं लभ्यते ।

(१२) इतरत् साधनं सर्वं मदवाप्तिविधायकम् ।
नैवावगाहते साधो ! सत्सङ्गस्य कलामपि ॥ १ ॥
अप्यन्त्यजाः सदितिजा दनुजा निकषात्मजाः ।
सत्सङ्गस्य प्रसादेन मामवापुः परःशताः ॥ २ ॥
प्राप्ताः सतामेव सङ्गात्सुग्रीवहनुमदृजाः ।
अवाञ्चिताः प्रपञ्चेन तिर्यञ्चोऽपि परं पदम् ॥ ३ ॥

---

(१) श्रवणम् १, कीर्तनम् २, स्मरणम् ३, पादसेवनम् ४, अर्चनम् ५, वन्दनम् ६, दास्यम् ७, सख्यम् ८, आत्मनिवेदनम् ९, इत्येतैर्लक्षणैः पूर्णभक्तिः स्यान्नवलक्षणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जारबुद्ध्याऽनुयातानां मुग्धानां व्रजसुभ्रुवाम् ।
आसीन्मदेकतानानां गतिः साधनदुर्लभा ॥ ४ ॥
विधिं निषेधं चोत्सृज्य मदेकशरणो भव ।
उद्धव ! स्वयमायातु विलयं भीषणो भवः ॥ ५ ॥
कर्तृत्वादिमतिर्यावद्विलयं नैति सर्वतः ।
गोचरत्वं समायाति तावद्विधिनिषेधयोः ॥ ६ ॥
सत्त्वशुद्धौ प्रजातायां विलीनायामहङ्कृतौ ।
प्रवर्ततेऽनधीकारान्न निषेधो न वा विधिः ॥ ७ ॥
क्रमाभिव्यक्ततां याता मदभिव्यक्तिरूपिणी ।
हितार्थिनाऽनुरोद्धव्या सुधिया श्रुतिवैखरी ॥ ८ ॥
मद्व्यक्तिरूपः संसारतरुरेष पुरातनः ।
द्वि[1]बीजितां समासाद्य शत[2]मूलत्वमृच्छति ॥ ९ ॥
स्कन्ध[3]पञ्चकसंपन्नस्त्रि[4]नालो रस[5]पञ्चकः ।
द्वयोः[6] सुपर्णयोर्नीडो रुद्र[7]शाखस्त्रि[8]वल्कलः ॥ १० ॥
फल[9]द्वितयसंसृष्टः स्पृष्टमार्तण्डमण्डलः ।
अश्नन्ति फलमस्यैकं हंसाः[10] गृध्राः[11] परं फलम् ॥ ११ ॥
ज्ञात्वैतद्वेदविद्भक्तिधारविद्याकुठारभृत् ।
छित्त्वैनं साधनं मुञ्चेत्यादिशद् द्वादशे हरिः ॥ १२ ॥

संसारतरुर्विद्याकुठारेण च्छेद्यः ।

(१३) वृद्धिमायाति शनकैः सत्त्वं सात्त्विकसेवया ।
सत्त्वोत्कर्षे च विद्याया आविर्भावः प्रजायते ॥ १ ॥

---

(१) पुण्यपापे बीजे । (२) नानावासना मूलानि । (३) पञ्चमहाभूतानि स्कन्धाः । (४) त्रयो गुणा नालरूपाः । (५) शब्दादयः पञ्च रसाः । (६) जीव-ब्रह्म-निवासभूमिः । (७) एकादशेन्द्रियैः शाखारूपैर्युक्तः । (८) वात-पित्त-कफमयवल्कलवान् । (९) सुखदुःखरूपफलद्वयसंसर्गी । (१०) सुखफलं भुक्ताः । (११) दुःखफलसंतापिनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषया विषमोदर्का निषेव्यन्ते विमोहितैः ।
हितं दत्तेऽन्यतो रुद्धं मनो मयि निवेशितम् ॥ २ ॥
गुणाश्चित्तं न मुञ्चन्ति चित्तं चैतान् न मुञ्चति ।
विधिं विश्लेषमेतेषामपृच्छन् सनकादिकाः ॥ ३ ॥
अज्ञातप्रश्नबीजेन विधिना व्यसनेऽर्थितः ।
पुरोऽभूवं हंसरूपस्तेऽपृच्छन् को ? भवानिति ॥ ४ ॥
"ब्रह्मैवेदं जगत्सर्वं नेह नानास्ति किंचन ।
इत्यद्वैतदृशां प्रश्नः को भवानिति नोचितः ॥ ५ ॥
महाभूतमयान्येव भूतानि सकलान्यपि ।
इत्यतोऽनुचितः सोऽयं प्रश्नो द्वैतदृशामपि ॥ ६ ॥
किंच बाह्यैरान्तरैश्च करणैर्गोचरीकृतम् ।
मद्रूपमेव जानीत प्रपञ्चमखिलं सुताः ! ॥ ७ ॥
जीवो मदात्मा सोऽध्यासाद्गुणचित्तात्मतां गतः ।
अध्यासदूरीकरणात्स्वं रूपं प्रतिपद्यते ॥ ८ ॥
न चित्तता न गुणता जीवस्याऽस्ति मदात्मनः ।
ब्रह्मैकताभावनया कूटताऽस्य प्रकाशते ॥ ९ ॥
बुद्धेर्गुणत्रयकृता अवस्था जागरादिकाः ।
आत्मा तत्साक्षितां प्राप्तः पृथगेवेति सिद्ध्यति ॥ १० ॥
आत्मा संपद्यते तुर्ये यदा मयि तदा गुणाः ।
चित्तं जहति चित्तं च निर्गुणं सत्प्रलीयते ॥ ११ ॥
संपन्नतां प्रयातश्च प्रारब्धधृतविग्रहः ।
न प्रबुद्ध इव स्वप्ने प्रपञ्चेऽत्र प्रसज्जति ॥ १२ ॥
एतज्जानीत परमं रहस्यं साङ्ख्ययोगयोः ।
युष्मच्छङ्कां समाधित्सुः सोऽहं हंसोऽस्म्युपागतः" ॥ १३ ॥
इत्युद्धव ! मया हंसरूपेण प्रतिबोधिताः ।
आसन् विच्छिन्नसन्देहाः सनकाद्याः सवेधसः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहं च तैर्भक्तिभाग्भिः संस्तुतोऽन्तरधामिति ।
प्रोचे त्रयोदशेऽध्याये माधवो भक्तमुद्धवम् ॥ १५ ॥

आत्मा सर्वसाक्षी शुद्धः।

(१४) यथारुचि यथाबुद्धि यथाप्रकृति शर्म्मणे ।
यज्ञादीन्यवलम्बन्ते साधनानि शरीरिणः ॥ १ ॥
शर्म्माऽऽत्यन्तिकमप्राप्य तेभ्यः संसरतां सताम् ।
केषांचिदेव कृतिनां मद्भक्तौ जायते रुचिः ॥ २ ॥
मदङ्घ्रिद्वन्द्वसक्तानां विरक्तानां समन्ततः ।
निर्वाणमपि भक्तानां मदीयानां तृणायते ॥ ३ ॥
निर्वैरान् निःस्पृहाञ्छान्तान् भजमानानकिञ्चनान् ।
पावित्र्यातिशयं वाञ्छन्ननुगच्छामि सज्जनान् ॥ ४ ॥
सतीष्वपि दयाशान्तिविद्यासु तनुधारिणाम् ।
न विना भक्तिसंपर्कादात्मशुद्धिः प्रजायते ॥ ५ ॥
तुष्यन् गायन् रुदन् नृत्यन् हसन् गद्गदमुग्धगीः ।
पुनाति लोकानखिलान् खलु भक्तिपवित्रधीः ॥ ६ ॥
विषयाञ्जुषमाणस्य हृषीकाणि तदात्मताम् ।
यान्ति, मां जुषमाणस्य किं न यान्तु मदात्मताम् ॥ ७ ॥
अतः प्रयततां प्राप्तः सुखमासनमाश्रितः ।
मनो निरुध्य मां ध्यायेत्प्राणायामपरायणः ॥ ८ ॥
नादानुसन्धानपरः प्रणवं दीर्घमुच्चरन् ।
जायते शुद्धधीर्जन्तुर्मासेन विजिताऽनिलः ॥ ९ ॥
विजयादनिलस्याऽथ चेतसि स्थिरतां गते ।
हृत्सरोजनिविष्टं मां तुष्टं ध्यायेद्यथाश्रुतम् ॥ १० ॥
मदीयमूर्तिनिध्यानान्मानसे धूतकिल्बिषे ।
ध्यानादपि निवर्त्यैतत् क्रमान्निर्वृत्तितां नयेत् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगस्य परमा काष्ठा सेयं सिद्धसमीहिता ।
इत्युद्धवमुपादिक्षद्वासुदेवश्चतुर्दशे ॥ १२ ॥

भक्तेरेवात्मा शुद्ध्यति।

(१५) वशीकृतेन्द्रियग्रामो जितश्वासः स्थिरासनः ।
मां धारयन्नवाप्नोति सिद्धीरष्टौ तथाऽपराः ॥ १ ॥
महत्तमं मम पदं प्राप्स्यता सिद्धयश्च ताः ।
विघ्ना इति परित्याज्या भक्तिभाजा महात्मना ॥ २ ॥
मदेकतानतां यातं निरस्तविषयस्पृहम् ।
दास्यो यथा महाभागं वरिवस्यन्ति सिद्धयः ॥ ३ ॥
इत्युद्धवं प्रापयितुं प्रासव्यपरमावधिम् ।
भक्तत्राणधृतप्राणः प्रोचे पञ्चदशे हरिः ॥ ४ ॥

भक्तस्य सिद्धयोऽन्तरायाः।

(१६) शक्तेरतिशयं प्राप्ता भजमानोपयोगिनीः ।
प्राह स्म षोडशे भूतीर्मुख्याः कतिचिदच्युतः ॥ १ ॥
भूतीर्भजन्नपि शनैः श्रद्धयैव यथारुचि ।
जन्तुर्मामेव यातीति ताः प्रदर्शितवान् प्रभुः ॥ २ ॥

भगवद्विभूतयः।

(१७) वर्णाश्रमोचितं स्वीयं कुर्वन् कर्म क्रमान्नरः ।
शुद्धसत्त्वतया गच्छेज्ज्ञानयोगाधिकारिताम् ॥ १ ॥
इत्युद्धवेन संपृष्टोऽध्याये सप्तदशे हरिः ।
ऊचे धर्मान् पृथक्कृत्य ब्रह्मचारिगृहस्थयोः ॥ २ ॥
तत्र च, श्रीगुरुकुले निवासः सौम्यशीलता ।
साङ्गश्रुतेरध्ययनं शुचिता मितभोजिता ॥ ३ ॥
सेवा गुरो रवेरग्नेर्यथाकालं यथोचितम् ।
स्त्रीसंपर्कपरित्यागो गायत्रीजपसक्तता ॥ ४ ॥
प्रशान्तचित्तता भिक्षावृत्तिता गुरुभक्तता ।
इत्युपादेशि धर्मोऽत्र हरिणा ब्रह्मचारिणः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यनैमित्तिकश्राद्धदेवपूजनसक्तता ।
शास्त्रे श्रद्धा हरौ भक्तिर्गृहेष्वतिथिवत् स्थितिः ॥ ६ ॥
स्वकुटुम्बानुमोदित्वं विभवे नातिसक्तता ।
इति चोक्ता गृहस्थस्य धर्माः शास्त्रानुसारिणः ॥ ७ ॥

ब्रह्मचारिगृहस्थयोर्धर्माः ।

(१८) अष्टादशे वनस्थस्य यतिनोऽपि प्रकीर्तिताः ।
असाधारण्येन धर्माः साधारण्येन केचन ॥ १ ॥
तत्र, द्वन्द्वसहिष्णुत्वमात्मतत्त्वानुचिन्तनम् ।
नित्यकर्मविधायित्वं संतोषः समदृष्टिता ॥ २ ॥
अकृष्टपच्यवृत्तित्वं विविक्तस्थानवासिता ।
इति वानप्रस्थधर्मा यथाशास्त्रं प्रकाशिताः ॥ ३ ॥
एकाकिताऽनाश्रमिताऽनीहता समदर्शिता ।
अपरिग्रहता चेति यतेर्धर्माः प्रकीर्तिताः ॥ ४ ॥
मनसा कर्मणा वाचा प्राणभाजामपीडनम् ।
षड्वर्गस्य परित्यागः संतोषेण प्रवर्तनम् ॥ ५ ॥
वर्णाश्रमोचिताचारपालनं तत्त्वचिन्तनम् ।
इत्यूचिरे नृणां धर्माः साधारणतया स्थिताः ॥ ६ ॥

वानप्रस्थयतिसाधारणधर्माः ।

(१९) मदवाप्तिर्भवेद्यावत्तावज्ज्ञानं समाश्रयेत् ।
सिद्धार्थतां गतो ज्ञानमज्ञानमिव वर्जयेत् ॥ १ ॥
धर्मा मद्भक्तये साध्याः सा साध्या ज्ञानसिद्धये ।
सिद्धज्ञानस्य च सतो न साध्यं नापि साधनम् ॥ २ ॥
उपासिताः सनियमा यमाः शमदमादयः ।
योगाङ्गतां समापन्ना जनयन्ति निरङ्गताम् ॥ ३ ॥
दोषः पृथक्त्वेन दृष्टिः कथ्यते गुणदोषयोः ।
गुण एतद्द्वयाऽदृष्टिः प्रोच्यते शास्त्रवेदिभिः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यूनविंशे भगवान् समस्तैरपि साधनैः ।
ज्ञानस्य साधनं कृत्यमित्यूचे भृत्यवत्सलः ॥ ५ ॥

द्वैतदृष्टिर्दोषोऽद्वैतदृष्टिश्च गुणः ।

(२०) विरक्तानां कर्मफले कर्मन्यासकृतां सताम् ।
अवदातोदात्तधियां ज्ञानयोगाधिकारिता ॥ १ ॥
फलानुरक्तमनसां नानाकर्मकृतां सताम् ।
संसारिणामभिहिता कर्मयोगाधिकारिता ॥ २ ॥
यदृच्छाजातभक्तीनां निर्वेदांशवतां सताम् ।
श्रद्धानुविद्धमनसां भक्तियोगाधिकारिता ॥ ३ ॥
सुदुश्चरं ज्ञानवर्त्म विना भक्तिं न लभ्यते ।
कर्मणो वर्त्म शनकैर्भक्तिमेवोपतिष्ठते ॥ ४ ॥
तीव्रेण भक्तियोगेन भजमानाय धीमते ।
न रोचते मुक्तिरपीत्यूचे विंशे जगत्पतिः ॥ ५ ॥

ज्ञानादियोगाधिकारिणः ।

(२१) "एत एव मता मार्गा भक्तिज्ञानक्रियात्मकाः ।
अमार्गगामी गन्तव्यं प्रदेशं नाऽधिगच्छति ॥ १ ॥
यथाधिकारं विधिषु प्रवृत्तिर्गुण उच्यते ।
अधिकारोपप्लवेन प्रवृत्तिर्दोष उच्यते ॥ २ ॥
धर्मागमनिबद्धोऽपि शुद्ध्यशुद्धिसमाश्रयः ।
गुणदोषविभागोऽयमधिकारनिबन्धनः ॥ ३ ॥
निवृत्तिराजमार्गस्य प्राप्तये श्रुतिदर्शिता ।
प्रवृत्तिर्वर्तनी नेयं सदा संचारमर्हति ॥ ४ ॥
दीर्घं ददाति दिङ्मोहं पुंसां मतिमतामपि ।
अनन्तपद्धतियुता सेयं श्रुतिमहाटवी ॥ ५ ॥
यया कयाऽपि पद्धत्या गच्छन्नस्खलितं जनः ।
अधिगच्छति कालेन मध्यं च महतोऽध्वनः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिपर्ण लघुफलं शिखालम्बिबृहत्फलम् ।
आरोढुमाशिखं वेद नैव वेदद्रुमं जनः ॥ ७ ॥
बीजं वृक्षत्वमायातं पश्यन् बुद्ध्या गभीरया ।
स्वयमेव विजानाति नेह नानास्ति किंचन" ॥ ८ ॥
इत्येकविंशे वेदान्तवेदनीयगुणोदयः ।
हरिर्वेदान्ततात्पर्यमाचचक्षे दयामयः ॥ ९ ॥

वेदान्ततात्पर्यम् ।

(२२) उपायत्वं प्रयातानां बोधे मायामयात्मनाम् ।
तत्त्वानां गणनाशैली प्रतिशास्त्रं विभिद्यते ॥ १ ॥
उपेये न विवादोऽस्ति विवादैः किमुपायगैः ।
श्रद्धातिशयसंपत्तिद्वारकज्ञानसाधकैः ॥ २ ॥
तदेकं वस्तुतस्तत्त्वं तदन्यच्च मृषा ततः ।
गणनाऽनियता तेषां कल्पनाजातजन्मनाम् ॥ ३ ॥
बोधसौकर्यसिद्ध्यर्थं तत्त्वानामल्पताऽऽद्दता ।
बहुता तु प्रपञ्चार्थं शास्त्रविद्भिः समाश्रिता ॥ ४ ॥
अन्तर्भावमभिप्रेत्य तत्त्वबाहुल्यवादिनाम् ।
अविरुद्धं प्रसंख्यानं पौर्वापर्यं च धीमताम् ॥ ५ ॥
विकारिणी भूरिरूपा चिच्छक्तिविकला सती ।
गुणत्रयमयी पुंसः प्रकृतिर्भिद्यते गुणैः ॥ ६ ॥
देहातिरिक्त एवायमात्माऽध्यासवशात्पुनः ।
विशुद्धचित्स्वरूपोऽपि देहधर्मैः कलङ्कितः ॥ ७ ॥
उपाधिजनितं विद्धि तस्येदं जननादिकम् ।
अयःपिण्डगतो वह्निर्वस्तुतो नैव वर्तुलः ॥ ८ ॥
व्यापकोऽयं लिङ्गदेहाऽध्यासेन जननादिभिः ।
कूटस्थचित्स्वरूपोऽपि संसरन्निव लक्ष्यते ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दारुयोगवियोगाभ्यामग्नेरिव चिदात्मनः ।
देहयोगवियोगाभ्यां जन्मनाशौ प्रकल्पितौ ॥ १० ॥
इति तत्त्वप्रसंख्यानाऽविरोधं, पुंप्रधानयोः ।
विवेकं, जन्मनिधने, द्वाविंशेऽवोचदच्युतः ॥ ११ ॥

तत्त्वसमन्वयः, पुंप्रधानविवेकः, जन्ममृती च ।

(२३) न तथा कण्टकास्तीक्ष्णा न तथा निशिताः शराः ।
यथा कृन्तन्ति मर्माणि प्राणिनां परुषा गिरः ॥ १ ॥
आलोक्यते संचरता लोके द्वन्द्वसहो जनः ।
आलुलोकेऽखिले लोके न दुर्वादसहो जनः ॥ २ ॥
जयत्रयं जितं तेन हितं तेन समर्जितम् ।
न क्षुभ्यति मनो यस्य श्रुत्वा वचनमूर्जितम् ॥ ३ ॥
तस्य शक्रप्रभृतयः सर्वेऽपि त्रिदशा वशाः ।
दुर्जनानां गिरो येन सोढाः कुलिशकर्कशाः ॥ ४ ॥
उद्धव ! प्राप्स्यसे येन सर्वदुःखसहिष्णुताम् ।
आवन्तेयस्य विप्रस्य वृत्तं तत् सादरः शृणु ॥ ५ ॥
कदर्यतार्जितधनः क्रोधी कश्चिदवन्तिजः ।
उत्सन्नधनतां प्राप चरमे वयसि द्विजः ॥ ६ ॥
परिवारपरित्यक्तोऽनुतप्तोऽथ विचारवान् ।
शममास्थाय मेधावी भिक्षुकः स भ्रमन्नभूत् ॥ ७ ॥
मर्मस्पृग्भिर्दुर्वचनैस्तर्जनैस्ताडनैरपि ।
दुर्जनैः परिचिन्वद्भिः स बभूव कदर्थितः ॥ ८ ॥
सात्त्विकीं धृतिमाश्रित्य प्रशान्तविमलाशयः ।
प्रफुल्लवदनाम्भोजः स सहिष्णुरिदं जगौ ॥ ९ ॥
न देवताकालकर्मग्रहाद्या नाप्ययं जनः ।
गुणानुवृत्तं स्वं चित्तं निमित्तं सुखदुःखयोः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवानपि वशे कुर्वंश्चित्तं वशयतीह यः ।
स देवदेव एव स्यादतीतभुवनत्रयः ॥ ११ ॥
आत्माऽक्रियः सुखादौ च भौमयोः कर्तृकर्मते ।
जिह्वायां दन्तदष्टायां कस्मै कुप्यति चेतनः ॥ १२ ॥
पुंसः साक्षिण एकस्य देहे देवैः कदर्थिते ।
स्वाङ्गेन स्वाङ्गपीडायामिव कोपो न युज्यते ॥ १३ ॥
पश्यतः सत्यमद्वैतं द्वैतं मिथ्या प्रजानतः ।
आत्मनो नैव घटते सुखदुःखादिहेतुता ॥ १४ ॥
व्यञ्जयन्तो जन्मभाजां सुखदुःखादिकं ग्रहाः ।
पीडिता अन्यपीडायां कथमायान्तु हेतुताम् ॥ १५ ॥
जडत्वाद्वपुषः पुंसश्चेतनत्वाद्विवेकिनाम् ।
मिथ्या कर्मेति तस्याऽस्तु कथं दुःखादिहेतुता ॥ १६ ॥
कालस्य दुःखदातृत्वे पुंसः किं स्यात्तदात्मनः ।
स्वं दग्धुं नैति वैदग्ध्यीं समिद्धोऽपि हुताशनः ॥ १७ ॥
इति भिक्षुः क्षमी गायन्नचिरादाप सिद्धताम् ।
इत्युद्धवं त्रयोविंशे हरिरूचे तितिक्षुताम् ॥ १८ ॥

भिक्षुगीतम् ।

(२४) महदादिमहाभूतपर्यन्तोत्पत्तिपूर्वकम् ।
स्वस्वकारणवर्गान्तर्लयरीतिं विभावयन् ॥ १ ॥
प्रतिक्षणपरीणामानागमापायिनोऽखिलान् ।
आलोचयन् पदार्थांश्च न मोहेनाभिभूयते ॥ २ ॥
इत्युद्धवं चतुर्विंशे साङ्ख्यसिद्धान्तमाश्रितः ।
आविर्भावतिरोभावौ प्रपञ्चस्याऽवदद्धरिः ॥ ३ ॥

तत्त्वाविर्भावतिरोभावौ ।

(२५) गुणत्रयमयं सर्वं जगदेतच्चराचरम् ।
अहैतुकीं विना भक्तिमानुगुण्यं न मुञ्चति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्रियाणां समस्तानां प्रसादः स्थिरचित्तता ।
सुखं प्रकाशो भावानामित्येताः सत्त्ववृत्तयः ॥ २ ॥
आरम्भः कर्मणां तृष्णा विषयाणामनेकधा ।
चेतस्तरलभावश्च राजस्यः खलु वृत्तयः ॥ ३ ॥
निद्रा प्रवृत्तिवैमुख्यं प्रमादो मूढचित्तता ।
एवंविधा बुधैः प्रोक्तास्तामस्यः किल वृत्तयः ॥ ४ ॥
परिचिन्वन् गुणान् वृत्त्या वृत्तिरोधाद्गुणाञ्जयन् ।
क्रमान्नैर्गुण्यमायाति रीतिरेषा श्रुतीरिता ॥ ५ ॥
इत्युद्धवं पञ्चविंशे गुणातीतं विधित्सता ।
प्रपञ्चिताः श्रीहरिणा सत्त्वादिगुणवृत्तयः ॥ ६ ॥

गुणानां वृत्तयः ।

(२६) सङ्गः सर्वात्मना हेयः सर्वेषामेव धीमता ।
निःसङ्गतैव युक्तानां संद्योमुक्तिप्रदा मता ॥ १ ॥
पाशैर्मुच्येत बद्धः सन्बुद्धिमानायसैरपि ।
नतूद्धव ! प्रेमपाशैर्बद्धः कश्चिद्विमुच्यते ॥ २ ॥
उर्वशीविरहादैलः प्रमत्तस्तदनुग्रहात् ।
लोकमाप्सरसं प्राप्य निर्विण्णः सन्निदं जगौ ॥ ३ ॥
"नमो मोहाय महते लुठति स्म यमाश्रितः ।
गणिकायाः पदद्वन्द्वे नरदेवशिरोमणिः ॥ ४ ॥
बृहत्तेजसमात्मानं सहसैव चिरोदितम् ।
कादम्बिनीव द्युमणिं तिरोधत्ते नितम्बिनी ॥ ५ ॥
तैस्तैरवयवैः स्त्रीणां निजं खण्डयतां मनः ।
मूढतामूढविपदां कः समालोचतां जनः ॥ ६ ॥
उन्नमद्यौवनं वीक्ष्य मृगाक्षीणामनुक्षणम् ।
क्षीणामवनतिं यान्तीं धिग्धियं ! नः सहस्रधा ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृगन्तदाम्ना द्विर्बद्धं दत्तदन्तनखक्षतम् ।
स्त्रियः साम्ना नर्तयन्ति प्लवङ्गमिव पूरुषम् ॥ ८ ॥
प्रसूनबाणविद्धेन हा ! पुंसा हतबुद्धिना ।
योषितामधरक्लेदः पीयूषमिति पीयते ॥ ९ ॥
विण्मूत्रमांसरुधिरपूयपात्रेऽपि योषिताम् ।
गात्रेऽनुरक्तो मादृक्षः कृमेर्न व्यतिरिच्यते ॥ १० ॥
आ ! जाड्यं गर्हितस्पर्शा रुचा केवलमुज्ज्वलाम् ।
चिरं चितानलज्वालामिव बालामुपास्महि ॥ ११ ॥
निर्विकारः क्वायमात्मा सदानन्दमयोऽमलः ।
ऊर्मिमान् विकृताकारः कायः क्वायं सदाऽविलः" ॥ १२ ॥
ऐल एवं मुहुर्गायन् महामोहादमुच्यत ।
इति षड्विंशके वृत्तं जगत्पतिरवोचत ॥ १३ ॥

ऐलगीतम् ।

(२७) रागाकुलितचित्तानामसक्तत्वं न जायते ।
क्रियायोगव्यापृतानां रागः प्रक्षीयते शनैः ॥ १ ॥
अतश्च सर्ववर्णानामाश्रमाणां च शर्मणे ।
क्रियायोगः समाम्नातः सद्यश्चित्तप्रसादनः ॥ २ ॥
कृतनित्यक्रियः श्रद्धाधौतधीः प्रतिमादिषु ।
मामर्चयेद्वैदिकेन विधिना तान्त्रिकेण वा ॥ ३ ॥
यथाविधि यथावित्तं यथाशक्ति यथारुचि ।
मद्बुद्ध्या प्रतिमामर्चन् सिद्धिमाप्नोत्यभीप्सिताम् ॥ ४ ॥
प्रासादं रचयन् रम्यं प्रतिमां स्थापयन् मम ।
नित्यं प्रपूजयन् भक्त्या भवेज्जन्तुर्मया समः ॥ ५ ॥
इति श्रेयःसमाधानं तिरोधानं कुकर्मणाम् ।
सप्तविंशे स्वपूजाया विधानमवदत्प्रभुः ॥ ६ ॥

आराधनविधानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२८) प्रपञ्चमखिलं पश्यन् गुणत्रयविनिर्मितम् ।
शुद्धधीर्न प्रवर्तेत कस्यचित्स्तुतिनिन्दयोः ॥ १ ॥
वस्तुजातं सुखं दुःखं मोहं सृजदनारतम् ।
अस्वतन्त्रं सृजत्येका प्रकृतिः पुरुषाश्रिता ॥ २ ॥
बुद्धः स्वप्नोद्भवं दुःखं यथा नाप्नोति चेतनः ।
तथा संसारजं दुःखं प्रबुद्धो नाप्नुते जनः ॥ ३ ॥
शोकहर्षादयो भावा अहङ्कृतिनिबन्धनाः ।
अनहङ्कृतयः सन्तो मुक्तिं गच्छन्ति सज्जनाः ॥ ४ ॥
आद्यन्तैकस्वरूपस्य मध्ये विविधरूपताम् ।
विद्धि स्वर्णस्येव मम व्यपदेशप्रवर्तिताम् ॥ ५ ॥
अहङ्कृतौ प्रसुप्तायां लयस्तदनुगामिनाम् ।
इत्यतः संसृतिस्तस्या, नात्मनः सर्वसाक्षिणः ॥ ६ ॥
आत्मा भूतेन्द्रियादिभ्यः सर्वेभ्यः परतः स्थितः ।
इति संबध्यते नाऽयं तद्धर्मैर्जननादिभिः ॥ ७ ॥
समायातैर्विनिर्यातैर्जीमूतैर्मरुदीरितैः ।
अविवेकवतामेव भिद्यते भगवान् रविः ॥ ८ ॥
निरहङ्कृतितासिद्ध्यै सङ्गः सर्वत्र वर्ज्यताम् ।
परिमार्जितदौर्भाग्यं वैराग्यं सम्यगर्ज्यताम् ॥ ९ ॥
अदग्धायां वासनायां पुनर्जन्तुर्निबध्यते ।
अनिर्हृतेषु दोषेषु व्याधिर्भूयः प्रवर्तते ॥ १० ॥
हृते तमसि सूर्येण दृशा वस्तु निरीक्ष्यते ।
विवेकेन हते मोहे स्वत आत्मा प्रकाशते ॥ ११ ॥
भूतसंघातसंभूतं कर्मनिघ्नं विनश्वरम् ।
देहमेव किलात्मानं मन्यन्ते चर्मचक्षुषः ॥ १२ ॥
धारणाभिः स्तवैर्ध्यानैरासनैरौषधैरपि ।
योगान्तरायानुदितान्निरस्यति महामतिः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगोऽयं तीव्रवेगानामासन्न इति, सिद्धये- ।
पिण्डस्थैर्याय यत्नोऽपि वृथा पण्डितमानिनाम् ॥ १४ ॥
इत्यष्टाविंशतितमेऽध्याय उद्धवशुद्धये ।
योगचर्यामुपादिक्षत्संक्षेपात्पुनरच्युतः ॥ १५ ॥

योगचर्या ।

(२९) निरुद्धचेतसः शुद्धाः प्रमादेन कदाचन ।
आक्षिप्ता अपि भक्त्यैव स्वं समादधते जनाः ॥ १ ॥
विविक्तपुण्यदेशस्थः सत्सङ्गप्राप्तसन्मतिः ।
मदेकताभावनया भेदभीतिविवर्जितः–॥ २ ॥
मन्नामकीर्तनपरः प्रभूताद्भुतगर्भितम् ।
भवनाद्व्योपसंहारं पटुधीः स्पष्टमीक्षते ॥ ३ ॥
अपि ? मोहाभ्रनिर्मुक्ता दृशैता विशदा दिशः ।
सच्चिदानन्दरूपं त्वं कच्चिदुद्धव ! वीक्षसे ? ॥ ४ ॥
इत्युद्धवः समाकर्ण्य हृषीकेशसरस्वतीम् ।
सम्प्रहर्षः पदद्वन्द्वं प्रणनाम कृताञ्जलिः ॥ ५ ॥
"पूर्वपुण्यपरीपाकप्राप्यपादाम्बुजद्वय ! ।
प्रपन्नवत्सल ! श्रीश ! नमस्तुभ्यं दयामय ! ॥ ६ ॥
धन्योऽस्मी"ति वदन्नेष समये बदरीं गतः ।
त्यक्तकायो मामुपेया इत्यादिश्य व्यसृज्यत ॥ ७ ॥
स प्रभोः पादुके भक्त्या मूर्ध्न्याधाय विनिर्गतः ।
सद्योनश्यत्पापजालां विशालां प्राप्तवान् सुधीः ॥ ८ ॥
आकिञ्चन्यं रोचयता कामादींश्चेतसाऽर्पयन् ।
कालेनाल्पेन कैवल्यं स प्रभोर्भजनाद्ययौ ॥ ९ ॥

---

(१) कामादिप्रत्यर्पणरीतिश्च मदीयस्य हरिविरविस्याकाव्यस्य रहस्योल्लासे द्रष्टव्या दिङ्मात्रं यथा—
यस्मात्रसद्भिरबलाः शरणीक्रियन्ते सोऽयं स्वकर्मसुरभूरुहयोर्मदीयः ।
व्यक्तस्वभृत्यजनरक्षणकाम ! कामगन्धद्विपोऽस्तु पदयोस्तव लब्धबन्धः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रपञ्चप्रशमप्रदमेतं समापयत् ।
श्रीकृष्णोद्धवसंवादमूनत्रिंशे महामुनिः ॥ १० ॥

उद्धवोद्गारः ।

(३०) महोत्पातान् मुहुर्जातान् वीक्ष्य कृष्णपुरोगमाः ।
प्रभासमभि निर्जग्मुर्यदवस्तिग्मविक्रमाः ॥ १ ॥

यस्याऽऽश्रयादभवमन्तरदुर्बलोऽपि देदीप्यमानवपुरद्भुत एव कोऽपि ।
भूयात् सखा स मम कोप उपेन्द्र ! तुभ्यं दुर्वृत्तदैत्यदलनिर्दलनोद्यताय ॥२॥
यामाश्रयन्नतिमहानपि लाघवं च प्राप्नोति निर्गतवया अपि यौवनं च ।
विश्वम्भर ! प्रतनपूरुष ! जायतां सा लिप्सा सखी चरणयोस्तव देव ! दासी ३
आश्रित्य यस्य शिखरं मुनिभिर्दुरापं स्वापं गतोऽपि चरितानि बृहन्त्यजायाः ।
साक्षादकार्षमधुनावधि नाथ ! तुभ्यं तन्मोहमन्दिरमहं प्रतिपादयामि ॥ ४ ॥
अध्यङ्घ्रियुग्मसुपदाय मदाभिधेयमुत्तुङ्गशृङ्गमविधेयमिमं महोक्षम् ।
आभीरदारक ! नते मयि किं न ते स्यात् ? पीयूषवृष्टिरुचिरा सुचिराय दृष्टिः ५
स्वामौचितीमपरिहाय रमासहाय ! त्रय्यन्तवर्णितपरोदय ! मत्सरोऽपि ।
यायाद्विसृष्टदिविषत्तटिनीप्रवाहाङ्गुष्ठोपगूढभवदङ्घ्रिनिविष्टभावम् ॥ ६ ॥
बद्धादरो मयि विभावितभूरिवेषः प्रीत्याऽर्पितः पदयुगेऽभिनिवेश एषः ।
अद्धा धिनोतु धियमुद्धृतभूधरस्य देवस्य दूरितपुरन्दरपूजनस्य ॥ ७ ॥
क्लेशप्रदोऽपि सविशेषविगर्हितोऽपि द्वेषः प्रपद्य मनसा प्रतिपाद्यमानः ।
कुर्वीत किं न ? भगवन् ! पुरुषोत्तमस्य गुर्वीं मुदं सपदि चैद्यनिषूदनस्य ॥८॥
संचित्य भृत्यजनवत्सल ! विप्रकीर्णः प्राप्तोऽप्ययं विफलतां प्रणयाद्वितीर्णः ।
जागर्तु संगतिमुपेत्य नखेषु रागः श्रीनाथ ! लब्धभवदङ्घ्रियुगाग्रभागः ॥ ९ ॥
भित्त्वा दृशं च यतिभिर्बत ! दर्शनं च संसर्गभीरुभिरनीति जिघांसितायाः ।
नाथ ! प्रपन्नपर ! सत्वरमस्मिताया आधार एधि पुरतस्तव सस्मितायाः १०॥
नानाकृतिर्गतवया अपि रोचमाना त्रैलोक्यपालक ! मया प्रतिपादितेयम् ।
यावत्प्रसादमनुसृत्य वसेदविद्या भावत्कमन्दिरबहिःपरिमार्जनाय ॥ ११ ॥

इत्यादि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथादेशं तत्र कृत्वा स्नानदानादिकाः क्रियाः ।
श्रान्ता अवद्यं ते मद्यं पपुर्वपुषि दीप्तिदम् ॥ २ ॥
अथ नानाविधं भोज्यं नियोज्यजनकल्पितम् ।
सहैव ते बुभुजिरे चिरेण प्रहसन्मुखाः ॥ ३ ॥
मदास्कन्दितचित्तानां मुदा तेषां यथोत्तरम् ।
प्रावर्तत परीहासश्छिन्दन् मर्म परस्परम् ॥ ४ ॥
मद्यपानकृते तेषां विनोदे क्रोधरूपताम्– ।
संप्राप्ते बान्धवः प्राप सद्य एव सपत्नताम् ॥ ५ ॥
अनालोचितसंबन्धमचिन्तितफलोदयम् ।
तेषां प्रहरतामासीत् संमर्दोऽतीव दारुणः ॥ ६ ॥
आसितोमरकुन्ताद्यैरायुधैः सिन्धुरोधसि ।
परस्परं युयुधिरे क्रोधान्धाः किल बान्धवाः ॥ ७ ॥
क्षीणप्रहरणाः सन्तः समुत्खातास्त एरकाः ।
निशितान्ताः समादाय जघ्नुरन्योन्यमुद्धताः ॥ ८ ॥
दुर्घटं नैव घटते नैव दैवनियोगतः ।
तृणातृणि क्षयं निन्ये वज्रावज्रीव तान् यतः ॥ ९ ॥
इत्थं विनष्टे सकले कुले कूले महोदधेः ।
योगेन रोहिणीसूनुर्जीवं शेषेण सन्दधे ॥ १० ॥
पैप्पलं मूलमाश्रित्य सिद्धकृत्यः क्षमातले ।
आसीच्चतुर्भुजस्तूष्णीं भगवान् वृष्णिपुङ्गवः ॥ ११ ॥
सूच्या बाणाग्रवर्तिन्या मौसल्या लुब्धको जरा ।
मृगास्यमिति विव्याध दूरतः प्रपदं प्रभोः ॥ १२ ॥
पदयोः प्रणतं भीतं तं व्याधमनुकम्पया ।
प्रजिघाय विमानेन पुरीं पौरन्दरीं प्रभुः ॥ १३ ॥

---

(१) गर्हितम् । (२) तृणकरणकं परस्परप्रहरणम् । अग्रेऽप्येवम् । (३) पादाग्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दारुको रथमादाय जगदीशं गवेषयन् ।
तमेव देशमायासीत्तुलसीगन्धसूचितम् ॥ १४ ॥
सूते तस्मिन् कृताक्रन्दे हतानन्दे प्रभोः पुरः ।
द्रव्यैः साङ्ग्रामिकैः सार्द्धमुत्पपात रथोत्तमः ॥ १५ ॥
"वृत्तान्तमेतमाख्याहि द्वारकां याहि दारुक ! ।
धनञ्जयसहायः सञ्छेषाँस्तन्नगरीं नय ॥ १६ ॥
पुरीमेतां प्लावयिता सप्तमेऽहनि सागरः ।
त्वं च क्वचन वर्तेथाः कृतमच्चरणादरः" ॥ १७ ॥
इत्थमादिश्य तं राजन् ! विससर्ज जनार्दनः ।
इतीह कथयामास वृत्तान्तं व्यासनन्दनः ॥ १८ ॥

यदुकुलसंक्षयः ।

(३१) कृष्णं स्वधाम गच्छन्तं ब्रह्मरुद्रपुरोगमाः ।
कुसुमानि प्रवर्षन्तस्तुष्टुवुस्त्रिदिवौकसः ॥ १ ॥
तेषां प्रपश्यतामेव स्वकीयं धाम माधवः ।
समारुरोह भगवान् निजाभिः सह शक्तिभिः ॥ २ ॥
चिन्ताग्निना वर्धितेन वसुदेवपुरोगमाः ।
चिताग्निना चाऽच्युतस्य महिष्यः प्रादहन् वपुः ॥ ३ ॥
श्रीकृष्णेच्छासमायातः किरीटी कुलसंक्षयम् ।
पश्यन् प्रगाढशोकोऽपि गीतयाऽऽसीत्समाहितः ॥ ४ ॥
परिग्रहान् हरेर्नीत्वा शक्रप्रस्थं धनञ्जयः ।
मधुपुर्यामभ्यषिञ्चद्वज्रं मौसलशेषितम् ॥ ५ ॥
इति श्रीकृष्णचरितं कलिकल्मषनाशनम् ।
समापयत् सनिर्याणमेकत्रिंशे महामुनिः ॥ ६ ॥

भगवन्निर्याणम् ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
अयमेकादशः स्कन्धः समक्षेपि यथामति ॥ ११ ॥
॥ पद्यसंकलनाङ्काः ३०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागवतमञ्जरी ।

(स्कन्धः १२)

द्वा सुपर्णा इति श्रुत्या द्वयोरेकश्चकास्ति यः ।
द्वादशेऽस्मिन्नद्वयतां प्राप्त एकश्चकास्तु सः ॥ १२ ॥

(१) प्रस्तूयते द्वादशोऽथ स्कन्ध आश्रयसंश्रयः ।
अधिष्ठानं हरिर्यत्र चतुर्धा चोच्यते लयः ॥ १ ॥
श्रुतिस्मृत्यादिसिद्धोऽयं सर्वेषामाश्रयो हरिः ।
आश्रयान्वेषणं चेष्टं तिरश्चामपि सर्वतः ॥ २ ॥
इत्याश्रयप्राप्तिहेतोर्वैराग्यस्य प्रयोजकम् ।
आद्यैश्चतुर्भिरध्यायैः कालवैषम्यमुच्यते ॥ ३ ॥
शुकानुशिष्टस्य सतः संसाराऽसारताविदः ।
राज्ञ आश्रयसंप्राप्तिर्द्वाभ्यां प्रोक्ता परीक्षितः ॥ ४ ॥
शेषैः सप्तभिरध्यायैर्महर्षीञ्छौनकादिकान् ।
साधनान्याश्रयप्राप्तेराचख्यौ सूतनन्दनः ॥ ५ ॥
आद्ये मागधराजन्यान् कलिकल्मषदूषितान् ।
सांकर्यजातमालिन्याञ्छुकः प्रोचे भविष्यतः ॥ ६ ॥

भविष्यत्कथनम् ।

(२) द्वितीये दोषबहुले गुणहीने कलौ युगे ।
दुःखिप्रायेषु लोकेषु छलप्रायेषु कर्मसु ॥ १ ॥
नष्टप्रायेषु धर्मेषु लुप्तप्रायेषु वर्त्मसु ।
वार्ताप्रायेषु शास्त्रेषु धूर्तप्रायेषु सूरिषु ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणेषु शाठ्यप्रायेषु दोषप्रायेषु वस्तुषु।
दस्युप्रायेषु भूपेषु कल्किराविर्भविष्यति॥ ३ ॥
स दुष्टान्कोटिशो हत्वा धर्मं संस्थापयिष्यति।
तदा कृतयुगारम्भो भावीति परिकीर्तितम्॥ ४ ॥

कलिदशा।

(३) शोचन्ती हसति क्षोणिरतीतानागतान्नृपान्।
विजिगीषाग्निनिर्दग्धज्ञानबीजविचारकान्॥ १ ॥
विजितोऽयं, स जेतव्य, इति चिन्ताशतावृताः।
अन्तकं नोपसीदन्तं हन्त! पश्यन्ति भूभृतः॥ २ ॥
अर्जितोऽयं, स यत्नेनाऽप्यर्जनीयोऽर्थसंचयः।
इति व्यवसिता एव गता भूपतिकोटयः॥ ३ ॥
सागरान्तां वसुमतीं बाहुविक्रमसाधिताम्।
कृत्वाऽपि राजन्! राजानः प्रयाता न निराधिताम्॥ ४ ॥
मान्धातृ–राम–भरत–हैहय–प्रमुखा अपि।
राजन्! नीताः पश्य धात्रा यशोमात्रावशेषताम्॥ ५ ॥
भावाभावौ क्रमात् कुर्वन् भावानां पृथिवीपते!।
कालः कर्मकरालः सन् कलिरद्य निगद्यते॥ ६ ॥
धर्मपादाः सत्य–दया–तपो–दान–मयाः क्रमात्।
हसन्तोऽन्ते गमिष्यन्ति कलेर्निरवशेषताम्॥ ७ ॥
मिथ्या–हिंसा–लोलुपता–विग्रहैश्च समुन्नतैः।
अधर्मपादैर्भविता निर्मर्यादमिदं जगत्॥ ८ ॥
तत्तादृग्दोषसंघातसंपातमलिने कलौ।
अलौकिकत्वं यास्यन्ति स्वाचारनिरता जनाः॥ ९ ॥
युनक्ति श्रेयसा जीवान् हरेर्भक्तिः कलौ युगे।
शक्तिरन्यत्र नास्तीति दिव्यदृग्वक्ति मादृशः॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्धयञ्छुद्धतां बुद्धेरिति रागनिरासतः।
जगाद तरणोपायं तृतीये बादरायणिः॥ ११ ॥

रागनिरासः कलिसन्तरणोपायश्च।

(४) कालचक्रं बम्भ्रमीति च्छिन्दानं सकलं जगत्।
अवधातव्यमत्रेति चतुर्धा प्रोच्यते लयः॥ १ ॥
चतुर्युगसहस्रं हि ब्राह्ममेकं दिनं मतम्।
तावत्प्रमाणा च निशा ब्राह्मी पूर्वैः प्रकीर्तिता॥ २ ॥
दिने सृष्टिर्निशि लयस्त्रैलोक्यस्य प्रजायते।
नैमित्तिकोऽयं प्रलयः (१) ख्यातो निद्रानिमित्तकः॥ ३ ॥
द्विपरार्धावसाने यो ब्रह्मणो जायते लयः।
संकर्षणास्यदहनप्लुष्टनिःशेषविष्टपः॥ ४ ॥
अयं प्राकृतिको (२) यत्र प्रयान्ति ब्रह्मणा समम्।
महत्तत्त्वादयः सप्त जगत्प्रकृतयो लयम्॥ ५ ॥
ब्रह्म सत्यं जगन्मिथ्येत्यनुभूतिमतां सताम्।
आत्यन्तिकलयो (३) मोक्षः प्रपञ्चविलयात्मकः॥ ६ ॥
प्रतिक्षणं प्रणाशो यो दीपादिज्योतिषामिव।
विचारगम्यो वस्तूनां नित्योऽयं(४)प्रलयो मतः॥ ७ ॥
एताः कालगतीर्जन्तुर्भगवद्भक्तिसाधनः।
अतियातीति तुर्येऽत्र व्याजहार शुको मुनिः॥ ८ ॥

चतुर्विधः प्रलयः।

(५) पञ्चमे साक्षिभूतोऽसि न जातोऽसि न नङ्क्ष्यसि।
राजँस्तत्त्वमसि व्यक्तमेतत्कुरु विचारतः॥ १ ॥
शुद्धसत्त्वोदयाद्राजन्! निरुद्धमनसः सतः।
न किंचिदात्मनोऽन्यत्ते प्रतिभासेत पश्यतः॥ २ ॥
नैव त्वं वपुषो नाशान्नीडनाशादिवाण्डजः।
अभावं प्राप्स्यसे राजन्नखण्डज्ञानविग्रहः॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयाति विलयं राजन् ! यावन्न ममता निशा ।
न तावद्वस्तु सदपि प्रत्यभिज्ञायते दृशा ॥ ४ ॥
राजन् ! भवमहामूलमहङ्कारं महाभुज ! ।
उच्छिद्य सद्य एव त्वं स्वतस्तत्त्वज्ञतां व्रज ॥ ५ ॥
इत्यलं श्रेयसः सिद्धेः पद्धतिस्ते प्रदर्शिता ।
अनयैव प्रयाहीति शुकः प्रोचे परीक्षितम् ॥ ६ ॥

परीक्षित्प्रबोधनम् ।

(६) निपीय निर्भरं राजा बादरायणिवाक्सुधाम् ।
अमर्त्यतामनुभवन्नादरादित्यभाषत ॥ १ ॥
मज्जन्नध्यगमं दिष्ट्या ! सिन्धोर्मध्यत उद्धृतः ।
अकिञ्चनधनं देवमनादिनिधनं मुने ! ॥ २ ॥
अनुमन्यस्व भगवन् ! प्रत्यावर्तयितुं मनः ।
आकर्षतीव तत् साधो ! पुमान्कोऽपि पुरातनः ॥ ३ ॥
इत्यादृत्य शुकाचार्यं विसृज्य जगतीपतिः ।
आसीत्समाहिततया परतत्त्वमिलन्मतिः ॥ ४ ॥
द्विजशापनिसृष्टश्च तक्षकः सप्तमेऽहनि ।
निवर्त्य मन्त्रवेत्तारं कश्यपं, प्राप भूपतिम् ॥ ५ ॥
दंशेन तक्षकः काले कामरूपी महीपतेः ।
संपन्नस्य सता भद्रं भस्मसादकरोद्वपुः ॥ ६ ॥
सर्पसत्रप्रवृत्तश्च तत्पुत्रो जनमेजयः ।
आर्तिरूक्षो वाक्पतिना न्यवर्ति हितवादिना ॥ ७ ॥

परीक्षिन्मुक्तिः ।

किंच– ब्रह्ममुखोद्भूतो वेदराशिर्बृहत्तरः ।
चतुर्धा व्यासमुनिना विभेजे सर्वदर्शिना ॥ ८ ॥
स चतुर्भ्यो महर्षिभ्यः प्रादाद्वेदचतुष्टयम् ।
ऋक्संहितामाधिजगे पैलनामा महामुनिः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्यैष्ट यजुषां वर्गं श्रीवैशम्पायनो मुनिः ।
स याज्ञवल्क्यं स्वं शिष्यं निमित्तेऽल्पेऽतिकोपनः ॥ १० ॥
यथेष्टं गच्छ पठितं विजहाहीत्यभाषत ।
स चच्छर्द ततोऽधीतमुपतस्थे च भास्करम् ॥ ११ ॥
स्तोत्रेण चारुणा तस्य प्रसन्नः संस्त्रयीतनुः ।
वाजिनो रूपमादाय यथाभीष्टं वरं ददौ ॥ १२ ॥
तस्य प्रसादात्संप्राप्याऽयातयामं यजुर्गणम् ।
याज्ञवल्क्यः स्वशिष्येभ्यो यथार्हं भागशो ददौ ॥ १३ ॥
अध्यैत जैमिनिर्व्यासात्सामानि मुनिपुङ्गवः ।
इतिवृत्तमिहाध्याये षष्ठे सूतेन वर्णितम् ॥ १४ ॥

वेदत्रयविभागः ।

(७) सप्तमे व्यासतः प्राप्ताः शाखाः सर्वा अथर्वणः ।
अनूवाच स्वकाञ्छिष्यान् सुमन्तुर्जन्तुशर्मदाः ॥ १ ॥
पौराणिकाग्रणीः शिष्यो व्यासर्षे रोमहर्षणः ।
त्रय्यारुणिप्रधानेभ्यः पौराणीं संहितां ददौ ॥ २ ॥
ब्राह्म-पाद्मप्रधानानि लघूनि च बृहन्ति च ।
तान्यष्टादशधा लोके प्रख्यातानि समन्ततः ॥ ३ ॥

अथर्व-पुराण-विभागः ।

(८) अष्टमे तु मृकण्डस्य तनयो विश्वविश्रुतः ।
मार्कण्डेयस्तपस्तेपे पुष्पभद्रानदीतटे ॥ १ ॥
स नैष्ठिकं ब्रह्मचर्यमाश्रित्याऽनीहतां गतः ।
यापयामास तपसा मुनिर्मन्वन्तराणि षट् ॥ २ ॥
मन्वन्तरान्तरारम्भे शतमन्युनियोजितान् ।
अप्रमादी स जितवान् कामादीनजिताश्रयः ॥ ३ ॥
तद्धैर्यपरितुष्टः सन् नरनारायणात्मकः ।
आविर्बभूव भगवान् भक्तकल्पमहीरुहः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुष्टान्तरः स तुष्टाव नरनारायणौ मुनिः ।
अश्रुपूरितदृग्द्वन्द्वः प्रणमन्विहिताञ्जलिः ॥ ५ ॥

मार्कण्डेयतपश्चर्या, भगवद्दर्शनं च ।

(९) नवमे वरयाञ्चायै प्रेरयन्तमधोक्षजम् ।
मार्कण्डेयोऽर्थयामास मायावैभवदर्शनम् ॥ १ ॥

अन्तर्हिते भगवति स्वीकृतप्रार्थने मुनिः ।
स्वाश्रमस्थो यथापूर्वं तं भेजे भक्तिसंभृतः ॥ २ ॥

तस्मिन्संध्यामुपासीने कदाचन महामुनौ ।
झञ्झावातः प्रादुरभूद्वेपयन्सवपुर्मनः ॥ ३ ॥

तडित्प्रकाशप्रचुराः प्रचण्डतरगर्जनाः ।
ववृषुर्मुसलाकारा वारिधारा घनाघनाः ॥ ४ ॥

तुङ्गकल्लोलविक्षिप्तयादोगणविभीषणः ।
व्यानशे वर्धमानश्च सर्वतोऽपि महार्णवः ॥ ५ ॥

बाहुभ्यां प्लवमानोऽयं यादोभिर्व्याकुलीकृतः ।
अनासादितविश्रामश्चिरं बभ्राम विस्मितः ॥ ६ ॥

चारुणि क्वचन द्वीपे पानीयप्रसरज्जटः ।
अमुना स्वेन सदृशो ददृशे वटपादपः ॥ ७ ॥

स धयन्तं पाणिधृतं स्वकीयं चरणाम्बुजम् ।
वटुकं चैकमैक्षिष्ट वटपत्रपुटेशयम् ॥ ८ ॥

प्रष्टुकामः सन्निकृष्टं प्राप्तस्तुष्टमना मुनिः ।
नासिकाश्वसिताकृष्टः प्रविष्ट उदरं प्रभोः ॥ ९ ॥

तत्र सोऽयं यथापूर्वं जगदेतच्चराचरम् ।
स्वमाश्रमपदं तच्च चक्रे लोचनगोचरम् ॥ १० ॥

तर्कयन्नेव निःश्वासैर्बहिर्नीतो मुनीश्वरः ।
समुकुन्दं वटतरुं जगच्चाचष्ट विप्लुतम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



अकालकल्पान्तनिभालनस्पृहासमुल्लसद्बालमुकुन्दमूर्तये ।
निजाङ्घ्रिभोक्त्रे वटपत्रशायिने प्रपञ्चगोप्त्रे हरये मुहुर्नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदवस्थं मुकुन्दं तं परिष्वक्तुमना मुनिः ।
अपश्यदाश्रमस्थं स्वं जगच्चैतद्यथास्थितम् ॥ १२ ॥

मायावलोकनम् ।

(१०) दशमे योगमायाया वैभवं वीक्ष्य विस्मितः ।
स्वाश्रमस्थो मुनिर्दध्यौ भगवन्तमधोक्षजम् ॥ १ ॥
चतुर्भुजं वपुर्विष्णोश्चक्षुर्द्वितयगोचरम् ।
चिरं भूयादिति प्रोच्चैः स्तवीति स्म स उत्सुकः ॥ २ ॥

---

(१) एतादृशीं स्तुतिं जिज्ञासमानैः सज्जनैर्मदीयस्य हरिविरिवस्याकाव्यस्य औपचारिकोल्लासे प्रार्थनाद्वादशी स्तुतिर्दर्शनीया यथा—

किरीटमाणिक्यमयूखमञ्जरीप्रसारनिःसारितभक्तसाध्वसम् ।
चकास्तु मच्चक्षुषि सच्चिदात्मनः प्रभोर्नभस्यान्तनभःप्रभं वपुः ॥ १ ॥
स्फुरन्मणिश्रेणिविलोलकुण्डलप्रभापरिष्वक्तकपोलमण्डलम् ।
चकास्तु मच्चक्षुषि० ॥ २ ॥
प्रसन्नदृग्दर्शितभावुकोदयं हसन्मुखध्वंसितपातकोच्चयम् ।
चकास्तु मच्चक्षुषि० ॥ ३ ॥
दिगन्तविश्रान्तनितान्तदीप्तिमदृगन्तदूरीकृतसर्वदुष्कृतम् ।
चकास्तु मच्चक्षुषि० ॥ ४ ॥
विरोचमानं निटिलान्तचुम्बिभिर्मनोहरैरञ्जनमेचकैः कचैः ।
चकास्तु मच्चक्षुषि० ॥ ५ ॥
दयामयं दर्शितदोश्चतुष्टयं सकम्बुचक्रं सगदं सहाम्बुजम् ।
चकास्तु मच्चक्षुषि० ॥ ६ ॥
उरस्तटीप्रान्तजुषाऽतिभूयसा परिष्कृतं कौस्तुभरत्नरोचिषा ।
चकास्तु मच्चक्षुषि० ॥ ७ ॥
अनन्यवृत्त्या कमनीयरूपया प्रकाशवत्या हृदि संश्रितं श्रिया ।
चकास्तु मच्चक्षुषि० ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषेण पर्यटन्प्राप्तः सप्रियः सन्निधिं मुनेः ।
हरः संमीलिताक्षस्य तस्याऽभूच्चित्तगोचरः ॥ ३ ॥
विस्मयोन्मीलिताक्षोऽथ मन्मथारिं पुरः स्थितम् ।
मार्कण्डेयः प्रतुष्टाव पुरुप्रमदगद्गदः ॥ ४ ॥
हरेरभिन्नमात्मानं ब्रुवता तुष्यता सता ।
सत्कुर्वता शिवेनोचे वरं याचेत्ययं मुनिः ॥ ५ ॥
कृतार्थतां दर्शनेन दर्शयन्नेष सादरम् ।
नारायणे स्थिरां भक्तिं वव्रे शङ्करतो वरम् ॥ ६ ॥
सप्तकल्पान्तजीवित्वं पुराणाचार्यतान्वितम् ।
भक्तिं च तादृशीं दत्वा पुरारातिस्तिरोदधे ॥ ७ ॥

मार्कण्डेयानुग्रहः ।

(११) एकादशे तु भगवान् पूजनादिकसिद्धये ।
कथितः सायुधः साङ्गः सहवाहनपार्षदः ॥ १ ॥
प्रतिमासं भिन्ननामा सहैव परिचारकैः ।
षड्विधैर्भ्रमति श्रीमाँल्लोकस्वस्तिकरो रविः ॥ २ ॥
ऋषयोऽमुं संस्तुवन्ति नृत्यन्त्यप्सरसः पुरः ।
गन्धर्वाश्च प्रगायन्ति रथं नह्यन्ति भोगिनः ॥ ३ ॥

गलप्रदेशादुपजानु मालया विभासितं सौरभसारपूर्णया ।
चकास्तु मच्चक्षुषि० ॥ ९ ॥
यथावकाशं तपनीयपत्रिकाप्रकाशपीतोद्गमनीयसंवृतम् ।
चकास्तु मच्चक्षुषि० ॥ १० ॥
अनाद्यनन्ताखिलपापनाशनप्रतापसंपन्नमनोरमस्मितम् ।
चकास्तु मच्चक्षुषि० ॥ ११ ॥
दरातिसीदच्छरणार्थिरक्षणत्वराप्रसर्पच्चरणाम्बुजद्वयम् ।
चकास्तु मच्चक्षुषि० ॥ १२ ॥

इति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योजितं स्यन्दनं यक्षैर्नोदयन्ति च राक्षसाः।
प्रतिमासं संस्तुवन्ति बालखिल्याः पुरःसराः ॥ ४ ॥

आदित्यव्यूहवर्णनम्।

(१२) द्वादशः प्रथमस्कन्धादिकवृत्तनिरूपकः।
अनुक्रमणिकाध्यायः फलस्तुतिसमन्वितः ॥ १ ॥
समग्रपाठफलदः श्रद्धाशोधितचेतसाम्।
अशक्तानां मानवानां मुनिना परिदर्शितः ॥ २ ॥
ऊहुर्धिया न ये विष्णोश्चरणद्वन्द्वमादृताः।
द्वन्द्वव्याकुलतां प्राप्य त एव मुमुहुर्मुहुः ॥ ३ ॥
उदयन्मानसव्योम्नि भजनोद्भासितान्तरे।
जनैरालोक्यते धन्यैः कृष्णचन्द्रः शनैः शनैः ॥ ४ ॥
इतरा भगवद्भक्तेः श्रेयःसाधनपद्धतिः।
क्वापि नास्तीति सिद्धान्तोऽप्यध्यायेऽस्मिन्प्रकाशितः ॥ ५ ॥

भगवद्भजनं श्रेयःपद्धतिः।

(१३) त्रयोदशे पुराणानां गणना क्रमशालिनी।
ग्रन्थसंख्यानसहिता जगदे सूतसूनुना ॥ १ ॥
भावे भावे भक्तिमतां भगवद्भावसाधकम् ॥
प्रकटीकृतसद्वृत्तं तापत्रितयबाधकम् ॥ २ ॥
महापुराणमेतच्च श्रीमद्भागवताभिधम्।
साक्षान्मोक्षप्रदत्वेन पुराणोपरि वर्तते ॥ ३ ॥
भाद्रपद्यां पूर्णिमायां स्वर्णसिंहासनान्वितम्।
एतद्दत्वा पदं भद्रं पूर्णमेतीति वर्णितम् ॥ ४ ॥

पुराणप्रशस्तिः।

---

(१) पुराणगणना ग्रन्थसंख्या च यथा—
(१) ब्राह्मम् १०००० । (२) पाद्मम् ५५००० । (३) वैष्णवम् २३००० ।
(४) शैवम् २४००० । (५) श्रीमद्भागवतम् १८००० । (६) नारदम् २५००० ।
(७) मार्कण्डेयम् ९००० । (८) आग्नेयम् १५४०० । (९) भविष्यम् १४५०० ।
(१०) ब्रह्मवैवर्तम् १८००० । (११) लैङ्गम् । ११००० । (१२) वाराहम् २४००० ।
(१३) स्कान्दम् ८१००० । (१४) वामनम् १०१०० । (१५) कौर्मम् १७००० ।
(१६) मात्स्यम् । १४००० । (१७) गारुडम् १९००० । (१८) ब्रह्माण्डम् १२००० ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलङ्घनीयमखिलैः पुराणार्कोदयाचलम् ।
सभक्ति योजितकराः पराशरसुतं नुमः ॥ ५ ॥
पुरःसरं मुनीन्द्राणां सुरक्षितपरीक्षितम् ।
प्रपञ्चकञ्चुकित्रासाद्व्यासात्मजमुपास्महे ॥ ६ ॥
नानाव्रततपोदानाध्वरस्वाध्यायसिद्धये ।
श्रद्दधाना विश्वपतिं वन्दमाना वदाम ओम् ॥ ७ ॥

ग्रन्थान्तमङ्गलम् ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
अयं च द्वादशः स्कन्धः समक्षेपि यथामति ॥ १३ ॥
औत्सुक्यजातरचनैर्वचनैर्हासहेतुभिः ।
शिशोरिव मम श्रीशः पितेव प्रीयतां प्रभुः ॥ १४ ॥

पद्यसंकलनाङ्काः ॥ ९१ ॥

तत् त्वम् असि

22.223
GAU
1984 B.S.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशभिः कुलकम्–

(१) भूत्राणार्थीभवद्राणाकुलाम्भोनिधिकौस्तुभे ।
नेपालदेशभूभागभागधेयसमुद्भवे ॥

(२) सद्गुणक्रीतसुजनव्रजगीतमहोदये ।
विक्रमप्रीतसबलचक्रवर्तिकृताश्रये ॥

(३) प्रतिभातिशयप्राप्तिप्रतिभासितवाङ्मये ।
नीतिविस्तारणकलाध्वस्तभीतिसमुच्चये ॥

(४) प्रतापतापितस्वान्तकान्दिशीकद्विषद्दले ।
विकसत्कीर्तिलतिकासमामोदितभूतले ॥

(५) निजप्रजानिर्विशेषप्रजाक्षेमप्रसारिणि ।
पाखण्डदण्डनप्राप्तधर्माशीःसाधुचारिणि ॥

(६) सार्वभौमार्पितबृहद्विरुदावलिधारिणि ।
विद्वत्कथापथातीतगुणग्रामविहारिणि ॥

(७) श्रीश्रीश्रीमन्महाराजचन्द्रसंशेरवर्म्मणि ।
निस्तन्द्रतां समापन्ने प्रजारञ्जनकर्म्मणि ॥

(८) तद्दोर्देवद्रुमच्छायां सदाऽध्यासितुमिच्छताम् ।
सज्जनानां विनोदाय भगवद्भक्तिशालिनाम् ॥

(९) सूनुः प्राज्ञशिरोधार्यश्रीरमाकान्तशर्म्मणाम् ।
अभीष्टसज्जनौदार्यः कुलचन्द्रः कृतश्रमः ॥

(१०) नेपालदेशवास्तव्यः श्रीशादेशवशंवदः ।
एतां परिमलोपेतां मञ्जरीमुदभावयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलङ्घनीयमखिलैः पुराणार्कोदयाचलम् ।
सभक्ति योजितकराः पराशरसुतं नुमः ॥ ५ ॥
पुरःसरं मुनीन्द्राणां सुरक्षितपरीक्षितम् ।
प्रपञ्चकञ्चुकित्रासाद्व्यासात्मजमुपास्महे ॥ ६ ॥
नानाव्रततपोदानाध्वरस्वाध्यायसिद्धये ।
श्रद्दधाना विश्वपतिं वन्दमाना वदाम ओम् ॥ ७ ॥

ग्रन्थान्तमङ्गलम् ।

इतीच्छता परं वस्तु समक्षेऽपि स्फुरद्गति ।
अयं च द्वादशः स्कन्धः समक्षेपि यथामति ॥ १३ ॥

औत्सुक्यजातरचनैर्वचनैर्हासहेतुभिः ।
शिशोरिव मम श्रीशः पितेव प्रीयतां प्रभुः ॥ १४ ॥

पद्यसंकलनाङ्काः ॥ ९१ ॥

9
ए. ९४९६
@ 22:223
GAU
1984 B.S.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशभिः कुलकम्–

(१) भूत्राणार्थीभवद्राणाकुलाम्भोनिधिकौस्तुभे ।
नेपालदेशभूभागभागधेयसमुद्भवे ॥
(२) सद्गुणक्रीतसुजनव्रजगीतमहोदये ।
विक्रमप्रीतसबलचक्रवर्तिकृताश्रये ॥
(३) प्रतिभातिशयप्राप्तिप्रतिभासितवाङ्मये ।
नीतिविस्तारणकलाध्वस्तभीतिसमुच्चये ॥
(४) प्रतापतापितस्वान्तकान्दिशीकद्विषद्दले ।
विकसत्कीर्तिलतिकासमामोदितभूतले ॥
(५) निजप्रजानिर्विशेषप्रजाक्षेमप्रसारिणि ।
पाखण्डदण्डनप्राप्तधर्माशीःसाधुचारिणि ॥
(६) सार्वभौमार्पितबृहद्विरुदावलिधारिणि ।
विद्वत्कथापथातीतगुणग्रामविहारिणि ॥
(७) श्रीश्रीश्रीमन्महाराजचन्द्रसंशेरवर्म्मणि ।
निस्तन्द्रतां समापन्ने प्रजारञ्जनकर्म्मणि ॥
(८) तद्दोर्देवद्रुमच्छायां सदाऽध्यासितुमिच्छताम् ।
सज्जनानां विनोदाय भगवद्भक्तिशालिनाम् ॥
(९) सूनुः प्राज्ञशिरोधार्यश्रीरमाकान्तशर्म्मणाम् ।
अभीष्टसज्जनौदार्यः कुलचन्द्रः कृतश्रमः ॥
(१०) नेपालदेशवास्तव्यः श्रीशादेशवशंवदः ।
एतां परिमलोपेतां मञ्जरीमुदभावयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

DATE DUE

(११) सेय नाता वैक्रमा[illegible] [illegible]हिनागाङ्कभू[१९८३]मिते ।
प्रमदादुपदा[illegible]वं गदा[illegible] [illegible]यो: ॥

(१२) द्वेषानर्हा विश्वपतेरेषा याता प्रसादताम् ।
सतां मिलत्परिमला रञ्जयेन्मञ्जरी मनः ॥

(१३) अबोधानवधानाभ्यां स्खलतोऽपि सतः खलु ।
भवेन्नेदीयसी सत्सु नतमौलेर्मम क्षमा ॥

इयमाजानसरलदयारसमयाशया:!
अम्लानभावमयतामवाप्तभवदाश्रया

इति

भागवतमञ्जरी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ पुस्तकालयः

प्रत्यावर्तनतिथिः

08/06/190

Q22:223
GAu
1984.B.S

१५१६८

सरस्वती नः सुभगा मयस्करत्
महेन्द्र संस्कृत विश्वविद्यालयः
MAHENDRA SANSKRIT UNIVERSITY 1986 A.D.

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

...टि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णकर्णाभरणकाव्यम्—साहित्याचार्य कुल... प्रणीतम्। इदं हि नितान्तदुर्गमे लकारार्थप्रक्रियाप्रपञ्चे व्युत्पित्सूनां ... धनाय सूत्रवृत्त्युपन्यासपुरःसरं सरसैः सरलैश्च पद्यैरुदाहरणतां ... बद्धमिति च्छात्रगणैराद्रियते। मूल्यम् ॥ (अष्टौ आणकाः)

गौरीशङ्करगुटिका. इयं कर्मकाण्डिनामपेक्ष्यते। अत्र ... वरण-पुण्याहवाचन-शंकरार्चनादिविधिसहितो रुद्रपाठः सस्वरः स... पाठश्च साङ्ग एव निवेशितोऽस्ति। मूल्यम् १॥ (सार्धं रूपकम्)

अलङ्कारचन्द्रोदयः—सा. आ. कुलचन्द्रगौतमप्रणीतः। ... भाषया प्रणीतेऽस्मिन्प्रबन्धे वक्रोक्त्यादीनां शब्दालंकाराणामुपमादीनामर्थालंकाराणां च लक्षणानि सोदाहरणानि तथा निवेशितानि, यथा खलु च... वर्गाणामलंकारमर्मज्ञता च काव्यवैचित्र्यचमत्कृतचित्तता च युगपदुल्लस... मूल्यम् २ (रूपकद्वयम्)

स्वयंवैद्यकम्। सा. आ. कुलचन्द्रगौतमसंकलितम्। गोरक्षभाषयैव रोगाणां निदानं-पूर्वरूपं-रूपम्-सात्म्यम्-संप्राप्तिः-चिकित्सा-विशेषचिकित्सा-साध्यासाध्यत्वनिर्णयः-पथ्यापथ्योपदेशश्च ... शितोऽस्तीति समाजसमाहृतेऽस्मिन्प्रबन्धे न किंचिद्वक्तव्यमस्ति। मूल्य... (रूपकद्वयम्)

एतेषां प्रापणव्ययः पृथगेव ग्राहकैर्देयः।

अमरकोशः—सा. आ. गौतम कुलचन्द्र शर्मणा गोरक्ष... व्याख्यातः। आबालमावृद्धं च प्रसिद्धिं गतोऽयं ग्रन्थः पुनर्मुद्रणाय मुद्र... यमध्यास्ते।

शब्दकोशः—अत्र च गोरक्षभाषया आङ्ग्लभाषया च संस्कृ... शब्दानां व्याख्यानं नवीनया पद्धत्या प्रदर्शितं वर्णानुक्रमेण। अयं ग्रन्थो मुद्यते।

एतत्पुस्तकप्राप्तिस्थानम्

पं. काशीनाथ गौतम.

नं. ३७ लाजीम पाट—नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu